काव्यसंग्रहः ।



द्वितीयो भागः

वि, ए, उपाधिधारिणा

श्रीजीवानन्दविद्यासागरभट्टाचार्येण

विरचितया व्याख्यया समलङ्कृतः ।

द्वितीयसंस्करणम् ।

कलिकातराजधान्याम् ।

सरस्वतीयन्त्रे

मुद्रितः ।

ई १८८८ ।

প্রকাশক—শ্রীজীবানন্দবিদ্যাসাগর বি; এ;
২নং রমানাথমজুমদারের ষ্ট্রীট্
কলিকাতা।

প্রিণ্টর—শ্রীক্ষেত্রমোহন মুখোপাধ্যায়
৫৬নং আমহার্ষ্ট ষ্ট্রীট্
কলিকাতা।

अशुद्धिशोधनम् ।

काव्यसंग्रहस्य प्रथमभागे

पृष्ठाङ्कः	पङ्क्तौ	अशुद्धम्	शुद्धम् ।
२१२	७	पिधीयता	विधीयता
२४६	२	निक्षेपणाय एव	निक्षेपणाय पट-
		पटसुकृतमर्पयन्ती	सुकृतसुकर्न्ती
२७४	५	यौ यस्य	यत् यस्य
२७७	५	यस्य	यस्य च
४१२	९	फल्गु: स्फुलिङ्गो लघुः	फल्गु स्फुलिङ्गं लघ
४४२	५	तासां	तेषां
४७८	१	दहति न	दहति हि
४९०	४	धावय	वारय
५१५	२	श्रीपतिं नारदादिः	श्रीपतेर्नारदादिः
५२४	२	एतः	एते
५४५	८	पुच्छ	पिच्छ
५४८	६	यस्यैकस्मिन्	यस्यैकस्मिन्
५७१	१	दूरं दूरादपि	दूराद्दूरादपि
५७९	६	धन्य	धन्यम्
६००	२	अद्यापि तां	अद्यापि तत्
६१२	२	तेन	येन
६१२	४	परो	परं

काव्यसंग्रहस्य द्वितीयभागे

२४	६	दैवकृतकः	दैवकृतकात्
२६	४	पुञ्जितपरो	संचितपरो
३८	८	वीक्षितः	वीक्षितम्
५४	५	लुभ्रू भङ्गैः	लुभ्रू भङ्गैः
६५	७	सेव्याः	सेव्या
७२	५	मन्तोऽसौ	मन्त्वेते
७७	५	विश्रम्भाङ्गं	विश्रम्भाङ्गाः
७८	१	आतनोद्ध	आतनोति

पृष्ठाङ्कः	पङ्क्तौ	अशुद्धम्	शुद्धम्
८४	४	किं वाथोच्चैः	किं वार्थैस्तैः
८८	३	स्ता एव	स्त एव
८८	७	धिरसं	स्तुरसं
९६	४	सनिश्वास	सुनिश्वास
१८८	८	कर्षणं	कषणं
१२२	८	भूभौशय्या	भूभोशय्यः
१३६	५	शौर्यं वैरिणि	शौर्यं
१३७	६	साधुवृत्तोनां	साधुवृत्तानां
१३७	७	कन्दुकपातेन पतति	कन्दुकपातेनोत् पतति
१४२	६	रम्भयन्तः	रम्भवन्तः
१४४	१	गुणेन	परेण
१५१	२	भूषणाश्चतुरगा	भूषणाश्चतुरगा
१६७	५	पयोनिधि	पयोधि
१८३	५	तरङ्गकण	तरङ्गचय
१८८	६	किं केन	किं तेन
१९७	१०	यान्ति	यान्तु
२११	६	वधिगतम्	ब्धिगतम्
२१४	२	शब्यसंज्ञ	सङ्गलब्ध
२१४	५	ब्रह्माण्डोमण्डली	ब्रह्माण्डमण्डली
२२५	६	दश	दश दिशः
२३२	२	वीतेऽन्धकारे	वीतान्धकारः
२३४	४	सैवान्यरूपा	सेवान्यरूपा
२४९	६	यच्चपातात्	यच्चवातात्
२५०	१	यच्चपातात्	यच्चवातात्
२५६	६	नोड्डूसरा स्वर्धुनी	नोड्डूसरस्वर्धुनी
२७१	६	स्वमूर्त्तिम्	स्वमूर्त्तिम्
२७६	४	स्वनुगुणगणो	स्वनुगुणगुणो
२९१	६	कांच	कंस

काव्यसंग्रहः।

द्वितीयो भागः।

अमरशतकम्।

ज्याकृष्टिबद्धखटकामुखपाणिपृष्ठ-
प्रेङ्खन्नखांशुचयसंवलितोऽम्बिकायाः।
त्वां पातु मञ्जरितपल्लवकर्णपूर-
लोभभ्रमद्भ्रमरविभ्रमभृत्कटाक्षः॥ १॥

ज्याकृष्टीति-। ज्याया: मौर्व्याः वा आकृष्टिः आकर्षणं कामेन क्रूरं प्रति शरनिक्षेपार्थमिति भावः तया बद्धा जनिता या खटका चकितत्वं तया सहे यः पाणिः अर्पित इति भावः तस्य पृष्ठे प्रेङ्खतां स्फुरतां नखांशूनां चयेन निकरेण संवलितः संयुक्तः मञ्जरितः सञ्जातमञ्जरीकः पल्लव एव कर्णपूरः कर्णभूषणं तस्य लोभात् भ्रमतः सञ्चरतः भ्रमरस्य विभ्रमभृत् शोभाधारी अम्बिकायाः गौर्याः कटाक्षः क्रूरं प्रतीति शेषः त्वां पातु रक्षतु। अत्र मञ्जरितपल्लवस्य कर्णपूरत्वेनारोपत्वात् रूपकं तस्य च भ्रमरस्य लोभात् भ्रान्तिमान् ततश्चाभ्यस्य विभ्रमं कथमन्यो बिभर्त्तीति वाच्यप्रतीतेः निदर्शनेति त्वयोरङ्गाङ्गिभावः सङ्करः। तदुक्तं दर्पणे। रूपकं रूपितारोपाद् विषये निरपह्नवे इति, वाच्यादतथित् तद्बुद्धिर्भ्रान्तिमान् प्रतिभोत्थितेति, सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वापि कुत्रचित्। यत्र विम्बानुविम्बत्वं बोधयेत् सा निदर्शनेति च। वसन्ततिलकं वृत्तं ज्ञेयं वसन्ततिलकं तभजा जगौ ग इति तल्लक्षणात्॥ १॥

क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोऽंशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण ।
आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शरारिः॥२

आलोलामलकावलीं विलुलितां बिभ्रच्चलत्कुण्डलं
किञ्चिन्मृष्टविशेषकं तनुतरैः स्वेदाम्भसां शीकरैः ।
तत्त्वन्या यत् सुरतान्ततान्तनयनं वक्त्रं रतिव्यत्यये
तत् त्वां पातु चिराय किं हरिहरब्रह्मादिभिर्दैवतैः ॥३॥

क्षिप्त इति । यः क्षिप्तः अङ्कात् पतितः हस्तावलग्नः हस्तयोरवसक्तः प्रसभं बलात् अभिहतोऽपि ताडितोऽपि त्यक्तोऽपीति भावः अंशुकान्तं वसनाञ्चलम् आददानः गृह्णन् केशेषु गृह्णन् अपास्तः निराकृतः चरणयोर्निपतितः संभ्रमेण भयेन मानगौरवेण च नेक्षितः नावलोकितः साश्रुनेत्रोत्पलाभिः सजलनयनोत्पलाभिः त्रिपुरयुवतिभिः असुराङ्गनाभिः आर्द्रापराधः नवकृतापराधः कामीव कान्त इव अवधूतः त्यक्तः, स शाम्भवः शरारिः वः युष्माकं दुरितं पापं दहतु भस्मीकरोतु । उपमालङ्कारः । खग्धराछन्दसम् । अब्धेर्यानां त्रयेण त्रिमुनियतियुता खग्धरा कीर्त्तितेयमिति तल्लक्षणात् ॥ २ ॥

आलोलामिति । आलोलाम् ईषच्चलां विलुलितां शिथिलीकृताम् अलकावलीं कुन्तलचयं बिभ्रत् वहती दोलायमाने कुण्डले यत्र तथोक्तं तनुतरैः अल्पालैः स्वेदाम्भसां घर्मवारीणां शीकरैः कणैः किञ्चित् ईषत् मृष्टम् अवलुप्तं विशेषकं तिलकं यस्य तथोक्तं तत्त्वन्याः अन्याङ्गनाः रतिव्यत्यये सुरतावसाने यत् सुरतस्य अन्ते तान्ते क्लान्ते आतुरे इति भावः नयने यस्य तादृशं वक्त्रं वदनं, तत् त्वां चिराय पातु रक्षतु तादृशं प्रियावदनं त्वं पश्येति भावः हरिहरब्रह्मादिभिः दैवतैः देवैः किं न किमपि प्रयोजनमित्यर्थः । हरिहरब्रह्मादीनामाराधने तादृशं सुखं नेति भावः । शार्दूलविक्रीडितं वृत्तम् ।

अलसवलितैः प्रेमार्द्रार्द्रैर्मुहुर्मुकुलीकृतैः
क्षणमभिमुखैर्लज्जालोलैर्निमेषपराङ्मुखैः ।
हृदयनिहितं भावाकूतं वमद्भिरिवेक्षणैः
कथय सुकृती कोऽयं मुग्धे ! त्वयाद्य विलोक्यते ॥ ४ ॥
दत्तोऽस्याः प्रणयस्त्वयैव भवता चेयं चिरं लालिता
दैवादद्य किल त्वमेव कृतवानस्या नवं विप्रियम् ।
मन्युर्दुःसह एष यात्युपशमं नो सान्त्ववादैः स्फुटं
हे निस्त्रिंश ! विमुक्तकण्ठकरुणं तावत् सखी रोदितु ॥ ५ ॥

सूर्य्यश्चैर्व्यटि यः सजौ सततगाः शार्दूलविक्रीडितमिति तल्लक्षणात् ॥ ३ ॥

अलसेति । हे मुग्धे सुन्दरि ! अद्य त्वया अलसवलितैः अलसं वलितं चलनं येषां तैः प्रेम्णा आर्द्रार्द्रैः अतिस्निग्धैरित्यर्थः मुहुः पुनः पुनः मुकुलीकृतैः मुकुलतां नीतैः क्षणम् अभिमुखैः सम्मुखीनैः लज्जया लोलैः चञ्चलैः अन्यतो विसर्पद्भिरिति भावः निमेषपराङ्मुखैः निर्निमेषैरित्यर्थः हृदयनिहितं हृदयस्थं भावाकूतं प्रणयाभिलाषं वमद्भिरिव प्रकटयद्भिरिव ईक्षणैः नयनैः कोऽयं सुकृती पुण्यवान् जनः विलोक्यते दृश्यते कथय वद । हरिणीवृत्तम् । नसमरसला मः षड्वेदैर्हयैर्हरिणी मतेति तल्लक्षणात् ॥ ४ ॥

दत्त इति । हे निस्त्रिंश ! निर्दय ! अस्याः त्वयैव प्रणयो दत्तः, भवता च इयं चिरं लालिता पालिता, दैवात् अद्य त्वमेव अस्याः नवं विप्रियम् अपराधं कृतवान् । एष मन्युः तव विप्रियजनितः कोप इत्यर्थः दुःसहः, सान्त्ववादैः स्फुटम् उपशमं नो याति न गच्छति, सखी विमुक्तकण्ठकरुणं त्यक्तकण्ठकरुणस्वरं यथा तथा तावत् कियत्क्षणमिति भावः रोदितु । विना रोदनमेष मानो न यातीति त्वं कियत्क्षणं तिष्ठेति नायकं प्रति सख्या उक्तिः । शार्दूलविक्रीडितं वृत्तम् ॥ ५ ॥

लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो
निराहाराः सख्यः सततरुदितोच्छूननयनाः ।
परित्यक्तं सर्वं हसितपठितं पञ्जरशुकै-
स्तवावस्था चेयं विसृज कठिने ! मानमधुना ॥ ६ ॥
नार्य्यस्तन्वि ! हठाद्धरन्ति रमणं तिष्ठन्ति नो वारिता-
स्तत् किं तास्यसि किञ्च रोदिषि मुधा तासां प्रियं मा कृथाः
कान्तः केलिरुचिर्युवा सहृदयस्तादृक् पतिः कातरे !
किन्नो कर्करकर्करैः प्रियमतैराक्रम्य विक्रीयते ॥ ७ ॥

लिखन्निति । हे कठिने ! तव प्राणदयितः जीवितेश्वरः अवनतः अधोमुखः सन् बहिः बाह्यदेशे भूमिं लिखन् आस्ते तिष्ठति । सख्यः सहचर्यः निराहाराः तथा सततरुदितेन उच्छूनं स्फीतं नयनं यासां तथोक्ताः तव दुःखादिति भावः पञ्जरशुकैः हसितं पठितञ्च सर्वं परित्यक्तं तवावस्थादर्शनेन शोकादिति भावः तव च इदमू अवस्था इदृशाहारादिपरित्यागरूपेति भावः । तस्मात् अधुना इदानीं मानं विसृज त्यज । लिखरिणोद्वृत्तं, रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणीति तल्लक्षणात् ॥ ६ ॥

नार्य्य इति । हे तन्वि कृशोदरि ! नार्य्यः बान्धवनिता इति भावः हठात् सहसा रमणं कान्तं हरन्ति आच्छिद्य स्वयं कुर्वन्त्योत्यर्थः, वारिताः निषिद्धाः ना इति शेषः नो तिष्ठन्ति । तत् तस्मात् किं कथं तास्यसि सन्तप्यसे ? किञ्च कथं वा मुधा वृथा रोदिषि, तासां वारनारीणां प्रियं मा कृथाः न कुरु । हे कातरे ! कान्तः प्रियः केलिरुचिः सुरतप्रियः युवा सहृदयः सभ्यः तादृक् पतिः प्रियमतैः बहुभिः प्रियवचनैः आक्रम्य वशीकृत्य विक्रीयते ? इदानीं वेश्याभ्य इति भावः नः अस्माकं कर्करकर्करैः अतिकठिनैर्वचोभिरिति शेषः इदानीं तव अप्रियत्वात् कठिनत्वेन प्रतीयमानैरिति भावः किम् ?न किमपि

कोपात् कोमललोलबाहुलतिकापाशेन बद्ध्वा दृढं
नीत्वा केलिनिकेतनं दयितया सायं सखीनां पुरः ।
भूयोऽप्येवमिति स्खलन् मृदुगिरा सत्यं दुश्चेष्टितं
धन्यो हन्यत एव निह्नुतिपरः प्रेयान् वदत्या हसन् ॥८॥

प्रहरविरतौ मध्ये वाऽस्तस्तोऽपि परेऽथवा
किमुत सकले याते वाऽह्नि प्रिय ! त्वमिहैष्यसि ।
इति दिनशतप्राप्यं देशं प्रियस्य यियासतो
हरति गमनं बालालापैः सवाष्पगलज्जलैः ॥ ९ ॥

प्रयोजनम् । वञ्चयमञ्चाभिरुचं त्वमिदानीं यथेच्छं कुर्विति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ७ ॥

कोपादिति । सायं सन्ध्याकाले सखीनां पुरः अग्रतः कोमला मृदवो लोला चञ्चला च बाहुलतिका एव पाशः रज्जुः तेन दृढं बद्ध्वा संयम्य दयितामिति भावः केलिनिकेतनं क्रीडामन्दिरं नीत्वा हसन् निह्नुतिपरः न मयैवं कृतमिति स्वकृतविप्रियापह्नवपरः धन्यः पुण्यवान् प्रेयान् कान्तः दयितया कान्तया कोपात् स्खलन्तो मृदवो गीर्वाक् यस्याः तथाभूतया वदत्या वक्त्या भूयः पुनरपि एवं त्वया कृतमिति शेषः इति दुश्चेष्टितं दुराचारं कान्तस्येति भावः सत्यं प्रकाश्य हन्यत एव ताड्यत एव । शार्दूलविक्रीडितं वृत्तम् ॥ ८ ॥

प्रहरेति । हे प्रिय ! त्वं प्रहरविरतौ एकयामावसाने, अह्नः दिवसस्य मध्ये मध्याह्नसमये वा, अथवा ततः तस्मात् मध्याह्नादपि परे समये इति शेषः किमुत सकले अह्नि दिवसे याते गते वा इह एष्यसि आगमिष्यसि इति इत्थं सवाष्पं गलन्ति स्रवन्ति जलानि अश्रूणि येषु तैः व्याजापैः बाला नवोढा कान्ता दिनशतप्राप्यं देशं यियासतः गन्तुमिच्छतः प्रियस्य गमनं हरति निवारयति दूरदेशे व्याजापैः कथं गच्छते इति भावः । हरिणीवृत्तम् ॥ ९ ॥

याताः किन्न मिलन्ति सुन्दरि ! पुनश्चिन्ता त्वया मत्कृते
नो कार्या नितरां क्षयासि कथयत्येवं सवाष्पे मयि ।
लज्जामन्थरतारकेण निपतद्धारायुता चक्षुषा
दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः ॥ १० ॥
धीरं वारिधरस्य वारि किरतः श्रुत्वा निशीथे ध्वनिं
दीर्घोच्छ्वासमदश्रुणा विरहिणीं बालां चिरं ध्यायता ।
अध्वन्येन विमुक्तकण्ठमखिलां रात्रिं तथा क्रन्दितं
ग्रामीणैर्व्रजतो जनस्य वसतिर्ग्रामे निषिद्धा यथा ॥११॥

याता इति । हे सुन्दरि ! याताः गताः विदेशमिति शेषः किं न पुनर्मिलन्ति न पुनः सङ्गच्छन्ते ? अपितु मिलन्त्येवेत्यर्थः । तस्मात् त्वया मत्कृते मदर्थं चिन्ता न कार्या, नितरां अत्यर्थं क्षया क्षीणा असि मद्भावनयेति भावः सवाष्पे साश्रुनेत्रे मयि एवं कथयति सति तया कान्तया लज्जया मन्थरा जड़ा तारका यस्य तादृशेन निपतन्ती धारा यस्य तादृशं अश्रु यस्य तथाभूतेन चक्षुषा मां दृष्ट्वा विलोक्य हसितेन भाविनि मरणे उत्साहः उद्यमः सूचितः प्रकटितः । कथं त्वया न गतमिति वादिनं स्वस्यायं प्रति कस्यचिदुक्तिरियम् । शार्दूलविक्रीडितं वृत्तम् ॥ १० ॥

धीरमिति । निशीथे अर्द्धरात्रे, अर्द्धरात्रनिशीथौ द्वावित्यमरः । वारि किरतः वर्षतः वारिधरस्य मेघस्य धीरं गम्भीरं ध्वनिं श्रुत्वा विरहिणीं बालां मुग्धां कान्तां चिरं बहुक्षणं ध्यायता चिन्तयता अतएव दीर्घः उच्छ्वासः निःश्वासो यत्र तत् यथा तथा उद्गच्छता अध्वन्येन पथिकेन केनचित् क्वचिदपि ग्रामे क्षतावस्थेति भावः अखिलां सकलां रात्रिं विमुक्तकण्ठम् उच्चैरित्यर्थः तथा क्रन्दितं रुदितं यथा ग्रामीणैः तद्ग्रामवासिभिरित्यर्थः व्रजतः गच्छतः पथिकस्येति भावः जनस्य ग्रामे तस्मिन्निति शेषः वसतिः निषिद्धा ।

कथमपि सखि ! क्रीडाकोपाद् व्रजेति मयोदिते
कठिनहृदयस्त्यक्त्वा शय्यां बलान्नत एव सः ।
इति सरभसं भ्रस्तप्रेम्णि व्यपेतघृणे जने
पुनरपि हृतव्रीडं चेतः प्रयाति करोमि किम् ॥ १२ ॥
दम्पत्योर्निशि जल्पतोर्हठशुकेनाकर्णितं यद्वच-
स्तत् प्रातर्गुरुसन्निधौ निगदतस्तस्योपहारं वधूः ।
कर्णालङ्कृतिपद्मरागशकलं बिम्बस्य चञ्चूपुट
व्रीड़ार्ता प्रकरोति दाड़िमफलव्याजेन वाग्बन्धनम् ॥१३॥

अध्वन्यानां रोदनेनाकाकं निद्राव्याघातः स्यादिति तदुपायवादिभिः अध्वन्यानावाप्त्यो न दीयते इति भावः । मार्दूलविक्रीडितं वृत्तम् ॥ ११ ॥

कथमिति । हे सखि ! कथमपि कुतश्चिदपि क्रीडाकोपात् सुरतापराधादिति भावः व्रज गच्छ दूरीभवेति भावः इति मयि उदिते उक्ते सति कठिनहृदयः निर्दयचित्तः सः कान्त इति शेषः शय्यां त्यक्त्वा बलात् बलमाश्रित्येत्यर्थः गत एव । इतोत्थं व्यपेतघृणे निर्घृणे निर्दये इत्यर्थः सरभसं सवेगं, रभसो वेगहर्षयोरित्यमरः । भ्रस्तप्रेम्णि त्यक्तप्रणये जने हृतव्रीडं निर्लज्जं चेतः पुनरपि प्रयाति गच्छति किं करोमि ? हरिणीवृत्तम् ॥ १२ ॥

दम्पत्योरिति । हठशुकेन हठपालितशुकपक्षिणा निशि जल्पतोः अन्योन्यमालपतोः दम्पत्योः स्त्रीपुंसयोः यत् वचः आकर्णितं श्रुतं वधूजाया व्रीड़ार्ता लज्जातुरा सती गुरूणां सन्निधौ प्रातः तत् वचः निगदतः वदतः तस्य शुकस्य चञ्चूपुटे कर्णालङ्कृतिः कर्णभूषणं पद्मरागशकलं दाड़िमफलव्याजेन दाड़िमफलमिषेणेति उपहारं बिम्बस्य दत्त्वा वाग्बन्धनं प्रकरोति प्रकर्षेण वाचं बध्नातीत्यर्थः । मार्दूलविक्रीड़ितं वृत्तम् ॥ १३ ॥

अज्ञानेन पराङ्मुखीं परिभवादाश्लिष्य मां दुःखितां
किं लब्धं चटुल ! त्वयेह नयता सौभाग्यमेतां दृशाम् ।
पश्यैतद्दयिताकुचव्यतिकरोन्मृष्टाङ्गरागारुणं
वक्त्रस्ते मलतैलपङ्कयवलैर्वेणीपदैरङ्कितम् ॥ १४ ॥
एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद् दूरत-
स्ताम्बूलानयनच्छलेन रभसाश्लेषोऽपि संविघ्नितः ।
आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्यान्तिके
कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः ॥१५॥

अज्ञानेनेति । हे चटुल ! धूर्त ! परिभवात् अवमाननात् पराङ्मुखीं सुखं पराक्त्य स्थितामित्यर्थः दुःखितां मां अज्ञानेन समेति भावः आश्लिष्य आलिङ्ग्य एतां दृशां दुर्दृशामिति यावत् सौभाग्यं नयता प्रापयता त्वया इह मदालिङ्गने किं सुखमिति शेषः लब्धं प्राप्तम् ? एतत् दयितायाः प्रियायाः मत्सपत्न्याः वाराङ्गनाया वा कुचव्यतिकरेण स्तनसङ्गेन उन्मृष्टः अवलुप्तः यः अङ्गरागः तदीय इति भावः तेन अरुणं रक्तम् अलङ्कृतमिति भावः ते तव वक्त्रः मलतैलपङ्कयवलैः मलिनतैलरसेन चित्रितैः मलिनतैलाक्तैरिति यावत् वेणीपदैः केशस्थानैः केशसङ्कैरिति यावत् अङ्कितं चिह्नितं पश्य अवलोकय । खण्डितायाः उक्तिरियम् । शार्दूलविक्रीडितं वृत्तम् ॥ १४ ॥

एकत्रेति । दूरतः दूरात् प्रत्युद्गमात् आसनादुत्थानादित्यर्थः एकत्र एकस्मिन् स्थाने आसने एकस्मिन्निति भावः संस्थितिः उपवेशनं परिहृता त्यक्ता, ताम्बूलस्य आनयनच्छलेन रभसाश्लेषः सहसालिङ्गनमपि संविघ्नितः परिहृत इति यावत् आन्तिके समीपे परिजनं दासादिकं व्यापारयन्त्या प्रेषयन्त्या सत्या आलापः अपि न मिश्रितः अतः चतुरया नार्या उपचारतः बाह्यपरिचर्ययेत्यर्थः कान्तं प्रति कोपः कृतार्थीकृतः सफलीकृतः । शार्दूलविक्रीडितं वृत्तम् ॥ १५ ॥

दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादराद्
एकस्या नयने पिधाय विहितक्रीडानुबन्धच्छलः ।
ईषद्वक्रिमकन्धरः सपुलकः प्रेमोल्लसन्मानसाम्
अन्तर्हासलसत्कपोलफलकां धूर्त्तोऽपरां चुम्बति ॥ १६ ॥
चरणपतनप्रत्याख्यानात् प्रसादपराङ्मुखे
निभृतकितवाचारेत्युक्त्वा रुषा परुषीकृते ।
व्रजति रमणे निःस्वस्योच्चैः स्तनस्थितहस्तया
नयनसलिलच्छन्ना दृष्टिः सखीषु निवेशिता ॥ १७ ॥

दृष्ट्वेति । धूर्त्तः कश्चिदिति शेषः एकस्मिन् आसने संस्थिते आसीने प्रियतमे कान्ते दृष्ट्वा पश्चात् पृष्ठभागेनोपेत्य उपगम्य आदरात् एकस्याः कान्तायाः नयने पिधाय हस्ताभ्यामाच्छाद्येत्यर्थः विहितं कृत क्रीडायाः अनुबन्धे अनुसरणे छलं येन तथाभूतः ईषत् अल्पं वक्रिमा वक्रत्वं यस्याः तथाभूता कन्धरा ग्रीवा यस्य सोक्तः सपुलकः रोमाञ्चिताङ्गः सन् प्रेम्णा उल्लसत् विकसत् मानसं यस्यास्तथाभूताम् अन्तर्हासेन लसत् विकसत् कपोलफलकं गण्डभागः यस्यास्तादृशीम् अपरां कान्तां चुम्बति । शार्दूलविक्रीडितं वृत्तम् ॥ १६ ॥

चरणेति । हे निभृतकितवाचार ! गूढकपटाचार ! इति उक्त्वा चरणयोः पतनं तत्रापि प्रत्याख्यानं निराकरणं तस्मात् हेतोः रुषा कोपेन परुषीकृते कठिनीकृते अतएव प्रसादपराङ्मुखे अनुग्रहविमुखे इत्यर्थः रमणे कान्ते व्रजति गच्छति सति स्तने स्थितः हस्तः यस्याः तथाभूतया सत्या कान्तेति शेषः उच्चैः निःस्वस्य सखीषु नयनसलिलैः अश्रुभिः छन्ना दृष्टिः निवेशिता निहिता । स्तनस्थितहस्तत्वेनाहं युवतिः, युवत्याश्च मम कान्तविरहो दुःसह इत्यायत्तेन सख्यः निवार्य्यतामयमिति सूचितमिति भावः । हरिणीवृत्तम् ॥ १७ ॥

काञ्च्या गाढ़तरावरुद्धवसनप्रान्ता किमर्थं पुनः
मुग्धाक्षी स्वपितीति तत्परिजनं स्वैरं प्रिये पृच्छति ।
मातः ! स्वप्नमपीह वारयति मामित्याहितक्रोधया
पर्यस्य स्वपिति च्छलेन शयने दत्तोऽवकाशस्तया ॥ १८ ॥
एकस्मिन् शयने पराङ्मुखतया वीतोत्तरं ताम्यतो-
रन्योन्यस्य हृदि स्थितेऽप्यनुनये संरचतोर्गौरवम् ।
दम्पत्योः शनकैरपाङ्गवलनान्मिश्रीभवच्चक्षुषो-
र्भग्नो मानकलिः सहासरभसं व्यासक्तकण्ठग्रहः ॥१९॥

काञ्च्येति । मुग्धाक्षी वामनयना इयं काञ्च्या रशनया गाढ़तरं दृढ़तरम् अवरुद्धं संरुद्धं कथमपि शिथिलयितुं न पार्यते इति धियेति भावः वसनप्रान्तं वस्त्राञ्चलं यया तथाभूता सती किमर्थं पुनः स्वपिति निद्रातीति प्रिये कान्ते स्वैरं मन्दं यथा तथा तस्याः परिजनं दास्यादिकमित्यर्थः पृच्छति सति, मातः ! इह स्वप्नमपि मां वारयति निषेधति इति आहितक्रोधया कृतकोपया तया कान्तया पर्यस्य विपर्यस्तीभूयेत्यर्थः छलेन स्वपिहि इत्युक्त्वा शयने शय्यायाम् अवकाशः स्थानं दत्तः कान्तायेति शेषः । शार्दूलविक्रीडितं वृत्तम् ॥ १८ ॥

एकस्मिन्निति । एकस्मिन् शयने शय्यायां पराङ्मुखतया वैमुख्येन वीतोत्तरं प्रत्युत्तररहितं यथा तथा ताम्यतोः क्लिश्यतोः अन्योन्यस्य परस्परस्य अनुनये अनुनयेच्छायामिति यावत् हृदि स्थितेऽपि गौरवं मानं संरचतोः दम्पत्योः शनकैः मन्दं यथा तथा अपाङ्गवलनात् नेत्रान्तसञ्चालनात् मिश्रीभवत् सम्मिलत् चक्षुः ययोः तथाभूतयोः सतोः सहासरभसं सस्मितहर्षं यथा तथा व्यासक्तः संसक्तः कण्ठग्रहः कण्ठालिङ्गनं यत्र तथाभूतः मानकलिः प्रणयकलहः भग्नः अवसितः गत इति यावत् । शार्दूलविक्रीडितं वृत्तम् ॥१९॥

पश्यामो मयि किं प्रपद्यत इति स्थैर्यं मयालम्बितं
किं मामालपतीत्ययं खलु शठः कोपस्तयाश्रयितः ।
इत्यन्योन्यविलक्षदृष्टिचतुरे तस्मिन्नवस्थान्तरे
सव्याजं हसितं मया धृतिहरो बाष्पस्तु मुक्तस्तया ॥२०॥

परिम्लाने माने मुखशशिनि तस्याः करधृते
मयि क्षीणोपाये प्रणिपतनमात्रैकशरणे ।
तया पक्ष्मप्रान्तव्रजपुटनिरुद्धेन सहसा
प्रसादो बाष्पेण स्तनतटविशीर्णेन कथितः ॥ २१ ॥

पश्याम इति । मयि किं कथं इदं प्रपद्यते आचरति तत् पश्यामः इति धिक्येति शेषः मया स्थैर्यं मौनमिति भावः आलम्बितं गृहीतम् । तथापि अयं शठः धूर्त्तः मां किम् आलपतीति कोपः आश्रितः अवलम्बितः खलु । इतीत्थम् अन्योन्यस्मिन् विलक्षा सलज्जा या दृष्टिः तया चतुरे सुभगे तस्मिन् अवस्थान्तरे अवसरे इत्यर्थः मया सव्याजं सच्छलं किमपि छलमाश्रित्येत्यर्थः हसितं, तया तु धृतिहरः धैर्यध्वंसी बाष्पः अश्रुजलं मुक्तः । तथा हसितं येन मम धैर्यच्युतिः स्यादिति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ २० ॥

परिम्लाने इति । माने प्रणयकोपे परिम्लाने परितः म्लानिं गते विगते इति भावः तस्याः मुखशशिनि वदनचन्द्रे करधृते हस्तनिहिते, क्षीणाः क्षयं प्राप्ताः उपायाः सामादयः यस्य तादृशे । उक्तञ्च दर्पणे । साम भेदोऽथ दानञ्च नत्वुपेक्षे रसान्तरम् । तद्भङ्गाय प्रतिः कुर्यात् षडुपायानिति क्रमात् । तत्र प्रियवचः सामेत्यादि । प्रणिपतनमात्र पादयोः पतनमेव एकं शरणं गतिः यस्य तथाभूते चरणयोः प्रणते पतीति यावत् तया कान्तया सहसा पक्ष्मणां नेत्रलोम्नां प्रान्तव्रजाः अग्रसमूहाः एव पुटानि आवरणानि तैः निरुद्धेन अवरुद्धेन निःसृतेनेति भावः स्तनतटयोः विशीर्णेन चूर्णितेन स्तनयोः काठिन्यादि-

तस्याः सान्द्रविलेपनस्तनतटप्रश्लेषमुद्राङ्कितं
किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते ।
इत्युक्ते क्व तदित्युदीर्य सहसा तत् सम्भ्रमार्ष्टुं मया
साश्लिष्टा रभसेन तत्सुखवशात् तन्वग्रापि तद्विस्मृतम् ॥२२॥
त्वं मुग्धाक्षि ! विनैव कञ्चुलिकया धत्से मनोहारिणीं
लक्ष्मीमित्यभिधायिनि प्रियतमे तद्दोटिकासंस्पृशि ।
ग्रथ्योपान्तनिविष्टसस्मितमुखीनेत्रोत्सवानन्दितो
निर्यातः ग्रनकैरलीकवचनोपन्यासमालीजनः ॥ २३ ॥

ग्रथादिति भावः वाष्पेण ग्रश्रुणा प्रसादः प्रसन्नता ग्रङ्कितः सूचितः । ग्रिखरिणीवृत्तम् ॥ २१ ॥

तस्या इति । तस्याः मत्सपत्न्याः परकीयाया वा सान्द्रं घनं विलेपनम् अगुरागो ययोः तथाभूतयोः स्तनतटयोः प्रश्लेषेण ग्राश्लिङ्गनेन मुद्राङ्कितं मुद्रितमित्यर्थः वक्षः चरणयोः ग्रानतिव्यतिकरव्याजेन प्रणतिक्रियाच्छलेन किं कथं गोपाय्यते ? इति उक्ते सति मया क्व तत् इत्युदीर्य उक्त्वा सहसा तत् चिह्नं सम्भ्रमार्ष्टुम् ग्रपनेतुं रभसेन वेगेन वा ग्राश्लिष्टा ग्राश्लिङ्गिता, तन्वग्रापि तया तत्सुखवशात् तदाश्लिङ्गनानन्दवशात् तत् चिह्नं विस्मृतम् । शार्दूलविक्रीडितं वृत्तम् ॥२२॥

त्वमिति । हे मुग्धाक्षि ! चारुलोचने ! त्वं कञ्चुलिकया स्तनावरणविशेषेण विनैव मनोहारिणीं लक्ष्मीं श्रियं धत्से धारयसि इति ग्रभिधायिनि वादिनि प्रियतमे तस्याः कञ्चुलिकायाः दोटिकां ग्रान्तं संस्पृशतीति तथोक्ते सति निष्कासनार्थमिति भावः ग्रथ्यायाः उपान्ते निविष्टायाः स्थितायाः सस्मितमुखीनां कान्तायाः इति भावः नेत्रोत्सवेन नयनसुखेन ग्रानन्दितः हृष्टः ग्रालीजनः सखीगणः ग्रनकैः क्रमेण ग्रलीकवचनानां मृषावचनानाम् उपन्यासः प्रस्तावः यस्मिन् तत् यथा तथा निर्यातः निर्गतः ग्रासभवनादिति शेषः ।

भ्रूभङ्गे रचितेऽपि दृष्टिरधिकं सोत्कण्ठमुद्वीक्षते
कार्कश्यं गमितेऽपि चेतसि तनू रोमाञ्चमालम्बते ।
रुद्धायामपि वाचि सस्मितमिदं दग्धाननं जायते
दृष्टे निर्वहणं भविष्यति कथं मानस्य तस्मिन् जने ॥ २४ ॥
कान्ते ! कत्यपि वासराणि गमय त्वं मीलयित्वा दृशौ
स्वस्ति स्वस्ति निमीलयामि नयने यावन्न शून्या दिशः ।
आयाता वयमागमिष्यसि सुहृद्वर्गस्य भाग्योदयैः
सन्देशो वद कस्तवाभिलषितस्तीर्थेषु तोयाञ्जलिः ॥२५॥

सुरतप्रक्रमोऽयमिति बुद्धा प्रस्थित इति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ २३ ॥

भ्रूभङ्गे इति । भ्रुवोर्भङ्गे कौटिल्ये रचितेऽपि दृष्टिः अधिकं सोत्कण्ठत्व औत्सुक्यसहितं यथा तथा उद्वीक्षते सदृष्णम् अवलोकयति । चेतसि मनसि कार्कश्यं काठिन्यं गमिते नीतेऽपि तनुः शरीरं रोमाञ्चम् आलम्बते आश्रयति । वाचि रुद्धायामपि संयतायामपि इदं दग्धाननं सस्मितं जायते । अतः तस्मिन् जने दृष्टे सति मानस्य निर्वहणं रक्षणमिति यावत् कथं केन प्रकारेण भविष्यति ? कथं त्वया मानो न कृत इतिवादिनीं सखीं प्रति नायिकाया उक्तिरियम् । शार्दूलविक्रीडितं वृत्तम् ॥ २४ ॥

कान्ते इति । हे कान्ते ! त्वं दृशौ नयने मीलयित्वा सुदृयित्वा कति अपि वासराणि दिवसान् गमय अतिवाहय, स्वस्ति स्वस्ति शुभमस्तु शुभमस्तु, यावत् दिशः शून्याः न भवन्तीति शेषः, तावत् नयने निमीलयामि, यदा तवादर्शनेन दिक् शून्येव भविष्यति तदैव नयने निमीलयामि निरतिशयं मीलयामीत्यर्थः मरणमेवेति भावः । वयम् आयाताः आगतप्राया एव । सुहृद्वर्गस्य भाग्योदयैः सङ्केत शेषः आगमिष्यसि तवागमनं सुहृदां सौभाग्याय भविष्यतीत्यर्थः । आगमिष्यतीति पाठे

उरसि निहितस्तारो हारः कृता जघने घने
कलकलवती काञ्ची पादौ क्वणन्मणिनूपुरौ ।
प्रियमभिसरस्येवं मुग्धे ! समाहतडिण्डिमा
यदि किमधिकत्रासोत्कम्पं दिशः समुदीक्षसे ॥ २८ ॥
प्रातः प्रातरुपागतेन जनिता निर्निद्रता चक्षुषो-
र्मन्दायां मयि गौरवव्यपगमादुत्पादितं लाघवम् ।
किं मुग्धेन मया कृतं रमण ! धीर्मुक्ता त्वया गम्यतां
दुःस्थं तिष्ठसि यच्च पथ्यमधुना कर्तास्मि तत् श्रोष्यसि॥२९॥

चपले नः अस्माकं हृतजीविते गते का पीडा ? नैव काचित् पीडेत्यर्थः । प्राणान् त्यक्ष्यामीति भावः । हरिणीवृत्तम् ॥ २७ ॥

उरसीति । हे मुग्धे ! सुन्दरि ! उरसि वक्षसि तारो महान् हारः निहितः धृतः । घने सान्द्रे पूर्णे इति यावत् जघने कटि-पुरोभागे कलकलवती क्वणन्तीति भावः काञ्ची रशना कृता धृता । पादौ चरणौ क्वणन् क्वनन् मणिनूपुरः ययोः तादृशौ । यदि एवम् इत्थं समाहतः सम्ताडितः डिण्डिमः वाद्यभेदो यया तथाभूता सती प्रियं कान्तम् अभिसरसि अभिमच्छसि, तदा किं कथम् अधिकः त्रासेन भयेन उत्कम्पः यस्मिन् तत् यथा तथा दिशः समुदीक्षसे सम्यक् अवलोकयसि ? । हरिणीवृत्तम् ॥ २८ ॥

प्रातरिति । प्रातः प्रातः प्रतिप्रभातम् उपागतेन उपस्थितेन अन्याभङ्गेन रजनीसतिवाञ्छेति भावः चक्षुषोः निर्निद्रता निद्रा-राहित्यं जनिता उत्पादिता रजन्यां कदा प्रियो मे आयातीति धिया सर्वासु रात्रिषु मया जागरित्वैव काली नीयते इति भावः । मन्दायां दुर्भगायां मयि गौरवस्य व्यपगमात् भङ्गात् लाघवम् उत्-पादितम् । मुग्धेन मूढेन मया किं कृतं तव अप्रियमिति शेषः । हे रमण ! हे कान्त ! त्वया धीर्बुद्धिः मुक्ता त्यक्ता निर्बोधोऽसि

सा बाला वयमप्रगल्भमनसः, सा स्त्री वयं कातराः,
सा पीनोन्नतिमत् पयोधरयुगं धत्ते, सखेदा वयम् ।
साक्रान्ता जघनस्थलेन गुरुणा, गन्तुं न शक्ता वयं
दोषैरन्यजनाश्रितैरपटवो जाताः स्म इत्यद्भुतम् ॥ ३० ॥
प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं
धृत्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः ।

स्वास्थ्यतमिति भावः, तत् गम्यतां त्वया न मे प्रयोजनमिति भावः । दुःस्थं यथा तथा तिष्ठसि मां विनेति शेषः । अधुना यत् पथ्यं हितं ममेति शेषः तत् कर्त्तास्मि करिष्यामि तच्च श्रोष्यसि । त्वां विनाहं प्राणान् त्यक्ष्यामीति त्वया श्रोतव्यमिति भावः । दृष्यत्योक्तिप्रत्युक्ती । शार्दूलविक्रीड़ितं वृत्तम् ॥ २९ ॥

सेति । सा कान्ता बाला सुग्धा, वयम् अप्रगल्भमनसः विशुग्धचित्ताः, बालाया एव विशुग्धतोचिता अस्माकन्तु तद्वैपरीत्यमुचितमेवेति भावः । सा स्त्री, वयं कातराः व्याकुलाः, स्त्रीष्वामेव कातर्य्यं स्वाभाविकं पुंसान्तु तदन्यथेति स्थितौ अस्माकं तद्वैपरीत्यमिति भावः । सा पीनोन्नतिमत् पीवरसुन्नतञ्च पयोधरयुगं स्तनयुगलं धत्ते, वयन्तु सखेदाः आर्त्ताः, दुःखहस्तुधारिण मेव खेद उचित इति भावः । सा गुरुणा दुर्व्वहेण जघनस्थलेन आक्रान्ता, वयन्तु गन्तुं न शक्ताः, गुरुभारवाहिनामेव गमने असामर्थ्यमिति भावः । अतः अन्यजनाश्रितैः दोषैः अपटवः अक्षमाः जाता इति अद्भुतम् आश्चर्य्यम् । अत्रैकस्यैव कारणस्यापरस्यैव कार्य्यस्य सद्भावात् असङ्गतिरलङ्कारः । तदुक्तं दर्पणे, कार्य्यकारणयोर्भिन्नदेशतायामसङ्गतिरिति । शार्दूलविक्रीड़ितं वृत्तम् । सखायं प्रति कस्यचिदुक्तिः ॥ ३० ॥

प्रस्थानमिति । प्रियतमे कान्ते यातुं देशान्तरं गन्तुमित्यर्थः निश्चितचेतसि निर्द्धारितमनसि सति वलयैः करभूषणविशेषैः प्रस्थानं

यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता
गन्तव्ये सति जीवित ! प्रियसुहृत्सार्थः किमु त्यज्यते ॥२१॥
सन्दष्टाधरपल्लवा सचकित हस्ताग्रमाधुन्वती
मामामुञ्च शठेति कोपवचनैरानर्तितभ्रूलता ।
श्रीकाराञ्चितलोचना सरभसं वैयुब्धिता मानिनी
प्राप्तं तैरमृतं सुधैव मथितो मूढ़ैः सुरैः सागरः ॥ २२ ॥

क्षतं चिन्तया शरीरकाश्र्यात् क्षत्तात् वलयभ्रंश इति भावः, प्रियसखैः सततसङ्गित्वात् प्रियवस्तुभिरिति भावः अस्रैः वाष्पैः अजस्रं सततं गतं पतितं चलितमिति यावत्, क्षत्या सन्तोषेण क्षणमपि न व्यासितं नोपरिष्टं न स्थितमित्यर्थः, चित्तेन मनसा पुरः अग्रतः प्रियतमस्येति भावः गन्तुं व्यवसितम् उद्यतम् । (किं बहुना) सर्वे सदाश्रिता इति भावः समं युगपत् प्रियेण सह वा प्रस्थिताः चलिताः । हे जीवित ! गन्तव्ये सति यदा गमनं तव काङ्क्षन्ति समये निश्चितं तदेति भावः प्रियसुहृदां सार्थः समूहः पूर्वोक्तरूप इति भावः किमु कथं त्यज्यते ? सङ्गित्यागो नोचित इति त्वमपि शीघ्रमेतैः सह गच्छेति भावः । शार्दूलविक्रीडितं वृत्तम् । भाविनं पत्युः प्रवासमाशङ्कमानायाः कस्याश्चिदुक्तिः ॥ २१ ॥

सन्दष्टेति । सचकितं यथा भवति हस्ताग्रं प्रियस्य सङ्गेन चुम्बनमिति भावः सन्दष्टः अधरपल्लवः यया तादृशी हस्ताग्रम् आधुन्वती कम्पयन्ती हे शठ ! मां मुञ्च सम्यक् त्यज इति कोपवचनैः आनर्तिता सञ्चालिता भ्रूलता यया तथाविधा श्रीकारेण चञ्चिते शोभिते लोचने यया तथाविधा मानिनी मानवती बाला वैः सरभसं सवेगं च प्राप्तम्, तैः अमृतं प्राप्तम् आस्वादितम् । मूढ़ैः निर्बोधैः सुरैः देवैः सागरः सुधैव इत्थमेव मथितः विलोड़ितः अमृतलाभायेति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ २२ ॥

सुप्तोऽयं सखि ! सुप्यतामिति गताः सख्यस्ततोऽनन्तरं
प्रेमावासितया मया सरलया न्यस्तं मुखं तन्मुखे ।
ज्ञातेऽलीकनिमीलने नयनयोर्धूर्तस्य रोमाञ्चतो
लज्जासीन्मम तेन साप्यपहृता तत्कालयोग्यैः क्रमैः ॥३३॥
कोपो यत्र भ्रुकुटिरचना निग्रहो यत्र मौनं
यत्रान्योन्यस्मितमनुनयो यत्र दृष्टिः प्रसादः ।
तस्य प्रेम्णस्तदिदमधुना वैषम्यं पश्य जातं
त्वं पादान्ते लुठसि न हि मे मन्युमोचः खलायाः ॥३४॥

सुप्त इति । हे सखि ! अयं कान्त इति शेषः सुप्तः निद्रितः, सुप्यतां त्वयेति शेषः इति उक्त्वेति शेषः सख्यः गताः प्रस्थिताः । ततः सखीनां गमनात् अनन्तरं परं प्रेमावासितया प्रेमपूर्णया सरलया कपटाकपटधर्ममजानत्येति भावः मया तस्य मुखे मुखं न्यस्तम् अर्पितम् । ततः धूर्तस्य कान्तस्य रोमाञ्चतः सत्त्वधर्मेणेति भावः नयनयोः अलीकनिमीलने कपटसुप्तत्वे ज्ञाते सति मम लज्जा आसीत् तेन कान्तेन तत्कालयोग्यैः तत्कालोचितैः क्रमैः व्यापारैः आश्लेषादिभिरिति भावः सापि लज्जापि अपहृता चोरिता चकितेति यावत् । शार्दूलविक्रीडितं वृत्तम् । प्राकृतनायिकायाः कामपि प्रति रतिवृत्तकथनमिदम् ॥ ३३ ॥

कोप इति । यत्र प्रेम्णि भ्रुकुटिरचना न त्वन्यरूपाचरणमिति भावः कोपः कोपकार्यमित्यर्थः, यत्र प्रेम्णि मौनं तूष्णीम्भावः निग्रहः ताडनं, यत्र प्रेम्णि अन्योन्यस्य परस्परस्य स्मितं मन्दं हसितम् अनुनयः सान्त्वनं, यत्र प्रेम्णि दृष्टिः अवलोकनं प्रसादः प्रसन्नता, तस्य प्रेम्णः अधुना इदं वैषम्यं विकृतिः जातं तत् पश्य अवलोकय, त्वं पादान्ते चरणप्रान्ते लुठसि लुण्ठनं करोषि, किन्तु

सुतनु ! जहिहि कोपं पश्य पादानतं मां
न खलु तव कदाचित् कोप एवंविधोऽभूत् ।
इति निगदति नाथे तिर्य्यगामीलिताक्ष्या
नयनजलमनल्पं मुक्तमुक्तं न किञ्चित् ॥ २५ ॥
गाढ़ालिङ्गनवामनीकृतकुचप्रोद्भिन्नरोमोद्गमा
सान्द्रस्नेहरसातिरेकविगलत्-श्रीमन्नितम्बाम्बरा ।
मा मा मानद ! मास्तु मामलमिति व्यामोचरोल्लापिनी
सुप्ता किन्नु मृता नु किं मनसि मे लीना विलीना नु किम्२६

खलायाः दुष्टायाः मे मन्युमोक्षः कोपपरिहारः न हि नैव भवतीति शेषः । मन्दाक्रान्ताछन्दसम् । मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ गौ ययुग्मिति तल्लक्षणात् ॥ २४ ॥

सुतन्विति । हे सुतनु ! सुन्दरि ! कोपं जहिहि त्यज, मां पादानतं पश्य, कदाचित् तव एवंविधः कोपः न खलु नैव बभूत । नाथे इति निगदति वदति सति तिर्य्यक् तिरश्चीनं यथा तथा आमीलिते अक्षिणी यया तथाभूतया सत्या कान्तयेति शेषः अनल्पं प्रभूतं नयनजलं मुक्तं त्यक्तं न किञ्चित् उक्तम् । मालिनीछन्दसम् । ननमयययुतेयं मालिनी भोगिलोकैरिति तल्लक्षणात् ॥२५॥

गाढ़ालिङ्गनेति । गाढ़ालिङ्गनेन वामनीकृतयोः नतीकृतयोः कुचयोः स्तनयोः प्रोद्भिन्नः उद्भूतः रोमोद्गमः रोमहर्षोदयः यस्याः तथोक्ता सान्द्रः निविड़ः यः स्नेहरसः प्रेमावेशः तस्य अतिरेकात् आतिशय्यात् विगलत् स्खलत् श्रीमत् सुन्दरं नितम्बाम्बरं नितम्बवसनं यस्याः तथाभूता, हे मानद ! मां अलं अत्यर्थं मा मा मा अति अतिपीड़येति भावः इति व्यामं व्रीडं अल्पमित्यर्थः अक्षरं उल्लपतीति तथोक्ता मृदुमन्दभाषिण्योक्त्यर्थः सती सुप्ता किं नु वितर्के,

पटालग्ने पत्यौ नमयति मुखं जातविनया
हठाश्लेषं वाञ्छत्यपहरति गात्राणि निभृतम् ।
न शक्नोत्याख्यातुं स्मितमुखसखीदत्तनयना
क्रिया ताम्यत्यन्तः प्रथमपरिहासे नववधूः ॥ ३७ ॥
गते प्रेमाबन्धे प्रणयबहुमाने विगलिते
निवृत्ते सद्भावे जन इव जने गच्छति पुरः ।
तदुत्प्रेक्ष्योत्प्रेक्ष्य प्रियसखि । गतांस्तांश्च दिवसान्
न जाने को हेतुर्दलति शतधा यन्न हृदयम् ॥ ३८ ॥

वृता किं नु, मे मम मनसि लीना निमग्ना विलीना विलयं गता किं नु । शार्दूलविक्रीडितं वृत्तम् ॥ ३६ ॥

पटेति । नववधूः नवीना कान्ता पत्यौ पटालग्ने वसनं गृह्णतीति भावः जातविनया सविनयं यथा तथेति भावः मुखं नमयति, हठाश्लेषं सहसालिङ्गनं वाञ्छति आकाङ्क्षति सति निभृतं यथा तथा गात्राणि अपहरति अपसरतीति भावः । स्मितं सुखे यासां ताः स्मितसुख्यः याः सख्यः ताभिः तासु वा दत्तं नयनं यया यां यथा वा तथा सती आख्यातुं किमपि वक्तुमित्यर्थः न शक्नोति न पारयति । प्रथमपरिहासे कृते इति शेषः ह्रिया लज्जया अन्तः मनसि ताम्यति व्यथामनुभवतीत्यर्थः । शिखरिणीवृत्तम् ॥ ३७ ॥

गते इति । हे प्रियसखि ! प्रेमाबन्धे प्रणयबन्धने गते विनष्टे, प्रणयेन प्रेम्णा बहुमाने बहुगौरवे विगलिते विच्युते, सद्भावे वात्सल्ये निवृत्ते, जन इव साधारणजन इव जने पत्यावित्यर्थः पुरः अग्रतः गच्छति चलति सति तत् किमिदं वृत्तमित्यर्थः उत्प्रेक्ष्य तर्कयित्वा गतान् अतीतांश्च तान् प्रियजनसङ्गरहितानिति भावः दिवसान् उत्प्रेक्ष्य चिन्तयित्वा च हृदयं यत् शतधा न दलति

चिरविरहिणोरुत्कण्ठार्त्तिश्लथीकृतगात्रयो-
र्नवमिव जगज्जातं भूयश्चिरादभिनन्दतोः ।
कथमपि दिने दीर्घे याते निशामधिरूढयोः
प्रसरति कथा वल्ली यूनोर्यथा न तथा रतिः ॥ ३९ ॥
दीर्घा वन्दनमालिका विरचिता दृष्ट्यैव नेन्दीवरैः
पुष्पाणां प्रकरः स्मितेन रचितो नो कुन्दजात्यादिभिः ।
दत्तः खेदमुचा पयोधरयुगे नार्घो न कुम्भाम्भसा
स्वैरेवावयवैः प्रियस्य विगतस्तन्वा कृतं मङ्गलम् ॥ ४० ॥

न विदीर्यते, तत्र को हेतुः अस्तीति शेषः तत् न जाने । शिखरिणी-वृत्तम् ॥ ३८ ॥

चिरेति । चिरविरहिणोः दीर्घकालं विरहेण स्थितयोरित्यर्थः अतएव उत्कण्ठया उद्वेगेन या आर्त्तिः सन्तापः तया श्लथीकृतं शिथिलीकृतं क्लान्तमिति यावत् गात्रं ययोः तथाभूतयोः भूयः पुनः चिरात् दीर्घकालात् परमित्यर्थः नवमिव जगत् जातम् अभिनन्दतोः प्रशंसतोः मिलने नेति भावः कथमपि अतिकष्टेन दीर्घे दिने याते अतिक्रान्ते सति निशां रजनीम् अधिरूढयोः प्राप्तयोरिति यावत् यूनोः तरुणयोः यथा वल्ली विविधा नानाविषयिणीति भावः कथा प्रसरति चलति, तथा रतिः सुरतं न प्रसरतीति शेषः । हरिणी-वृत्तम् ॥ ३९ ॥

दीर्घेति । दृष्ट्यैव दीर्घा महती वन्दनमालिका अभिनन्दनार्थमाल्य विरचिता कृता, इन्दीवरैः नीलोत्पलैर्न स्मितेन मन्दहासेन पुष्पाणां प्रकरः चयः गुच्छ इति यावत् उपहारत्वेन दीयमान इति भावः रचितः कुन्दजात्यादिभिः कुन्दकुसुमजातीकुसुमादिभिः नो रचितः इति शेषः । स्वेदमुचा घर्मवारिवर्षिणा पयोधरयुगेन स्तनयुगलेन अर्घ्यः दत्तः, कुम्भाम्भसा कलसोदकेन न । अतः तन्वा

कान्ते सागसि शायिते प्रियसखीवेशं विधायागते
भ्रान्त्यालिङ्ग्य मया रहस्यमुदितं तत्सङ्गमाकाङ्क्षया ।
मुग्धे ! दुष्करमेतदित्यतितरामुक्त्वा सहासं बलाद्
आलिङ्ग्य क्षलितास्मि तेन कितवेनाद्य प्रदोषागमे ॥ ४१ ॥
आशङ्क्य प्रणतिं पटान्तपिहितौ पादौ करोत्यादराद्
व्याजेनागतमाह्वणोति हसितं न स्पष्टमुद्दीक्षते ।
मय्यालापवति प्रतीपवचनं सख्या सहाभाषते
तस्यास्तिष्ठतु निर्भरप्रणयिता मानोऽपि रम्योदयः ॥ ४२ ॥

क्षणाङ्क्षा स्वैरेव निजैरेव अवयवैः विश्रतः भृत्यं प्रविश्रतः प्रियस्य सङ्गं साङ्गलिकाचार इत्यर्थः कृतम् अनुष्ठितम् । अत्र दृष्ट्यादिभिर्वन्दनमालिकादिरूपेणारोपस्य प्रकृते नायकसम्भावनादावुपयोगित्वात् अतत्त्याधिकरणः परिणामालङ्कारः । तदुक्तं दर्पणे, विषयात्मतयारोप्ये प्रकृतार्थोपयोगिनि परिणामो भवेत्तुल्यातत्त्याधिकरणो द्विधेति । शार्दूलविक्रीडितं वृत्तम् ॥ ४० ॥

कान्ते इति । आगते सागसि सापराधे कान्ते प्रियसखीवेशं विधाय कृत्वा शायिते कयाचिदिति शेषः भ्रान्त्या भ्रमेण मया आलिङ्ग्य प्रियसखीवेशं कान्तमिति शेषः तस्य कान्तस्य सङ्गमाकाङ्क्षया सङ्गत्यभिलाषेण रहस्यं गूढम् उदितम् उक्तं तत्सङ्गमाभिलाषित्वं प्रकटितमिति भावः । तेन कितवेन धूर्त्तेन कान्तेन हे मुग्धे ! एतत् अतितराम् अत्यर्थं दुष्करम् इति उक्त्वा कथयित्वा सहासं बलात् आलिङ्ग्य अद्य प्रदोषागमे रजन्यां क्षलितास्मि प्रतारितास्मि । शार्दूलविक्रीडितं वृत्तम् ॥ ४१ ॥

आशङ्क्येति । प्रणतिं मम चरणपातम् आशङ्क्य आदरात् यत्नात् पादौ चरणौ पटान्तपिहितौ वसनान्ताच्छादितौ करोति । आगतं हसितं हास्यं व्याजेन क्षलेन आह्वणोति गोपायति । स्पष्टं यथा

सा यावन्ति पदान्यलीकवचनैरालीजनैः शिक्षिता
तावन्त्येव कृतागसो द्रुततरं व्याहृत्य पत्युः पुरः।
प्रारब्धा पुरतो यथा मनसिजस्याज्ञा तथा वर्तितुं
प्रेम्णो मौग्ध्यविभूषणस्य सहजः कोऽप्येष कान्तः क्रमः॥४३

दूरादुत्सुकमागते विवलितं सभ्राम्यणि स्मारितं
संश्लिष्यत्यरुणं गृहीतवसने किञ्चिन्नतभ्रूलतम्।
मानिन्याश्चरणानतिव्यतिकरे वाष्पाम्बुपूर्णेक्षणं
चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि॥ ४४॥

तथा न उद्दीप्यते निरोध्यते। मयि आलापयति आलापं कुर्वति सति सख्या सह प्रतीपवचनं विपरीतवाक्यम् आभाषते कथयति। अतः तस्याः कान्तायाः निर्भरप्रणयिता प्रेमातिशय इत्यर्थः तिष्ठतु आस्तां, मानोऽपि रम्योदयः रमणीयः प्रतीयते इत्यर्थः। शार्दूलविक्रीडितं वृत्तम्॥ ४२॥

सेति। सा कान्ता अलीकवचनैः कृत्रिमवादिभिः आलीजनैः सखीजनैः यावन्ति पदानि वचनानीति यावत् शिक्षिता, तावन्त्येव न तु ततोऽधिकानि न्यूनानि वेति भावः पदानि कृतागसः कृतापराधस्य पत्युः स्वामिनः पुरः अग्रतः द्रुततरं सत्वरं व्याहृत्य उक्त्वा यथा मनसिजस्य कामस्य आज्ञा आदेशः यादृशः कामावेश इत्यर्थः पुरतः पत्युरग्रतः तथा वर्त्तितुं व्यवहर्त्तुं प्रारब्धा उपक्रान्तवती। मौग्ध्यं सुग्धता सारल्यमित्यर्थः विभूषणम् अलङ्कारः यस्य तादृशस्य प्रेम्णः सहजः स्वाभाविकः कोऽपि अनिर्वचनीयः एष कान्तः मनोहरः क्रमः पद्धतिरित्यर्थः। शार्दूलविक्रीडितं वृत्तम्॥ ४३॥

दूरादिति। मानिन्याः मानवत्याः नार्याः चक्षुः सागसि सापराधे प्रेयसि दूरात् आगते सति उत्सुकं यथा तथा विवलितं सभ्राम्यं भ्रमितम्। सभ्राम्यणि आलपति सति स्मारितं विस्मारितम्। संश्लिष्यति

अज्ञानामतितानवं कथमिदं कस्यश्च कस्मात् कुतो
मुग्धे ! पाण्डुकपोलमाननमिति प्राणेश्वरे पृच्छति ।
तन्वग्रा सर्वमिदं स्वभावजमिति व्याहृत्य पक्ष्मान्तर-
व्यापी वाष्पभरस्तया चलितया निःश्वस्य मुक्तोऽन्वतः ॥४५॥
पुरस्तन्वग्रा गोत्रस्खलनचकितोऽहं नतमुखः
प्रवृत्तो वैलक्ष्यात् किमपि लिखितुं दैवहतकः ।
स्फुटो रेखान्यासः कथमपि स तादृक् परिणतो
गता येन व्यक्तं पुनरवयवैः सैव तरुणी ॥ ४६ ॥

श्लिष्यति समाश्लिष्यति सति अरुणं रक्तम् । गृहीतवसने वसनं स्खलयतीत्यर्थः सति किञ्चित् ईषत् नता भूलता यस्य तत् । चरणयोः प्रणतिः प्रणिपातः व्यतिकरो व्यापारो यस्य तथाभूते सति वाष्पाम्बुपूर्णम् अश्रुपूर्णम् ईक्षणं दर्शनव्यापारो यस्य तादृशम् अतएव प्रपञ्चचतुरं विविधविलाससुभगं जातम् अहो आश्चर्यम् शार्दूलविक्रीडितं वृत्तम् ॥ ४४ ॥

अज्ञानामिति । हे मुग्धे ! सुन्दरि ! कथमिदम् अज्ञानाम् अतितानवम् अतिकार्श्यम् ? कस्माच्च कस्यः ? कुतः पाण्डुकपोलं पाण्डुरगण्डम् आननं मुखम् ? इति प्राणेश्वरे पृच्छति सति तया तन्वग्रा क्षणाग्रा सर्वमिदं स्वभावजं स्वाभाविकम् इति व्याहृत्य उक्त्वा निःश्वस्य दीर्घमिति भावः अन्यतः अन्यत्र चलितया चलन्त्या इत्यर्थः पक्ष्मान्तरव्यापी नेत्रलोमावरकः वाष्पभरः नेत्राम्बुनिचयः मुक्तः त्यक्तः । एतेन त्वद्विरहार्त्ताऽहमेतादृगवस्था जातास्मीति व्यज्यते । शार्दूलविक्रीडितं वृत्तम् ॥ ४५ ॥

पुर इति । तन्वग्राः क्षणाग्राः पुरः अग्रतः गोत्रस्खलनेन सहसा अन्याङ्गनानामोच्चारणेन चकितः शङ्कितः अहं वैलक्ष्यात् लज्जावशात् नतमुखः अधोवदनः सन् किमपि लिखितुं प्रवृत्तः प्रक्रान्तः ।

कठिनहृदये! मुञ्च भ्रान्तिं व्यलीककथाश्रितां
पिशुनवचनैर्दुःखं नेतुं न युक्तमिमं जनम्।
किमिदमथवा सत्यं मुग्धे! त्वया हि विनिश्चितं
यदभिरुचितं तन्मे कृत्वा प्रिये! सुखमास्यताम् ॥ ४७ ॥
मन्दं मुद्रितपांशवः परिपतज्झङ्कारभञ्जामरुद्-
वेगध्वस्तकुटीरकान्तरगतच्छिद्रेषु लब्धान्तराः।
कर्मव्यग्रकुटुम्बिनीकुचतटस्वेदच्छिदः प्राङ्मुखाः
प्रारम्भे निपतन्ति कन्दलदलोल्लासाः पयोबिन्दवः ॥ ४८ ॥

दैवकृतकात् दुर्दैवादित्यर्थः कथमपि स्फुटः स्पष्टः स तादृक् रेखान्यासः लेखाविन्यासः परिक्षतः पर्य्यवसितः येन पुनः व्यक्तस्फुटम् अवयवैः आकारैः सैव तरुणी मङ्क्ष्यतीति भावः गता आपतिता तन्मुखं तन्मुखात् इति शेषः। शिखरिणीवृत्तम् ॥ ४६ ॥

कठिनेति। हे कठिनहृदये। निष्ठुरचित्ते! व्यलीककथाश्रितां अप्रियकथाजनितां ऋषावाक्यजनितां वा भ्रान्तिं संभ्रममित्यर्थः मुञ्च त्यज। पिशुनानां दुर्जनानां वचनैः असत्यैरिति भावः इमं जनं दुःखं नेतुं न युक्तं नोचितम्। अथवा इदं किं त्वया सत्यं हि अवितथमेव विनिश्चितं निर्णीतम्? हे प्रिये! यत् अभिरुचितम् अभीष्टं तवेति शेषः तत् मे मम कृत्वा दत्त्वा विधायेति भावः सुखम् आस्यतां स्थीयताम्। शिखरिणीवृत्तम् ॥ ४७ ॥

मन्दमिति। प्राङ्मुखः वर्षर्तौः प्रारम्भे उपक्रमे मन्दम् अल्पं यथा तथा मुद्रिताः स्थगिताः पांशवः रजांसि यैः तथाभूताः परिपतत् उद्गच्छत् झङ्कारो यस्य तादृशस्य भञ्जामरुतः वेगेन ध्वस्तानां विगीर्णानां कुटीरकाणां क्षुद्रगृहाणाम् अन्तरगतानि मध्यगतानि यानि छिद्राणि विवराणि तेषु लब्धान्तराः लब्धप्रवेशाः कर्मसु व्यग्राः व्यस्ताः याः कुटुम्बिन्यः नार्य्यः तासां कुचतटयोः स्तनप्रदेशयोः

पीतसुधारकिरणो मधुनैव सार्द्धम्
अन्तः प्रविश्य चषके प्रतिविम्बवर्त्ती ।
मानान्धकारमपि मानवतीजनस्य
नूनं बिभेद यदसौ प्रससाद सद्यः ॥ ४९ ॥
नभसि जलदलक्ष्मीं सम्भृतां वीक्ष्य दिष्ट्या
प्रसरसि यदि कान्तेत्यर्द्धमुक्ता कथञ्चित् ।
मम पटमवलम्ब्य प्रोल्लिखन्ती धरित्रीं
तदनुकृतवती सा यत्र वाचो निवृत्ताः ॥ ५० ॥

खेदच्छिदः घर्मध्वंसिनः तथा कन्दलदनात् कदलीपत्राणि उल्लासयन्तीति तथोक्ताः पयोबिन्दवः दृष्टजलकणाः निपतन्ति । शार्दूलविक्रीड़ितं वृत्तम् ॥ ४८ ॥

पीत इति । यत् यदा असौ सुधारकिरणः प्रससाद प्रसादं नैर्मल्यमिति यावत् अगमत् तदा सद्यः तत्क्षणात् मानवतीजनस्य मानान्धकारमपि वाङ्मात्रान्धकारस्य किं वक्तव्यमिति भावः नूनं बिभेद दूरीचकार इति क्रोधादिति भावः चषके पानपात्रे अन्तः प्रविश्य प्रतिविम्बवर्त्ती छायया वर्त्तमानसुधारकिरणसुन्दरः मधुनैव मद्येनैव सार्द्धं सह पीतः अस्तः वर्षर्त्तुनेति कर्तृपदमूह्यम् । वर्षाणामतिशयेनान्धकारप्रियत्वात् अन्धकारध्वंसी अवसिति क्रोधादिव मधुनश्च छायासतीवोल्लासकत्वेन तेनैव सार्द्धं चन्द्रमसः पानमिति । अत्र प्रतीयमानोत्प्रेक्षा । तदुक्तं दर्पणे । भवेत् सम्भावने क्वापि प्रकृतस्य परात्मना । वाच्या प्रतीयमाना सेति । वसन्ततिलकं वृत्तम् । श्रेयं वसन्ततिलकं तभजा जगौ गः इति तल्लक्षणात् ॥ ४९ ॥

नभसीति । हे कान्ते ! नभसि आकाशे सम्भृतां जलदलक्ष्मीं मेघशोभां वीक्ष्य दृष्ट्या दिष्ट्या मम दुर्भाग्येनेति यावत् यदि यस्मिन् प्रसरसि ? कथञ्चित् कृच्छ्रेण इति अर्द्धम् उक्ता मम पटं वसनम्

दृयमसौ तरलायतलोचना गुरुसमुन्नतपीनपयोधरा ।
पृथुनितम्बभरालसगामिनी प्रियतमा मम जीवितहारिणी५१

सालक्तकेन नवपल्लवकोमलेन
पादेन नूपुरवता मदनालसेन ।
यस्ताड्यते दयितया प्रणयापराधात्
सोऽङ्गीकृतो भगवता मकरध्वजेन ॥ ५२ ॥

बाले ! नाथ ! विमुञ्च मानिनि ! रुषं, रोषान्मया किं कृतं,
खेदोऽस्मासु, न मेऽपराध्यति भवान् सर्वेऽपराधा मयि ।

अवलम्ब्य धरित्रीं भूमिं प्रोल्लिखन्ती सती यत्र वाचः निष्टप्ताः वाचां गतिर्नास्तीत्यर्थः तत् मरणमिति भावः अनुकृतवती कृतप्रायाभूदिति भावः । कथं त्वया न देशान्तरं गतमिति वादिनं कञ्चित् प्रति कथं गम्यत इति भङ्ग्योक्तिरियम् । मालिनीवृत्तम् । ननमयययुतेयं मालिनीभोगिलोकैरिति तल्लक्षणात् ॥ ५० ॥

दृयमिति । असौ तरलायतलोचना चञ्चलविस्तृतनयना गुरू सुदीर्घौ समुन्नतौ उन्नतौ पीनौ पीवरौ पयोधरौ स्तनौ यस्याः तथोक्ता पृथुनितम्बस्य स्थूलनितम्बस्य भरेण अतिशयेन अलसगामिनी जीवितहारिणी जीवनमोहिनी मम प्रियतमा दृयम् । द्रुतविलम्बितं वृत्तम् । द्रुतविलम्बितमाह नभौ भराविति तल्लक्षणात् ॥ ५१ ॥

सालक्तकेनेति । दयितया कान्तया यः जनः सालक्तकेन लाक्षारसरञ्जितेन नवपल्लववत् कोमलेन नूपुरवता नूपुरालङ्कृतेन मदनालसेन पादेन चरणेन प्रणयापराधात् ताड्यते पह्विपते, सः जनः भगवता सर्वशक्तिमता मकरध्वजेन कामेन अङ्गीकृतः स्वीकृतः स्वजनत्वेन गृहीत इत्यर्थः । वसन्ततिलकं वृत्तम् ॥ ५२ ॥

बाले इति । बाले ! मुग्धे ! नाथ ! हे मानिनि ! रुषं कोपं मुञ्च

तत् किं रोदिषि गद्गदेन वचसा ? कस्यापतो रुद्यते ?
मन्येतन्मम, का तवास्मि ? दयिता, नास्मीत्यतो रुद्यते ॥५३
नीत्वोच्चैर्विक्षिपन्तः क्षततुहिनकणासारसङ्गान् परागान्
कौन्दानानन्दितालीनतितरसुरभीन् भूरिशो दिङ्मुखेषु ।
एते ते कुङ्कुमाक्तस्तनकलसभराम्फालनादुच्छलन्तः
शीत्वा शीत्कारि वक्त्रं शिशुहरिणदृशां हैमना वान्ति वाताः ५४

व्याख्या । रोषात् कोपात् मया किं कृतम् ? । अस्मात् खेदः दुःखं कृत इति शेषः । भवान् मे वक्त्रं न अपराध्यति, सर्वे अपराधाः मयि सन्तीति शेषः, मयैव सर्वेऽपराधाः कृता इति भावः । तत् तदा किं कथं गद्गदेन अस्पष्टेनेति यावत् वचसा रोदिषि ? कस्य अपतः रुद्यते ? ममेति शेषः । नन्वु भो ! एतत् रोदनमिति भावः मम अपत इति शेषः । अस्मि अहं तव का ? दयिता प्रिया ममेति शेषः । नास्मि नाहं दयिता इत्यतः अस्मादेव कारणात् रुद्यते । दयितासि त्वं न मन्यसीति अहं रोदिमीति भावः । स्त्रीपुंसयोरुक्तिप्रत्युक्ती । शार्दूलविक्रीडितं वृत्तम् ॥ ५३ ॥

नीत्वेति । एते ते हैमनाः हैमन्ताः वाताः वायवः कृतः तुहिनकणानां शिशिरबिन्दूनाम् आसारैः धारासम्पातैः सङ्गः संसर्गः यैः तान् आनन्दिताः अलयः भ्रमराः यैः तथोक्तान् अतितरसुरभीन् अतिमात्रसौरभवतः कौन्दान् कुन्दकुसुमसम्बन्धिनः भूरिशः बहुनित्यर्थः परागान् नीत्वा गृहीत्वा दिङ्मुखेषु दिगन्तरेषु उच्चैः अतिमात्रं विक्षिपन्तः विस्तारयन्तः तथा शिशुहरिणदृशां बालहरिणाक्षीणां शीत्कारि वक्त्रं वदनं पीत्वा शीतार्त्तत्वादिति भावः कुङ्कुमाक्तयोः कुङ्कुमलिप्तयोः स्तनकलसयोः भरस्य उच्छ्रायस्य आस्फालनात् मर्दनादिति भावः उच्छलन्तः उल्लसन्तः इत्यर्थः सन्तः वान्ति वहन्ति । अत्र प्रस्तुतानां वायूनां कृष्णागुरुकुङ्कुमकर्पूरसमारोपात् समासोक्तिरलङ्कारः ।

श्रुत्वा तन्वा निशीथे नवघनरसितं विश्वथाङ्गं पतित्वा
शय्यायां भूमिपृष्ठे करतलहतया दुःखितालीजनेन ।
सोत्कण्ठं मुक्तकण्ठं कठिनकुचतटाघातशीर्णाश्रुबिन्दु
स्मृत्वा स्मृत्वा प्रियस्य स्खलितमृदुवचो रुद्यते पान्थवध्वा ॥५५

श्लिष्टः कण्ठे किमिति न मया मूढया प्राणनाथ-
श्चुम्बत्यस्मिन् वदनविधुतिः किं कृता किन्न दृष्टः ।
नोक्तः कस्मादिति नववधूचेष्टितं चिन्तयन्ती
पश्चात्तापं वहति तरुणी प्रेम्णि जाते रसज्ञा ॥ ५६ ॥

तदङ्गदर्पण । समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः । व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः इति । स्रग्धराहत्तम् । स्रग्धरेयं म्रभनैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयमिति तल्लक्षणात् ॥ ५४ ॥

श्रुत्वेति । तन्वा कृशाङ्गया पान्थवध्वा प्रोषितकामिन्या निशीथे अर्द्धरात्रे नवघनानां नवमेघानां रसितं गर्जितं श्रुत्वा विश्वथं विवशम् अङ्गं यस्य तत् यथा तथा शय्यायां तथा भूमिपृष्ठं पतित्वा दुःखितालीजनेन दुःखितसखीजनेन करतलेषु हतया सत्या प्रियस्य स्मृत्वा स्मृत्वा पुनः पुनः प्रियं स्मृत्वेत्यर्थः, कर्मणि षष्ठी । सोत्कण्ठम् उत्कण्ठासहितं मुक्तकण्ठं तारस्वरमित्यर्थः कठिनयोः कुचतटयोः स्तनयुगलयोः आघातेन आपातेन शीर्णाः श्लथिताः अश्रुबिन्दवः यस्मिन् तत् तथा स्खलितानि शोकावेगेनावरुद्धकण्ठतया अर्द्धोच्चारितानि मृदूनि कोमलानि वचांसि वाक्यानि विलापाक्षराणि यस्मिन् तद् यथा तथा रुद्यते । स्रग्धराहत्तम् ॥ ५५ ॥

श्लिष्ट इति । मूढया मन्दया मया प्राणनाथः किमिति कथं कण्ठे न श्लिष्टः नाश्लिङ्गितः ? अस्मिन् प्राणनाथे चुम्बति सति मया वदनविधुतिः मुख प्रसारणादि [illegible] किं कथं कृता ? किं कथं न दृष्टः न निरीक्षितः ? कस्मात्त्वं न उक्तः न आलपितः ? इतीति सर्वत्र

श्रुत्वा नामापि यस्य स्फुटघनपुलकं जायतेऽङ्गं समन्ताद्
दृष्ट्वा यस्याननेन्दुं भवति वपुरिदं चन्द्रकान्तानुकारि ।
तस्मिन्नागत्य कण्ठग्रहणसरभसस्थायिनि प्राणनाथे
भग्ना मानस्य चिन्ता भवति मम पुनर्वज्रमय्याः कदा नु ५७
रामाणां रमणीयवक्त्रयशिनः स्वेदोदबिन्दुद्युतो
व्यालोलालकवल्लरीं प्रचलयन् धुन्वन् नितम्बाम्बरम् ।
प्रातर्जाति मधौ प्रकामविकसद्राजीवराजीरजो-
जालामोदमनोहरो रतिरसग्लानिं हरन्मारुतः ॥ ५८ ॥

योक्तम् । इति इत्थं नवबधूवेषेण सुग्धत्वाद्व्याहर्तुं चिन्तयन्तीं प्रेमृणि जाते सति रसज्ञा रसिका सखी युवतिः पश्चात्तापं वक्ष्यति करोति । मन्दाक्रान्ताछन्दः ॥ ५६ ॥

श्रुत्वेति । यस्य नाम श्रुत्वापि अङ्गं समन्तात् सर्वतः स्फुटानि स्पष्टानि घनानि सान्द्राणि पुलकानि रोमाञ्चाः यस्मिन् तथाविधं जायते भवति, यस्य आननेन्दुं मुखचन्द्रं दृष्ट्वा इदं वपुः शरीरं चन्द्रकान्तं तदाख्यं मणिम् अनुकरोतीति तथोक्तं द्रवीभूतमित्यर्थः भवति, तस्मिन् प्राणनाथे आगत्य कण्ठग्रहणाय कण्ठालिङ्गनाय सरभसं सहर्षं सावेगं वा, रभसो वेगहर्षयोरित्यमरः । तिष्ठतीति तादृशे सति कदा वज्रमय्याः अतिनिष्ठुराया इति भावः मम मानस्य चिन्ता भग्ना भवति ? नु वितर्के । मानेन अवधीरितक्रान्तायाः पश्चात्ताप-वचनमिदम् । स्रग्धराछन्दः ॥ ५७ ॥

रामाणामिति । मधौ वसन्ते चैत्रे वा प्रकामं सम्यक् विकसन्तीनां राजीवराजीनां कमलचयानां रजोजालानाम् आमोदेन सौरभेण मनोहरः मारुतः वायुः प्रातः प्रभाते रामाणां कामिनीनां सुरतोत्थितानामिति भावः रसज्ञोयं वक्त्रं वदनमेव यशी चन्द्रः तस्य स्वेदोदबिन्दुभिः घर्मजलकणैः द्युतः आर्द्रीकृत इत्यर्थः तथा व्यालोलां

अङ्गं चन्दनपाण्डुपल्लवमृदुस्ताम्बूलताम्राधरो
धारायन्त्रजलाभिषेककलुषे धौताञ्जने लोचने ।
अन्तःपुष्पसुगन्धिरार्द्रकबरी सर्वाङ्गलग्नाम्बरं
रामाणां रमणीयतां विदधति ग्रीष्मापराह्णागमे ॥ ५८ ॥
वरमसौ दिवसो न पुनर्निशा ननु निशैव वरं न पुनर्दिवा ।
उभयमेतदुपैलयथवा त्वयं प्रियजनेन न यत्र समागमः ॥ ६० ॥

स्खलितानीति यावत् अमयतत्वादिति भावः अलकपल्लवीं चूर्णकुन्तल-सञ्जरीं प्रचलयन् कम्पयत् नितम्बाम्बरं नितम्बवसनं घृन्वत् चपलयन् तथा रतिरभस्खलितं सुरतरागभ्रमं हरत् ननु याति वर्तते । शार्दूल-विक्रीडितं वृत्तम् ॥ ५८ ॥

अङ्गमिति । ग्रीष्मस्य अपराह्णागमे दिवावसानसमये रामाणां रमणीनां चन्दनेन चन्दनविलेपनेन पाण्डु शुभ्रम् अङ्गं पल्लववत् मृदुः कोमलः ताम्बूलेन ताम्रः रक्तः अधरः, धारायन्त्रजलैर्यः अभिषेकः स्नानं तेन कलुषे आविले धौताञ्जने क्षालितकज्जले लोचने नयने, अन्तःपुष्पैः अन्तर्गतैः कुसुमैः सुगन्धिः आर्द्रकबरी स्तिमित-केशपाशः तथा सर्वाङ्गेषु लग्नं सक्तं जलार्द्रत्वादिति भावः अम्बरं वसनं सूक्ष्ममिति भावः एतानि रमणीयतां मनोहारित्वं विदधति जनयन्ति । शार्दूलविक्रीडितं वृत्तम् ॥ ५८ ॥

वरमिति । यत्र यस्मिन् यस्या वा दिवसे निशायां वा प्रियजनेन न समागमः न सम्मेलनम्, असौ दिवसः वरं मनाक्प्रिय इत्यर्थः निशा पुनः न, न वरमित्यर्थः, ननु अथवा निशैव वरं मनाक्प्रियेत्यर्थः, दिवा पुनः न, न वरमित्यर्थः आद्ये कार्यान्तरव्याकुलतया कथञ्चित् दिवसातिवाहनं रात्रिर्नितरां क्लेशकरीति द्वितीये निद्रया कथञ्चिच्छातिवाहनं दिवसे तु सर्वदा दर्शनाभिलाषेण क्लेशातिशय इति भावः । अथवा एतत् उभयं रात्रिन्दिवमित्यर्थः त्वयं नाथम्

लोलैर्लोचनवारिभिः सशपथैः पादप्रणामैः प्रियै-
रन्यास्ता विनिवारयन्ति कृपणाः प्राणेश्वरं प्रस्थितम् ।
पुण्याहं व्रज मङ्गलं सुदिवसं प्रातः प्रयातस्य ते
यत् स्नेहोचितमीहितं प्रियतम ! त्वं निर्गतः श्रोष्यसि ॥ ६१
लग्ना नांशुकपल्लवे भुजलता न द्वारदेशेऽर्पिता
नो वा पादतले तया निपतितं तिष्ठेति नोक्तं वचः ।
काले केवलमम्बुदातिमलिने गन्तुं प्रवृत्तः पथः
तन्वा वाष्पजलौघकल्पितनदीपूरेण बद्धः प्रियः ॥ ६२ ॥

उपैतु प्राप्नोतु उभयोरपि समक्रियाकरत्वादिति भावः । द्रुतविलम्बितं वृत्तम् ॥ ६० ॥

लोलैरिति । हे प्रियतम ! याः नार्यः प्रस्थितं प्रयाणोद्यतमित्यर्थः प्राणेश्वरं लोलैः स्खलद्भिरिति यावत् लोचनवारिभिः अश्रुभिः, प्रियैः प्रीतिजनकैः सशपथैः दिव्यसहितैः पादप्रणामैः चरणपतनैः विनिवारयन्ति, कृपणाः दीनाः ताः अन्याः । अहं पुण्या भाग्यवतीत्यर्थः, व्रज गच्छ देशान्तरमिति शेषः, प्रातः प्रयातस्य ते तव मङ्गलं शुभं सुदिवसं शोभनं दिनं भवत्विति शेषः स्नेहोचितं प्रणयोचितम् ईहितं चेष्टितं यत् मयेति शेषः तत् करिष्यसीति भावः निर्गतः त्वं श्रोष्यसि । तव विरहे अहं प्राणान् त्यक्ष्यामीति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ६१ ॥

लग्नेति । तया तन्वा कृशाङ्ग्या अंशुकपल्लवे वसनाञ्चले प्रियस्येति शेषः न लग्ना वसनं दृष्ट्वा नाकृष्टमित्यर्थः । द्वारदेशे भुजलता न अर्पिता प्रियस्य निर्गमबाधायेति भावः । पादतले प्रियस्येति शेषः नो वा निपतितं, तिष्ठ इति वचश्च न उक्तम् । अम्बुदातिमलिने मेघान्धकारिते इति यावत् काले वर्षाकाले इत्यर्थः गन्तुं प्रोषितुं प्रवृत्तः उद्यतः पथः मूर्त्तः प्रियः केवलं वाष्पजलानाम् अश्रु-

न जाने संमुखायाते प्रियाणि वदति प्रिये ।
सर्वाण्यङ्गानि मे यान्ति श्रोत्रतां किमु नेत्रताम् ॥ ९३ ॥
विरहविषमः कामो वामस्तनुं कुरुते तनुं
दिवसगणनादत्यासौ व्यपेतदृशो यमः ।
त्वमपि वशगो मानव्याधेर्विचिन्तय नाथ हे !
किशलयमृदुर्जीवेदेवं कथं प्रमदाजनः ॥ ९४ ॥
पादासक्ते सुचिरमिह ते वामता कैव कान्ते
सन्मार्गस्थे प्रणयिनि जने कोपने ! कोऽपराधः ।

वारीणां स्रोतोभिः प्रवाहैः कल्पितः रचितः यः नदीपूरः नदीप्रवाहः तेन बद्धः निवारितः दत्तार्थः । रुदतीं कामिनीं दृष्ट्वा तत्कान्तो न प्रस्खलित इति भावः । आर्द्रखटिकाक्रीडितं वृत्तम् ॥ ९२ ॥

नेति । सम्मुखायाते सम्मुखमुपस्थिते प्रिये कान्ते प्रियाणि प्रियवचनानि वदति सति मे मम सर्वाणि अङ्गानि श्रोत्रतां श्रवणेन्द्रियत्वं किमु नेत्रतां दर्शनेन्द्रियत्वं यान्ति प्राप्नुवन्ति तत् न जाने । प्रियस्य दर्शने तन्मुखामृतश्रवणे च न मम तृप्तिर्जायते इति भावः । अनुष्टुब्वृत्तम् ॥ ९३ ॥

विरहेति । हे नाथ ! वामः प्रतीपः कामः विरहे विषमः दुःसह इति यावत् तनुं शरीरं तनुं क्षीणं कुरुते, असौ यमश्च दिवसानां जीवनकालानामिति भावः गणनायां संख्याने दत्तः नियुक्तः तत्पर इति यावत् अतएव व्यपेतदृशः निर्दयः असमये च न यच्छोत्यनीति भावः त्वमपि मानव्याधेः वशगः वशवर्ती मानं कृत्वा स्थित इति भावः एवं सति किशलयमृदुः पल्लवकोमलः प्रमदाजनः नारीजनः कथं जीवेत् ? अतिकष्टेन प्राणितीत्यर्थः । विचिन्तय अवधारय । तत्मानं परित्यज्य आगच्छेत्यर्थः । मानिनं कान्तं प्रति कस्याश्चिदनुनयोक्तिः । हरिणीवृत्तम् ॥ ९४ ॥

पादासक्ते इति । हे कोपने ! इह अस्मिन् कान्ते प्रिये

इत्थं तस्याः परिजनकथां कोपवेगोपशान्त्यै
बाष्पोद्भेदस्खलदनु सहसा न स्थितं न प्रयातम् ॥ ६५ ॥
पुराभूदस्माकं नियतमविभिन्ना तनुरियं
ततो नु त्वं प्रेयान् वयमपि हताशाः प्रियतमाः ।
इदानीं नाथस्त्वं वयमपि कलत्रं किमपरं
मयाप्त प्राणानां कुलिशकठिनानां फलमिदम् ॥ ६६ ॥

सुचिर बहुक्षणमित्यर्थः पादाक्रान्ते चरणपतिते ते तव वामता प्रतिकूलता कैव ? अनुचितेवेति भावः, प्रणयिनि जने कान्ते इत्यर्थः सन्मार्गस्थे सदाचारवर्त्तिनि सति कः अपराधः ? नैवापराध इत्यर्थः तस्याः नार्याः कोपवेगस्य उपशान्त्यै उपशमाय इत्थम् एवंविधा परिजनानां सखीनामिति भावः कथा आसीदिति शेषः । तदनु तदनन्तरं बाष्पाणाम् अश्रूणाम् उद्भेदैः स्खलनैः सहसा न स्थितं न प्रयातं न गतं कियत्कालम् अश्रुमोक्षेण कोपो गत इति भावः । मन्दाक्रान्ताछन्दस् ॥ ६५ ॥

पुरेति । पुरा पूर्वम् अस्माकम् आवयोरित्यर्थः नियतं निश्चितम् इयं तनुः शरीरम् अविभिन्ना एकैवेत्यर्थः अभूत् । ततः-कियतः काल तु त्वं प्रेयान् प्रियतमः किन्तु भिन्नतनुः विच्छेदादिति भाव, वयम प हताशाः विफलमनोरथाः प्रियतमाः जाता इति शेषः, इदानीं त्वं नाथः पतिः पालकत्वादिति भावः, वयमपि कलत्रं स्त्री, भर्त्तव्या इति भावः अपरम् अन्यत् किं वक्तव्यमिति शेषः मया कुलिशकठिनानां वज्रनिष्ठुराणां प्राणानां तादृशविरहेऽपि अक्षयिनामिति भावः इद फल युष्मत्कृपापात्रत्वरूपमिति भावः आप्तं लब्धम् । तव विरहे मम यौवन गतम् इदानीं केवल भर्त्तृभार्यात्वसम्बन्ध आवयोरिति भावः । शिखरिणीछन्दस् ॥ ६६ ॥

मुग्धे ! मुग्धतयैव नेतुमखिलः कालः किमारभ्यते ?
मानं धत्स्व धृतिं बधान ऋजुतां दूरे कुरु प्रेयसि ।
सख्यैव प्रतिबोधिता प्रतिवचस्तामाह भीताननां
नीचैः शंस हृदि स्थितो ननु स मे प्राणेश्वरः श्रोष्यति ॥ ६७ ॥
पीतो यतः प्रभृति कामपिपासितेन
तस्या मयाधररसः प्रचुरः प्रियायाः ।
तृष्णा ततः प्रभृति मे द्विगुणत्वमेति
लावण्यमस्ति बहु तत्र किमत्र चित्रम् ॥ ६८ ॥

मुग्धे इति । हे मुग्धे ! सरले ! अखिलः समग्रः कालः समयः मुग्धतयैव सरलभावेनैव नेतुम् अतिवाहयितुं किं कथम् आरभ्यते ? मानं धत्स्व अवलम्बस्व, धृतिं धैर्यं बधान आश्रय, प्रेयसि कान्ते ऋजुतां सरलतां दूरे कुरु न कुरुष्वेत्यर्थः, सख्या एवं प्रतिबोधिता ज्ञापिता आत्मा भीताननां सभयवदना सती तां सखीं प्रतिवचः आह ब्रवीति, ननु सखि ! नीचैः मन्दं यथा तथा शंस कथय नोच्चैः कथयेति यावत् कथं चेत् हृदि स्थितः स मे मम प्राणेश्वरः श्रोष्यति । शार्दूलविक्रीडितं वृत्तम् ॥ ६७ ॥

पीत इति । यतः प्रभृति आरभ्य कामपिपासितेन मया तस्याः प्रियायाः प्रचुरः प्रभूतः अधररसः पीतः, ततः प्रभृति तदारभ्य मे मम तृष्णा तदधररसपानलालसा द्विगुणत्वं द्वित्वसंख्यत्वं एति प्राप्नोति । तत्र प्रियाधरे बहु लावण्यम् अस्ति अत्र विषये किं चित्रम् आश्चर्यम् । यदि लावण्यातिशयो नास्ति तदा कथं तत्र रसातिशयः लावण्यरसयोराधाराधेयत्वनियमादिति भावः । वसन्ततिलकं वृत्तम् ॥ ६८ ॥

क्व प्रस्थितासि करभोरु ! घने निशीथे ?
प्राणाधिको वसति यत्र जनः प्रियो मे ।
एकाकिनी वद कथं न बिभेषि बाले !
नन्वस्ति पुङ्गितशरो मदनः सहायः ॥ ६९ ॥
लीलातामरसाहतोऽन्यवनितानिःशङ्कदष्टाधरः
कश्चित् केसरदूषितेक्षण इव व्यामील्य नेत्रे स्थितः ।
मुग्धा कुड्मलिताननेन दधती वायुं स्थिता तस्य सा
भ्रान्त्या धूर्त्ततया च वेपथुमती तेनानिशं चुम्बिता ॥७०॥

क्वेति । हे करभोरु ! घने अन्धकाराच्छन्ने इति यावत् निशीथे अर्द्धरात्रे क्व कुत्र प्रस्थितासि चलितासि ? यत्र मे रतिप्रियः सुरतानिलाषी प्राणाधिकः वसति तिष्ठति, हे बाले ! मुग्धे ! एकाकिनी असहाया त्वं न बिभेषि कथम् ? वद । ननु भोः संहितशरः संयोजितशरः मदनः कामः सहायः अस्ति । कस्यांचिदभिसारिकायाः पथिकस्य च कस्यचिदुक्तिप्रत्युक्ती । वसन्ततिलकं वृत्तम् ॥ ६९ ॥

लीलेति । अन्यवनितया अपराङ्गनया निःशङ्कं दष्टः क्षतः अधरो यस्य तथाभूतः अतएव लीलातामरसेन क्रीड़ारक्तकमलेन आहतः ताड़ितः सुग्धयेति शेषः कश्चित् केसरैः तत्तामरसकिञ्जल्कैरित्यर्थः दूषिते ईक्षणे नेत्रे यस्य तथाभूत इव नेत्रे व्यामील्य निमीलयित्वा स्थितः । मुग्धा सरला ततकपटमजानतीति भावः कुड्मलिताननेन सङ्कुचितवदनेन वायुं तत्केसरापनयनार्थमिति भावः दधती भ्रान्त्या केसरदूषितनेत्रबोधेनेति भावः तस्य कान्तस्य पुरत इति शेषः वेपथुमती कम्पमाना कान्तस्य नयनानिष्टशङ्केति भावः स्थिता तेन कान्तेन धूर्त्ततया अनिशम् अतिमात्रमिति यावत् चुम्बिता । शार्दूलविक्रीड़ितं वृत्तम् ॥ ७० ॥

स्फुटतु हृदयं कामः कामं करोतु तनुं तनुं
न सखि ! चटुलप्रेम्णा कार्यं पुनर्दयितेन मे ।
इति सरभसं मानोद्रेकादुदीर्य्य वचस्तया
रमणपदवी शार्ङ्गाक्ष्या ससम्भ्रममीक्षिता ॥ ७१ ॥
पश्याश्लेषविशीर्णचन्दनरजःपुञ्जप्रकर्षादियं
शय्या सम्प्रति कोमलाङ्गि ! कठिनेत्यारोप्य मां वक्षसि ।
गाढ़ौष्ठग्रहपीड़नाकुलतया पादाग्रसन्दंशके-
नाक्रम्याम्बरमात्मनो यदुचितं धूर्त्तेन तत्प्रस्तुतम् ॥ ७२ ॥

स्फुटतीति । हे सखि ! हृदयं स्फुटतु विदीर्णं भवतु, कामः कामं सम्यक् तनुम् अङ्गं तनुं क्षीणं करोतु, चटुलप्रेम्णा चञ्चल-प्रणयेन दयितेन प्रियेण पुनः मे मम न कार्यं न प्रयोजनम् । तया शार्ङ्गाक्ष्या मृगाक्ष्या इति इत्थं मानोद्रेकात् मानातिरेकात् सरभसं सहसा वचः उदीर्य्य उक्त्वा रमणस्य कान्तस्य पदवी प्रयाणमार्गः ससम्भ्रमं सभयम् ईक्षिता दृष्टा । मानेनावधीरिते कान्ते गच्छति पुनस्तृष्णया तन्मार्गावलोकनात् सत्वरं निषिध्यतामयमित्याशयः । हरिणीवृत्तम् ॥ ७१ ॥

पश्येति । हे कोमलाङ्गि ! आश्लेषेण आलिङ्गनेन विशीर्णानां स्खलितानां त्वदङ्गेभ्य इति भावः चन्दनरजःपुञ्जानां चन्दनधूलि-निवहानां प्रकर्षात् आतिशय्यात् इयं शय्या सम्प्रति कठिना त्वदङ्गं बाधते इति भावः पश्य इति उक्त्वा धूर्त्तेन कान्तेन मां वक्षसि आरोप्य नीत्वा गाढ़ः यः ओष्ठग्रहः अधरदंशनं तेन यत् पीड़नं क्लेशः व्यथेति यावत् तेन चाकुलतया व्यग्रतया तत्र व्याप्ततयेति भावः पादाग्रं चरणयोरग्रमेव सन्दंशकः तेन अम्बरं वसनम् आक्रम्य आ-क्रम्य वित्वेत्यर्थः आत्मनः स्वस्य यत् उचितम् अभीष्टमित्यर्थः तत् प्रस्तुतम् आरब्धं सम्यक् सुरतं कृतमित्यर्थः । शार्दूलविक्रीड़ितं वृत्तम् ॥ ७२ ॥

कथमपि प्रत्याहृत्ते प्रिये खलितोत्तरे
विरहकृशया कृत्वा व्याजं प्रजल्पितमश्रुतम् ।
असहनसखीश्रोत्रप्राप्तिप्रमादससम्भ्रमं
प्रचलितदृशा शून्ये गेहे समुच्छ्वसितं पुनः ॥ ७३ ॥
आदृष्टिप्रसरं प्रियस्य पदवीमुद्दीक्ष्य निर्विण्णया
विच्छिन्नेषु पथिष्वहःपरिणतौ ध्वान्ते समुन्मीलति ।
दत्त्वैकं सशुचा गृहं प्रतिपदं पान्यस्त्रियास्मिन् क्षणे
सोऽभूदागत इत्यमन्दवलितग्रीवं पुनर्वीक्षितः ॥ ७४ ॥

कथमिति । विरहकृशया कान्तया प्रत्याहृत्ते प्रवासात् प्रतिनिवृत्ते प्रिये कथमपि खलितोत्तरे कृतापराधतया असम्यक्प्रतिवचने सति व्याजं छलं कृत्वा प्रजल्पितं वचनं प्रियस्येति शेषः अश्रुतं नाकर्णितं पुनः किन्तु शून्ये विजने गेहे स्थितयेति शेषः असहनया कोपनेति यावत् या सखी तस्याः श्रोत्रप्राप्तौ श्रवणगोचरतायां यः प्रमादः अनवधानता तस्मात् ससम्भ्रमं सभयं यथा तथा प्रचलितदृशा चञ्चलनयनया सत्या समुच्छ्वसितं समुज्जीवितम् । प्राक् सख्या प्रिये आगते त्वया अतिमात्रं मानः कर्त्तव्य इति शिक्षितया, किन्तु कान्तागमने सहसा तदनुसरणे सख्याः कोपो भवेदिति भयेन तद्वाक्यानवधेऽपि पुनर्जीवनं प्राप्तमिति निष्कर्षः ॥ ७३ ॥

आदृष्टेति । पान्यस्त्रिया प्रोषितभर्तृकयेत्यर्थः आदृष्टिप्रसरं दृष्टिपथपर्य्यन्तमित्यर्थः प्रियस्य पदवीं पन्थानम् उद्दीक्ष्य उच्चैर्निरीक्ष्य विच्छिन्नेषु दृष्टिविच्छेदवत्सु पथिषु निर्विण्णया नितरां दुःखिनया आत्मानं कृतभाग्यतया अवजानन्त्येति यावत् अहःपरिणतौ दिवावसाने ध्वान्ते तमसि समुन्मीलति समुच्छ्रुम्भमाणे सति सशुचा सशोकया गृहं प्रति एकं पदं दत्त्वा अस्मिन् क्षणे सः प्रियः आगतः अभूत् इति धियेति शेषः अमन्दं त्वरितमित्यर्थः

आयाते दयिते मनोरथशतैर्नीत्वा कथञ्चिद्दिनं
वैदग्ध्याऽपगमाज्जडे परिजने दीर्घां कथां कुर्वति ।
दृष्टास्मीत्यभिधाय सत्वरतरं व्याधूय चीनांशुकं
तन्वङ्ग्या रतिकातरेण मनसा नीतः प्रदीपः शमम् ॥७५॥
अनालोच्य प्रेम्णः परिणतिमनादृत्य सुहृद-
स्त्वया मुग्धे ! मानः किमिति सरले प्रेयसि कृतः ।
समाकृष्टा श्वेते प्रलयदहनोद्गारसुरभिखाः
स्वहस्तेनाङ्गारास्तदलमधुनारब्धरुदितैः ॥ ७६ ॥

वञ्चिता चाञ्चिता ओघा यञ्चिन् तत् यथा तथा पुनः वीक्षितम् अवलोकितम् । शार्दूलविक्रीडितं वृत्तम् ॥ ७४ ॥

आयाते इति । दयिते प्रिये आयाते आगते सति मनोरथशतैः बहुभिर्मनोरथैरेवमेवं प्रियेण सार्द्धं करिष्यामीत्येवंरूपैरिति भावः कथञ्चित् कृच्छ्रेण दिनं नीत्वा अतिवाह्य वैदग्ध्यापगमात् रसज्ञानाभावादित्यर्थः जड़े निर्बोधे परिजने दीर्घां महतीम् अशेषामिति यावत् कथां कुर्वति सति दृष्टा अवलोकिता अस्मि प्रियेणेति शेषः इति अभिधाय कथयित्वा प्रकाश्येति भावः तन्वङ्ग्या कृशाङ्ग्या प्रियया सत्वरतरम् अतिशीघ्रं चीनांशुकं सूक्ष्मवसनं व्याधूय कम्पयित्वा रतिकातरेण सुरतोत्सुकेन मनसा प्रदीपः शमं नीतः निर्वापितः । प्रदीपनिर्वापे सर्वे परिजनाः स्वं स्वं स्थानं यास्यन्ति अहं च सत्वरं प्रियसङ्गमः स्यादिति धियेति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ७५ ॥

अनालोच्येति । हे मुग्धे ! सरले ! प्रेम्णः परिणतिं परिणामं दुःसङ्गामिति भावः अनालोच्य अविचिन्त्य सुहृदः अस्मानिति शेषः मा त्वमीदृशं मानं कुर्वित्यादीनि अस्मार्क वचनानीति भावः

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्चनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥७७॥
जाता मे कलिका स्तनौ न तुलितौ गात्रं न रोमाञ्चितं
वक्त्रं स्वेदकणाञ्चितं न सहसा यावच्छठेनामुना ।

अनादृत्य अमणयित्वेत्यर्थः त्वया सरले अकुटिले प्रेयसि कान्ते किमिति कथं मानः कोपः कृतः ? अनुचितस्ते ताडने प्रिये मान इति भावः । इते प्रलयदहनस्य कल्पान्तानलस्य उद्भासुराः उज्ज्वलीभवमानाः शिखाः ज्वालाः इव शिखा येषां तथाभूताः अङ्गाराः उल्मूकाः विरहज्वाला इति भावः खलस्तेन समाकृष्टाः गृहीताः त्वयेति शेषः, तत् तस्मात् अधुना साम्प्रतम् अरण्यरुदितैः वृथारोदनैरित्यर्थः अलं रोदनेन निष्फलमिति भावः । शिखरिणीवृत्तम् ॥ ७६ ॥

शून्यमिति । बाला सुग्धा कान्ता वासगृहं शयनागारं शून्यं सखीजनादिरहितमित्यर्थः विलोक्य दृष्ट्वा शनैः मन्दं मन्दं शयनात् शय्यायाः किञ्चित् उत्थाय निद्राव्याजं कपटनिद्रामित्यर्थः किं करोतीयमिति दृष्टवत्येति भावः उपागतस्य आश्रितस्य पत्युः कान्तस्य मुखं सुचिरं बहुक्षणं निरीक्ष्य विस्रब्धं निःशङ्कं यथा तथा परिचुम्ब्य जातपुलकां सञ्जातरोमाञ्चां कान्तास्पर्शसुखादिति भावः गण्डस्थलीं कपोलदेशं प्रियस्येति शेषः आलोक्य लज्जया नम्रमुखी अवनतवदना हसता प्रियेण चिरं बहुक्षणं चुम्बिता । शार्दूलविक्रीडितं वृत्तम् ॥ ७७ ॥

जातेति । अमुना शठेन धूर्त्तेन मे मम धृतिसुधा धैर्यध्वंसिना प्राणेश्वरेण दृष्टेनैव सहसा मनः चित्तं हृतं तत्र उत्कलिका उत्कण्ठा कथं मे मनो द्विधते इत्युद्वेग इति भावः न जाता

दृष्टेनैवं मनो हृतं धृतिमुषा प्राणेश्वरेणाद्य मे
तत् केनैव निरूप्यतां हि निपुणे ! मानः समाधीयते ॥ ७८ ॥
दृष्टः कातरनेत्रया चिरतरं बध्वाञ्जलिं याचितः
पश्चादंशुकपल्लवेन विधृतो निर्व्याजमालिङ्गितः ।
इत्याच्छिद्य यदा समस्तमपृणो गन्तुं प्रवृत्तः पठः
पूर्वं प्राणपरिग्रहो दयितया मुक्तस्ततो वल्लभः ॥ ७९ ॥

स्तनौ न लुठितौ न कस्मिंश्चिदपि मनसश्चिरगतत्वात् मनोहरणे तवोः कम्पनमवश्यमाविति भावः । गात्रम् अङ्गं न रोमाञ्चितम् दृष्टं वस्तु ह्रियते इति चकितधिषेति भावः वक्त्रं वदनं न स्वेदकणैर्घर्म-वारिबिन्दुभिः अञ्चितम् अवकृतं तादृशरत्नहरणे क्लेशातिशयात् स्वेदागम इति भावः । तत् तस्मात् मनसो हरणात् हे निपुणे हे चतुरे ! त्वया निरूप्यतां केन एव हि उपायेन इति शेषः मानः समाधीयते त्यज्यते मयेति शेषः । मनोवृत्तिर्नास्ति तथापि मानः करणीयः कीदृशो वेति विचार्यते तस्मात् मया मानस्यज्य इति भावः । सखीं प्रति नायिकाया उक्तिरियम् । शार्दूलविक्रीडितं वृत्तम् ॥ ७८ ॥

दृष्ट इति । कातरनेत्रया दयितया चिरतरं बहुक्षणं दृष्टः निरीक्षितः, अञ्जलिं बद्ध्वा याचितः मा मां त्यक्त्वा व्रजेति प्रार्थितः, पश्चात् प्रार्थनानन्तरम् अंशुकपल्लवेन वसनाञ्चलेन विधृतः विशेषेण गृहीतः ततश्च निर्व्याजं गाढमिति यावत् गमनवारणार्थमिति भावः आलिङ्गितः इतीत्थं समस्तं गमनप्रतिबन्धभूतमिति भावः आच्छिद्य परिहृत्य अपृणः निर्दयः पठः वल्लभः प्रियः यदा गन्तुं प्रवृत्तः उद्यतः, तदा दयितया पूर्वं प्राक् प्राणपरिग्रहः जीवनेषु प्रयत्न इति यावत् मुक्तः त्यक्तः, ततः प्राणत्यागनिश्चयानन्तरं वल्लभः कान्तः मुक्तः त्यक्तः । शार्दूलविक्रीडितं वृत्तम् ॥ ७९ ॥

अङ्गुल्यग्रनखेन वाष्पसलिलं निक्षिप्य निक्षिप्य किं
तूष्णीं रोदिषि कोपने ! बहुतरं फूत्कृत्य रोदिष्यसि ।
यस्यास्ते पिशुनोपदेशवचनैर्मानेऽतिभूमिं गते
निर्विण्णोऽनुनयं प्रति प्रियतमो मध्यस्थतामेष्यति ॥ ८० ॥
तद्वक्त्राभिमुखं मुखं विनमितं दृष्टिः कृता पादयोः
तस्यालापकुतूहलाकुलतरे श्रोत्रे निरुद्धे मया ।
पाणिभ्याञ्च तिरस्कृतः सपुलकः स्वेदोद्गमो गण्डयोः
सख्यः ! किं करवाणि यान्ति शतधा मत्कञ्चुलीसन्धयः ॥ ८१

अङ्गुलीति । हे कोपने ! अङ्गुलेरग्रनखेन नखाग्रेण वाष्पसलिलम् अश्रुजलं निक्षिप्य निक्षिप्य पुनः पुनः पातयित्वा किं कथं तूष्णीं रोदिषि ? बहुतरम् उच्चैरित्यर्थः फूत्कृत्य चोत्कृत्येत्यर्थः रोदिष्यसि ? इदानीम् अव्यक्तिरोदनं किन्तु उत्तरत्र उच्चैरोदनं भावीति भावः । यस्यास्ते तव माने पिशुनानां दुर्जनानाम् उपदेशवचनैः अतिभूमिम् अतिशयं गते सति निर्विण्णः निर्वेदमापन्नः पुनः-पुनरवधीरणात् आत्मानं नितरां कातरं मन्यमानः प्रियतमः अनुनयं प्रति मध्यस्थताम् औदासीन्यम् एष्यति प्राप्स्यति न पुनरनुनेष्यतीति भावः । मानिनीं प्रति कस्याश्चित् सख्या उक्तिरियम् । शार्दूलविक्रीडितं वृत्तम् ॥ ८० ॥

तदिति । हे सख्यः ! मया तस्य कान्तस्य वक्त्राभिमुखं वदनं प्रति अभिमुखं सदृष्णं मुखं विनमितं विशेषेण नतीकृतं, पादयोः चरणयोः दृष्टिः कृता, तस्य आलापे वचने यत् कुतूहलं तस्मिन् आकुलतरे अतिलालसे इति यावत् श्रोत्रे कर्णौ निरुद्धे बद्धीकृते, सपुलकः सरोमाञ्चः गण्डयोः कपोलयोः स्वेदोद्गमः घर्मजलाविर्भावः पाणिभ्यां भुजाभ्यां तिरस्कृतः आच्छादितश्च । मत्कञ्चुलीसन्धयः मम कूर्पासवस्त्रसन्धयः शतधा यान्ति स्खलन्तीति यावत्

क्षतो दूरादेव स्मितमधुरमभ्युद्गमविधिः
गिरस्यात्मा न्यस्ता प्रतिवचनमुच्चैः प्रणमितम् ।
न दृष्टेः शैथिल्यं मिलन इति चेतो दहति मे
निगूढान्तःकोपात् कठिनहृदये ! संहृतिरियम् ॥ ८२ ॥
एकस्मिन् शयने विपक्षरमणीनामग्रहे मुग्धया
सद्यः कोपपराङ्मुखं प्रियतया चाटूनि कुर्वन्नपि ।
आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणात्
माभूत् सुप्त इवैष मन्दवलितग्रीवं पुनर्वीक्षितः ॥ ८३ ॥

तत् किं करवाणि ? कान्तावेशवशात् यत्सम्भ्रमस्खलनं दुर्वारमिति भावः । कथं त्वया प्रियदर्शन एव धैर्यच्युता भवसि ? सर्वथा मानः करणीय इतिवादिनीः सखीः प्रति नायिकाया उक्तिः । आर्यागीतिविक्रीडितं वृत्तम् ॥ ८१ ॥

क्षत इति । हे कठिनहृदये ! निष्ठुराशये ! स्मितेन मन्दहासेन मधुरं मनोहरं यथा तथा अभ्युद्गमविधिः मम दर्शनेन आसनोत्थानव्यापारः दूरादेव क्षतः, आत्मा इदमिदं कुर्वित्यादेशः गिरसि न्यस्ता मदीया, उच्चैरतिशयेन प्रणमितं प्रणतिः प्रतिवचनं प्रत्युत्तरं मिलने सङ्गमे दृष्टेः शैथिल्यं न दृष्ट्यैव मिलनं न तु आलिङ्गनेनेति भावः इतीत्थं निगूढः यः अन्तःकोपः आन्तरिकक्रोधः तस्मात् इयं संहृतिः सङ्गसंवरणं मे मम चेतः चित्तं दहति तापयतीत्यर्थः । शिखरिणीवृत्तम् ॥ ८२ ॥

एकस्मिन्निति । एकस्मिन् शयने शय्यायां विपक्षरमणी सपत्नीत्यर्थः तस्याः नामग्रहे प्रियेण कृते सतीत्यर्थः सद्यः तत्क्षणं कोपेन पराङ्मुखं व्यावृत्तवदनं यथा तथा शयितया सुप्तया सरलया कामिन्या चाटूनि अनुनयवचनानि कुर्वन्नपि नाहमेवं कदापि करिष्यामीत्येवं वदन्नपि प्रियतमः आवेगात् कोपभरादिति यावत्

मलयमरुतां व्राता याता विकासितमल्लिका-
परिमलभरो भग्नो ग्रीष्म ! त्वमुत्सहसे यदि ।
घन ! घटयितुं निस्नेहं त्वां य एव निवर्त्तने
प्रभवतितरां किन्नश्चित्रं स एव धनञ्जयः ॥ ८४ ॥
स्वं दृष्ट्वा करजक्षतं मधुमदक्षीवा विचार्य्येर्षया
गच्छन्ती क्व नु गच्छसीति विधृता बाला पटान्ते मया ।

अवधीरितः निराकृतः तत्क्षणात् तूष्णीं स्थितः मौनमाश्रित इत्यर्थः किन्तु एषः प्रियतमः सुप्त इव निद्रित एवेत्यर्थः । अत्रावधारणार्थ इवशब्दः । माभूत् न भवतु इति धिमेति भावः मन्दम् ईषत् वलिता चालिता क्षीवा यस्मिन् तत् यथा तथा पुनः वीक्षितः अवलोकितः । शार्दूलविक्रीड़ितं वृत्तम् ॥ ८३ ॥

मलयेति । हे ग्रीष्म ! त्वं यदि उत्सहसे उज्जृम्भसे तदा मलयमरुतां व्राताः सङ्घाः याताः नाशं गता इति यावत् तथा विकासितानां मल्लिकानां परिमलभरः सौरभातिशयः भग्नः नष्टः खादिति शेषः । हे घन ! मेघ ! य एव निस्नेहं निर्दयं त्वां निवर्त्तने निवारणे घटयितुं योजयितुं दूरीकर्त्तुमिति यावत् प्रभवति तराम् अतिशयेन प्रभवति, स एव धनञ्जयः अर्जुनः यदि विद्यते इति शेषः तदा नः अस्माकं किं चित्रं त्वयेति शेषः न किमपि त्वया कर्त्तुं शक्यते इति भावः । पुरा खाण्डवदाहे इन्द्रप्रेरितघनानां तुमुलं वर्षणम् अर्जुनेन शरसम्बाधैर्निराकृतमिति पौराणिकी वार्त्तामानुसन्धेया । विरहिणां वासन्तानां मलयमरुतां तत्कालविकसितानां मल्लिकानाञ्च तथा मेघानामनुद्दीपकत्वमसहमानानां ग्रीष्माभिनन्दनमर्जुनप्रशंसनञ्चेदम् । हरिणीवृत्तम् ॥ ८४ ॥

स्वमिति । मधुमदेन सुरापानजनितोल्लासेन क्षीवा मत्ता बाला कान्ता स्वम् आत्मकृतं करजक्षतं नखक्षतचिह्नं दृष्ट्वा मदङ्के इति शेषः

प्रत्यावृत्तमुखी सबाष्पनयना मां मुञ्च मुञ्चेति सा
कोपात् प्रस्फुरिताधरा यदवदत्तत् केन विस्मर्यते ॥८५॥
सालक्तकं शतदलाधिककान्तिरम्यं
रत्नौघधामनिकरारुणनूपुरञ्च ।
चिह्नं भृशं कुपितया तरलोत्पलाक्ष्या
सौभाग्यचिह्नमिव मूर्ध्नि पदं विरेजे ॥ ८६ ॥
कपोले पत्रालीं करतलनिरोधेन मृदिता
निपीतो निःश्वासैरयमसृतहृद्योऽधररसः ।

ईर्षया अन्याङ्गनाद्वेषेण विचार्य विविच्य नेदं मत्कृतमपि तु अन्याङ्गनाकृतमिति निर्णीयेति यावत् गच्छन्ती चलन्ती क्व नु कुत्र खलु गच्छसीति मया पटान्ते वस्त्राञ्चले विधृता प्रत्यावृत्तमुखी पराङ्मुखी सबाष्पनयना साश्रुनेत्रा मा मुञ्च मुञ्च त्यज त्यज इति उक्तेति शेषः कोपात् प्रस्फुरिताधरा प्रकम्पितोष्ठा सती यत् अवदत् तत् केन विस्मर्यते ? अविस्मरणीयं तदित्यर्थः । सखायं प्रति कस्याचित् नायिकाया वार्त्तावर्णनमिदम् । शार्दूलविक्रीडितं वृत्तम् ॥ ८५ ॥

सालक्तकमिति । भृशम् अत्यर्थं कुपितया क्रुद्धया तरलोत्पलाक्ष्या चञ्चलनीलोत्पलनेत्रया कान्तयेति शेषः मूर्ध्नि शिरसि चिह्नं निहितं सालक्तकं लाक्षारसरञ्जितं शतदलादपि कमलादपि अधिकया कान्त्या श्रिया रम्यं मनोहरं रत्नौघानां मणिसङ्घानां धामनिकरेण कान्तिपुञ्जेन अरुणं रक्तं नूपुरं यस्य तथाभूतं पदं सौभाग्यचिह्नमिव कान्तावाल्लभ्यचिह्नमिव प्रियस्येति शेषः विरेजे शुशुभे । वसन्ततिलकं वृत्तम् ॥ ८६ ॥

कपोले इति । हे निरनुरोधे । अनुनानुनये इति यावत् करतलाभ्यां निरोधेन आवरणेन कपोले गण्डे पत्रालीं पत्ररचनावलिः

मुहुः कण्ठे लग्नस्तरलयति बाष्पः स्तनतटं
प्रियो मन्युर्जातस्तव निरनुरोधे ! न तु वयम् ॥ ८७ ॥
लाक्षालक्ष्म ललाटपट्टमभितः केयूरमुद्रा गले
वक्त्रे कज्जलकालिमा नयनयोस्ताम्बूलरागोदयः ।
दृष्ट्वा कोपविधायि मण्डनमिदं प्रातश्चिरं प्रेयसो
क्रीडातामरसोदरे मृगदृशः श्वासाः समाप्तिं गताः ॥८८॥

स्तनितेना प्रोच्छ्वसता, अयम् अस्तवत्तः दृष्टः मनोज्ञः अधररसः निःश्वासैः दीर्घैरिति शेषः पीतः शोषं नीत इत्यर्थः । मुहुः पुनः पुनः कण्ठे लग्नः पतित इत्यर्थः बाष्पः अश्रुवारि स्तनतटं तरलयति चपलयति कम्पयतीत्यर्थः कण्ठात् स्तनोपरि वेगेन पतनादिति भावः । अतः तव मन्युः कोपः प्रियो जातः, वयं न तु, नैव प्रिया जाता इति शेषः । मन्योरनुरोधेन तत् कार्यं करोषि न ममानुरोधेन अटभिमतमिति मन्योरेव प्रियता न तु ममेति निष्कर्षः । शिखरिणीवृत्तम् ॥८७॥

लाक्षेति । प्रेयसः कान्तस्य ललाटपट्टं ललाटदेशम् अभितः सर्वतः ललाटोपरीत्यर्थः लाक्षालक्ष्म अलक्तकचिह्नं पादप्रहारजनितमिति भावः, गले कण्ठ केयूरमुद्राः अङ्गुटरेखाः आलिङ्गनजनिता इति भावः, वक्त्रे वदने कज्जलकालिमा अञ्जनमालिन्यं चुम्बनजनित इति भावः, नयनयोः ताम्बूलरागस्य उदयः स्थितिः चुम्बनजनित इति भावः, इदं कोपविधायि कोपकारणं मण्डनम् अलक्तरागस्य अञ्जनस्य ताम्बूलरागस्य च आलिङ्गनचुम्बनजनितमिति भावः प्रातः प्रातःकाले चिरं बहुक्षणं दृष्ट्वा मृगदृशः मृगनयनायाः क्रीडातामरसोदरे क्रीडाकमलाभ्यन्तरे श्वासाः प्राणवायवः समाप्तिं गताः निर्गता इत्यर्थः क्रीडातामरसोदरम् आलिङ्गन्त्या प्राणान् अजहावित्ति निष्कर्षः । आर्यावृत्तविक्रीडितं वृत्तम् ॥ ८८ ॥

तप्ते महाविरहवह्निशिखावलीभि-
रापाण्डुरस्तनतटे हृदये प्रियायाः ।
रथ्यालिवीक्षणनिवेशितलोलदृष्टे-
र्नूनं क्षनच्छनिति बाष्पकणाः पतन्ति ॥ ८९ ॥
चिन्तामोहविनिश्चलेन मनसा मौनेन पादानतः
प्रत्याख्यानपराङ्मुखः प्रियतमो गन्तुं प्रवृत्तोऽधुना ।
सव्रीड़ैरलसैर्निरन्तरलुठद्बाष्पाकुलैर्लोचनैः
श्वासोत्कम्पकुच निरीक्ष्य सुचिरं जीवेशया वारितः ॥९०॥

तप्ते इति । महतीभिः विरहवह्निशिखावलीभिः तप्ते- अत-एव आपाण्डुरौ स्तनतटौ यत्र तादृशे रथ्यालीनाम् अध्वनिचयानां वीक्षणे अवलोकने निवेशिता लोला सतृष्णा सहर्षेणेत्यर्थः यावत् दृष्टिः यस्याः तथाभूतायाः प्रियायाः हृदये क्षनच्छनिति बाष्पकणाः अश्रुबिन्दवः पतन्ति नूनम् उत्प्रेक्षे । अन्ये यद्वा ध्रुवं प्रायो नूनमित्येवमादयः । उत्प्रेक्षाव्यञ्जकाः यद्वा दृश्यन्तेऽपि तादृश इति दर्पणः । प्रान्यस्य कस्यचित् सखायं प्रति स्वकान्तावस्था-वर्णनमिदम् । वसन्ततिलकं वृत्तम् ॥ ८९ ॥

चिन्तेति । चिन्ता प्रियं प्रति किं कर्त्तव्यमित्येवं भावना, मोहः कर्त्तव्यविमूढता ताभ्यां विनिश्चलेन कर्त्तव्यनिर्णयाच्चमेणेति यावत् मनसा चित्तेन मौनेन तूष्णीम्भावेन च उपलक्षितवेति भावः, उप-लक्षणे तृतीया । जीवेशया प्राणेश्वर्या पादानतः अपराद्धोऽस्मीति चरणपतितः तथापि प्रत्याख्यानेन निराकरणेन पराङ्मुखः विमुखः अतएव अधुना साम्प्रतं गन्तुं प्रवृत्तः उद्यतः प्रियतमः स्वामी दीर्घ-श्वासेन दीर्घ-श्वासोत्कम्पौ कुचौ स्तनौ यत्र तत् यथा तथा सुचिरं बहु-क्षणं निरीक्ष्य सव्रीड़ैः सलज्जैः अलसैः मन्थरैः निरन्तरं यथा तथा

तन्वङ्ग्या गुरुसन्निधौ नयनजं यद्वारि संस्तम्भितं
तेनान्तर्गलितेन मन्मथशिखी सिक्तोऽनुषङ्गोद्भवः ।
मन्ये तस्य निरस्यमानकिरणस्येषा मुखेनोद्गता
श्वासामोदसमाकुलालिनिकरव्याजेन धूमावलिः ॥९१॥
भ्रूभेदो रचितः चिरं नयनयोरभ्यस्तमामीलनं
रोदुं शिक्षितमादरेण हसितं मौनेऽभियोगः कृतः ।
धैर्यं कर्तुमपि स्थिरीकृतमिदं चेतः कथञ्चिन्मया
वद्धो मानपरिग्रहे परिकरः सिद्धिस्तु दैवस्थिता ॥ ९२ ॥

लुठद्भिः पतद्भिः वाष्पैः अम्बुभिः आकुलैः लोचनैः नयनैः वारितः प्रतिबद्धः । जीवायवेति पाठे जीवनायेत्यर्थः अनेन विनाहं न जीवामीति धियेति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ९० ॥

तन्वङ्ग्रेति । तन्वङ्ग्या कृशाङ्ग्या गुरूणां श्वशुरादीनां सन्निधौ समीपे यत् नयनजं वारि अश्रुजलं कान्तवियोगजमिति भावः संस्तम्भितं संवृतम्, अन्तर्गलितेन अन्तःपतितेन तेन वारिणा अनुषङ्गोद्भवः अनुषङ्गात् सततचिन्तनात् उत्पत्तिर्यस्य तथाभूतः मन्मथशिखी मदनाग्निः सिक्तः, ततश्च मुखेन निरस्यमानाः निर्वाप्यमाणाः किरणाः शिखा यस्य तथाभूतस्य तस्य मन्मथशिखिनः एषा धूमावलिः धूमनिचयः श्वासे निःश्वासमारुते तन्वङ्ग्या इति य आमोदः सौरभं तेन समाकुलाः सङ्कुलाः समयताः ये अलयः भ्रमराः तेषां निकरः समूह एव व्याजः छलं तेन उद्गताः निर्गताः इति मन्ये सम्भावयामि । उत्प्रेक्षालङ्कारः । शार्दूलविक्रीडितं वृत्तम् ॥ ९१ ॥

भ्रूभेद इति । मया भ्रूभेदः भ्रुवोर्भङ्गो कौटिल्यमित्यर्थः रचितः कृतः, नयनयोः आजन्मनं निमीलनं चिरम् अभ्यस्तम्, आदरेण हसितं हासं रोदुं शिक्षितं, मौने तूष्णीम्भावे अभियोगः यत्नः कृतः,

देशैरन्तरिता शतैश्च सरितामुर्वीभृतां काननै-
र्यत्नेनापि न याति लोचनपथं कान्तेति जानन्नपि ।
उद्ग्रीवश्चरणाङ्गुलीरुडवसुधः कृत्वाऽऽयुपूर्णौ दृशौ
तामाशां पथिकस्तथापि किमपि ध्यायन्मुहुर्वीक्षते ॥ ९३ ॥

कोपस्त्वया हृदि कृतो यदि पङ्कजाक्षि!
सोऽस्तु प्रियस्तव किमत्र विधेयमन्यत् ।
आश्लेषमर्पय मदर्पितपूर्वमुच्चैः
मह्यं समर्पय मदर्पितचुम्बनञ्च ॥ ९४ ॥

दृढमपि चेतः धैर्यम् कर्तुम् अवलम्बितुं धर्तुमित्यपि पाठः। स्खलीकृतं निश्चितम् इत्थं मानपरिग्रहे प्रियं प्रति कोपविधाने परिकरः कटिबन्धः उद्योग इति यावत् बद्धः कृतः, तु किन्तु सिद्धिः साफल्यं दैवे स्थिता दैवाधीनेत्यर्थः, कियता कृतकार्या भवामीति न जाने दैववेव तद् जानातीति भावः। अथ मानः कर्तुं न शक्यते इति वादिनीं सखीं प्रति मुग्धाया नायिकाया उक्तिरियम्। शार्दूलविक्रीडितं वृत्तम् ॥ ९२ ॥

देशैरिति। कान्ता प्रेयसी देशैः जनपदैः सरितां नदीनां उर्वीभृतां पर्वतानाञ्च शतैः काननैः अरण्यैश्च अन्तरिता व्यवहिता बहुदूरवर्त्तिनीति यावत् अतएव यत्नेनापि लोचनपथं दृष्टिपथं न याति न गच्छति न द्रष्टुं शक्यते इति भावः इति जानन्नपि पथिकः तथापि उद्ग्रीवः उन्नमितग्रीवः चरणाङ्गुलीरुडवसुधः चरणाङ्गुलीभिः रुद्धा आक्रमिता वसुधा भूमिर्येन तथोक्तः किमपि ध्यायन् चिन्तयन् आयुपूर्णौ दृशौ नयने कृत्वा सन् पुनः पुनः तामाशां दिशं दृष्ट्वा कान्ता तिष्ठतीति भावः वीक्षते पश्यति। शार्दूलविक्रीडितं वृत्तम् ॥ ९३ ॥

कोप इति। हे पङ्कजाक्षि! पद्मनेत्र! यदि त्वया हृदि मनसि कोपः कृतः, स कोपः तव प्रियः अस्तु भवतु हृदयप्रारब्धात्

जरद्दयं मृगदृशः कदलस्य काण्डौ
मध्यश्च वेदिरतुलं स्तनयुग्ममस्याः ।
लावण्यवारिपरिपूरितशातकुम्भ-
कुम्भौ मनोजनृपतेरभिषेचनाय ॥ ९५ ॥

चपलहृदये ! किं स्वातन्त्र्यात्तथा गृहमागतः
चरणपतितः प्रेमार्द्रार्द्रैः प्रियः समुपेक्षितः ।
तदिदमधुना यावज्जीवं निरस्तसुखोदया
रुदितशरणा दुर्जातीनां सहस्व रुषां फलम् ॥ ९६ ॥

नाङ्कमिति भावः, अत्र विषये अन्यत् किं विशेषं कर्तव्यं न विमर्शः कर्तव्यमस्तीत्यर्थः । किन्तु मदर्पितपूर्वं पूर्वं मया दत्तम् उच्चैः नाङ्कमिति यावत् आश्लेषम् आलिङ्गनं मदर्पितचुम्बनञ्च मया दत्तं चुम्बनञ्च मह्यं समर्पय देहि, यदा मया सह ते सम्बन्धो नष्टः तदा मदीयम् ऋणं परिशोधयेति भावः । वसन्ततिलकं वृत्तम् ॥ ९४ ॥

जरद्दयमिति । अस्याः मृगदृशः मृगनयनायाः जरद्दयं कदलस्य रम्भातरोः काण्डौ स्तम्भौ, मध्यं वेदिः परिष्कृता भूमि-रिति कुमारसम्भवटीकायां मल्लिनाथः परिष्कृता भूमिः वेदीति यावदिति केचित् । तथा अतुलं निरुपमं स्तनयुग्मं मनोजनृपतेः मदनराजस्य अभिषेचनाय स्नानाय लावण्यवारिभिः परिपूरितौ शातकुम्भकुम्भौ सुवर्णकलशौ । अतिसुन्दरीयमिति भावः । वसन्त-तिलकं वृत्तम् ॥ ९५ ॥

चपलहृदये इति । हे चपलहृदये ! चञ्चलचित्ते ! गृहमागतः चरणपतितः प्रेम्णा प्रणयेन आर्द्रार्द्रैः अतिप्रेमवानित्यर्थः प्रियः स्वातन्त्र्यात् स्वेच्छया तथा तेन प्रकारेण किं अयं समुपेक्षितः अव-ज्ञीरितः ? तत् तस्मात् अधुना इदानीं यावज्जीवं निरस्तः नाशितः सुखोदयः यया तादृशी तया रुदितं रोदनमेव शरणम् आश्रयः यति-

रात्रौ वारिभरालसास्वदरवोद्विग्नेन जाताश्रुणा
पान्थेनात्ममनोजदुःखपिशुनं गीतं तथोत्कण्ठया ।
आस्तां जीवितहारिणः प्रवसनालापस्य सङ्कीर्त्तनं
मानस्यापि जलाञ्जलिः सरभसं लोकेन दत्तो यथा ॥९७॥

हारो जलार्द्रवसनं नलिनीदलानि
प्रालेयशीकरमुचस्तुहिनांशुभासः ।
यस्येन्धनानि सरसानि च चन्दनानि
निर्वाणमेष्यति कथं स मनोभवाग्निः ॥ ९८ ॥

रित्यर्थः यस्याः तथाभूता सती दृढं दुर्जातीनां दुष्टानां कर्षां क्रोधानां फलं प्रियविरहदुःखमिति भावः सकृच्च प्राप्तुहि । हरिणीवृत्तम् ॥ ९६ ॥

रात्राविति । रात्रौ रजन्यां वारिभरेण जलभारेण अलसानां मन्थराणां अम्बुदानां मेघानां रवेण गर्जितेन उद्विग्नः तेन अतएव जाताश्रुणा सजलनयनेन पान्थेन पथिकेन विरहिणेति भावः उत्कण्ठया प्रियाविरहजनितयेति भावः आत्मनः स्वस्य मनोजदुःखपिशुनं मदनसन्तापसूचकं तथा तेन प्रकारेण गीतं रुदितमिति भावः, यथा जीवितहारिणः प्राणनाशकस्य प्रवसनालापस्य प्रवासकथायाः सङ्कीर्त्तनम् आस्तां तिष्ठतु, लोकेन तत्सखेनेति भावः मानस्यापि जलाञ्जलिः सरभसं सवेगं सत्वरमित्यर्थः दत्तः । प्रियाविरहदुःखमतीव दुःसहमिति मानोऽपि परित्यक्त इति निष्कर्षः । शार्दूलविक्रीडितं वृत्तम् ॥ ९७ ॥

हार इति । हारः मौक्तिकमाला, जलार्द्रं वसनं, नलिनीदलानि पद्मिनीपत्राणि, प्रालेयशीकरमुचः शिशिरकरवर्षिणः तुहिनांशोश्चन्द्रस्य भासः किरणाः, सरसानि आर्द्राणि चन्दनानि च य

तन्वी शरत्त्रिपथगा पुलिने कपोतौ
लोले दृशौ रुचिरचञ्चलखञ्जरीटौ ।
तद्बन्धनाय सुचिरार्पितसुभ्रुचाप-
चाण्डालपाशयुगलाविव शून्यकर्णौ ॥ ९९ ॥
हारोऽयं हरिणाक्षीणां लुठति स्तनमण्डले ।
मुक्तानामप्यवस्थेयं के वयं स्मरकिङ्कराः ॥ १०० ॥
इत्यमरशतकं परिपूर्णम् ।

इत्यनानि काष्ठानि, स मनोभवाग्निः कामानलः कथं निर्वाणम् इष्यति ? नैव प्राप्नुयादित्यर्थः । वसन्ततिलकं वृत्तम् ॥ ९८ ॥

तन्वीति । तन्वी कृशाङ्गी कान्ता शरत्त्रिपथगा शरत्कालीनगङ्गा, कपोतौ पुलिने सैकते, लोले चञ्चले दृशौ नयने रुचिरौ मनोज्ञौ चञ्चलौ खञ्जरीटौ पक्षिविशेषौ, तयोः खञ्जरीटयोर्बन्धनाय सुचिरम् अर्पितः योजितः शोभना भ्रुरेव चापः धनुः येन तादृशो यश्चाण्डालः व्याधः तस्य पाशयुगलाविव शून्यकर्णौ तिष्ठत इति शेषः । वसन्ततिलकं वृत्तम् ॥ ९९ ॥

हार इति । हरिणाक्षीणां मृगनयनानां कान्तानां स्तनमण्डले अयं हारः मौक्तिकसरः लुठति, मुक्तानामपि मौक्तिकहाराणामपि विद्धानामपीति ध्वनिः इयम् अवस्था, स्मरकिङ्कराः कामदासाः वयं के ? अस्माकमीदृशा दशा भवतीति किं वक्तव्यमिति भावः । अनुष्टुब्वृत्तम् ॥ १०० ॥

इति वि, ए उपाधिधारिणा श्रीजीवानन्दविद्यासागरभट्टाचार्येण विरचिता अमरशतकव्याख्या समाप्ता ।

शृङ्गारशतकम् ।

—o—

भ्रूभङ्गस्वयम्भुहरयो हरिणेक्षणानां
येनाक्रियन्त सततं गृहकर्मदासाः ।
वाचामगोचरचरित्रविचित्रताय
तस्मै नमो भगवते कुसुमायुधाय ॥ १ ॥
स्मितेन भावेन च लज्जया भिया
पराङ्मुखैरर्द्धकटाक्षवीक्षणैः ।
वचोभिरीर्ष्याकलहेन लीलया
समस्तभावैः खलु बन्धनं स्त्रियः ॥ २ ॥

भ्रूभङ्गेति । येन भ्रूभङ्गस्वयम्भुहरयः भ्रूविभङ्गैकशरणाः हरिणेक्षणानां मृगनयनानां सततं गृहकर्मसु दासाः किङ्कराः क्रियन्त कृताः, वाचां वाक्यानाम् अगोचरो चरित्रस्य विचित्रता वैचित्र्यं यस्य तादृशाय तस्मै भगवते सर्वप्रभवे मकरध्वजाय मदनाय नमः । वसन्ततिलकं वृत्तं, श्रेयं वसन्ततिलकं तभजा जगौ गः इति तल्लक्षणात् ॥ १ ॥

स्मितेनेति । स्त्रियः नार्यः स्मितेन मृदुहासेन, भावेन निर्विकाराङ्गके चित्ते भावः प्रथमविक्रियेत्युज्ज्वलचेष्टेन विलासविशेषेण वा, लज्जया भिया भयेन, पराङ्मुखैः तत्प्रत्यावर्तनैः, अर्द्धकटाक्षेण वीक्षणैः अवलोकनैः, वचोभिः वाक्यैः, ईर्ष्याकलहेन, लीलया हृदयविकारेणेत्यर्थः (किं बहुना) समस्तभावैः सर्वैः प्रकारैरित्यर्थः बन्धनं संयमनं खलु पुरुषस्येति शेषः । स्मितादिभिः भावैः मुग्धाः स्त्रीभिर्वशीकृताः

भ्रूचातुर्य्याकुञ्चिताक्षाः कटाक्षाः
स्निग्धा वाचो लज्जिताश्चैव हासाः ।
लीलामन्दं प्रस्थितं च स्थितञ्च
स्त्रीणामेतद् भूषणञ्चायुधञ्च ॥ ३ ॥
क्वचित् सुभ्रूभङ्गैः क्वचिदपि च लज्जापरिणतैः
क्वचिद्भीतित्रस्तैः क्वचिदपि च लीलाविलसितैः ।
नवोढ़ानामेभिर्वदनकमलैर्नेत्रचलितैः
स्फुरल्लीलालीनां प्रकरपरिपूर्णा इव दृशः ॥ ४ ॥

क्रियन्ते इति तात्पर्य्यम् । वंशस्थविलं वृत्तं, वदन्ति वंशस्थविलं जतौ जरावितीति तल्लक्षणात् ॥ २ ॥

भ्रूचातुर्य्येति । भ्रुवोश्चातुर्य्येण भङ्गिविशेषेण आकुञ्चितानि सङ्कुचितानि अक्षीणि नेत्राणि येषु तथाविधाः कटाक्षाः, स्निग्धाः प्रेमपूर्णा इति यावत् वाचः वाक्यानि, लज्जिताः लज्जासंवलिताः हासाः, लीलया विलासविशेषेण मन्दं मन्थरं प्रस्थितं गमनं, स्थितम् अवस्थानञ्च एतत् सर्वं स्त्रीणां भूषणम् अलङ्करणम् आयुधम् अस्त्रञ्च इवं मनोहरणात् कामाविशेषेण पोड़नाच्चेति भावः । शालिनीवृत्तं, मात्तौ गौ चेच्छालिनी वेदलोकैरिति तल्लक्षणात् ॥ ३ ॥

क्वचिदिति । क्वचित् सुभ्रूभङ्गैः भ्रूकौटिल्यरचितैः, क्वचिदपि लज्जया परिणतैः सङ्कुचितैरिति यावत्, क्वचित् भीतित्रस्तैः भयचकितैः, क्वचिदपि लीलया भङ्गिविशेषेण विलसितैः स्फुरितैः, नवोढ़ानां मुग्धानां नेत्राणि चलितानि येषु तथोक्तैः चञ्चलनयनैरित्यर्थः, एभिः वदनकमलैः मुखसरोजैः दृशः दर्शनव्यापाराः दृष्टिप्रसरा इति यावत्, स्फुरन्ती प्रसरन्ती लीला विलासो येषां तादृशानाम् अलीनां भ्रमराणां प्रकरैः सङ्घैः परिपूर्णा इव व्याप्ता इव दृश्यन्ते इति शेषः ।

वक्त्रं चन्द्रविकासि पङ्कजपरीहासक्षमे लोचने
वर्णः स्वर्णमपाकरिष्णुरलिनीजिष्णुः कचानाञ्चयः ।
वक्षोजाविभकुम्भसम्भ्रमहरौ गुर्वी नितम्बस्थली
वाचां हारि च मार्दवं युवतिषु स्वाभाविकं मण्डनम् ॥५॥
स्मितं किञ्चिदञ्चे सरलतरलो दृष्टिविभवः
परिस्पन्दो वाचामभिनवविलासोक्तिसरसः ।
गतीनामारम्भः किसलयितलीलापरिकरः
स्फुरन्त्यास्तारुण्यं किमिह न हि रम्यं मृगदृशः ॥ ६ ॥

शिखरिणीवृत्तं, रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणीति तल्लक्षणात् ॥ ४ ॥

वक्त्रमिति । चन्द्रवत् विकसति शोभते इति तथोक्तं वक्त्रं वदनं, लोचने नेत्रे पङ्कजेषु परिहासः अवज्ञया हासः तस्य क्षमे योग्ये कुवलयिनी इति भावः, वर्णः कान्तिः स्वर्णं काञ्चनम् अप करिष्णुः जिष्णुः, कचानां केशानां चयः सङ्घः अलिनी भ्रमरमाला तस्याः जिष्णुः विजेता, वक्षोजौ कुचौ इभकुम्भयोः गजकुम्भयोः सम्भ्रमहरौ गौरवजनिनौ, नितम्बस्थली नितम्बदेशः गुर्वी महती, वाचां वचनानां हारि मनोहारकं मार्दवं मृदुत्वम्, एतत् सर्वं युवतिषु तरुणीषु स्वाभाविकं सहजं मण्डनं भूषणम् । शार्दूलविक्रीडितं वृत्तम् । सूर्याश्वैर्यदि मः सजौ सतगाः शार्दूलविक्रीडितमिति तल्लक्षणात् ॥ ५ ॥

स्मितमिति । वक्त्रे वदने किञ्चित् मन्दं स्मितं हासं सरलतरलः सहजचपलः दृष्टिविभवः दृक्प्रचारः, वाचां परिस्पन्दः कथनम् अभिनवया विलासोक्त्या विलासभाषितेन सरसः मधुर इत्यर्थः, गतीनां पदविक्षेपाणाम् आरम्भः प्रक्रमः किञ्चलयितः पल्लवितः विस्फुरित इति यावत् लीलापरिकरः विलासभङ्गिः यत्र तादृशः,

दृष्टा दृष्टिमधो ददाति कुरुते नालापमाभाषिता
शय्यायां परिवर्त्य तिष्ठति बलादालिङ्गिता वेपते ।
निर्य्यान्तीषु सखीषु वासभवनान्निर्गन्तुमेवेहते
जाता वामतयैव सम्प्रति मम प्रीत्यै नवोढ़ा प्रिया ॥ ७ ॥
द्रष्टव्येषु किमुत्तमं ? मृगदृशां प्रेमप्रसन्नं मुखं
घ्रातव्येष्वपि किं ? तदास्यपवनः स्राव्येषु किं ? तद्वचः ।
किं स्वाद्येषु ? तदोष्ठपल्लवरसः स्पृश्येषु किं ? तत्तनुः
ध्येयं किं ? नवयौवनात् सहृदयैः सर्वत्र तद्विभ्रमः ॥ ८ ॥

अतः तारुण्य यौवनं स्पृशन्त्याः प्राप्नुवत्याः मृगदृशः कामिन्याः दृष्ट जगति किं रम्यं न हि, सर्वमेव रमणीयमित्यर्थः । शिखरिणी-वृत्तम् ॥ ६ ॥

दृष्टेति । नवोढ़ा अभिनवविवाहिता प्रिया दृष्टा निरीक्षिता सती मयेति शेषः अधः दृष्टं ददाति अधोमुखी भवतीत्यर्थः आभाषिता आलपने कृतप्रयत्ना इति भावः आलापं न कुरुते उत्तरं न ददातीत्यर्थः शय्यायां परिवर्त्य स्थित्वा, बलात् बलमाश्रित्य यत्नेन पञ्चभी । आलिङ्गिता आश्लिष्टा सती वेपते कम्पते सखीषु वासभवनात् निर्य्यान्तीषु बहिषु निर्गन्तुमेव ईहते चेष्टते । अतः सम्प्रति वामतयैव प्रतिकूलतयैव मम प्रीतये आनन्दाय जाता । शार्दूलविक्रीड़ितं वृत्तम् ॥ ७ ॥

द्रष्टव्येषिति । द्रष्टव्येषु दर्शनीयेषु वस्तुषु मध्ये उत्तमम् उत्कृष्टं किम् ? मृगदृशां मृगाक्षीणां प्रेमसुधा प्रणयेन प्रसन्नं विकसरं मुखम् उत्तममिति शेषः । घ्रातव्येषु आघ्राणीयेषु वस्तुषु अपि मध्ये किम् उत्तममिति शेषः ? तासां मृगदृशाम् आस्यपवनः मुखमारुतः उत्तम इति शेषः । स्राव्येषु श्रवणीयेषु वस्तुषु मध्ये किम् उत्तममिति शेषः ? तासां मृगदृशां वचः वचनम् उत्तममिति शेषः ।

एताः स्खलद्वलयसंहतिमेखलोत्थ-
झङ्कारनूपुररवाहृतराजहंसाः ।
कुर्वन्ति कस्य न मनो विवशं तरुण्यो
विस्रस्तमुग्धहरिणीसदृशैः कटाक्षैः ॥ ९ ॥
कुङ्कुमपङ्ककलङ्कितदेहा गौरपयोधरकम्पितहारा ।
नूपुरहंसरणत्पदपद्मा कं न वशीकुरुते भुवि रामा ॥ १० ॥

खाद्येषु आस्वादनीयेषु वस्तुषु मध्ये उत्तमं किम् ? तासां मृगदृशां ओष्ठपल्लवस्य रसः उत्तम इति शेषः । स्पृश्येषु स्पर्शविषयेषु वस्तुषु मध्ये किम् उत्तममिति शेषः ? तासां मृगदृशां तनुः अङ्गम् उत्तमेति शेषः । सहृदयैः सचेतोभिः जनैः ध्येयं चिन्तनीयं किम् ? नवयौवनात् सर्वत्र सर्वेषु अङ्गेषु तासां विलसः विलास इत्यर्थः । उक्तिमत्युक्तिपरं पद्यमेतत् । शार्दूलविक्रीडितं वृत्तम् ॥ ८ ॥

एता इति । स्खलता चलतां वलयानां करभूषणविशेषाणां संहतेः समूहात् तथा मेखलायाः काञ्च्याः उत्थेन उद्गतेन झङ्कारेण नूपुराणां रवेण च आहृताः राजहंसाः याभिः तादृश्यः एताः तरुण्यः विस्रस्तानां निःशङ्कितानां मुग्धानां हरिणीनां मृगीणां सदृशैः कटाक्षैः कस्य जनस्य मनः विवशं न कुर्वन्ति ? सर्वस्यैव कुर्वन्तीत्यर्थः । वसन्ततिलकं वृत्तम् ॥ ९ ॥

कुङ्कुमेति । कुङ्कुमाना पङ्कैः द्रवैः कलङ्कितः कलुषितः देहो यस्याः तथोक्ता गौरयोः पयोधरयोः स्तनयोः कम्पितः तरलितः हारो यस्याः तादृशी, नूपुरौ एव हंसौ ताभ्यां रणती खनती पादपद्मे चरणकमले यस्याः तथाभूता रामा कान्ता भुवि पृथिव्यां कं जनं न वशीकुरुते ? सर्वमेव वशीकुरुते इत्यर्थः । दोधकं वृत्तं, दोधकमाहुर्वृत्तं भक्तिनयादुगाविति तल्लक्षणात् ॥ १० ॥

नूनं हि ते कविवरा विपरीतबोधा
ये नित्यमाहुरबला इति कामिनीनाम् ।
याभिर्विलोलतरतारकदृष्टिपातैः
शक्रादयोऽपि विजितास्त्वबलाः कथं ताः ? ॥ ११ ॥
नूनमाज्ञाकरस्तस्याः सुभ्रुवो मकरध्वजः ।
यतस्तन्नेत्रसञ्चारसूदितेषु प्रवर्त्तते ॥ १२ ॥
केया संयमिनः श्रुतेरपि परं पारं गते लोचने
अन्तर्वक्त्रमपि स्वभावशुचिभिः कीर्णं द्विजानां गणैः ।

नूनमिति । ये कामिनीनाम् अबला इति नित्यं सततम् आहुः, ते कविवराः कविश्रेष्ठाः विपरीतबोधाः विपर्य्यस्तबुद्धयः नूनं हि निश्चितमेव । याभिः कामिनीभिः विलोलतरा चञ्चलतरा तारका येषु तादृशैः दृष्टिपातैः शक्रादयः इन्द्रादयः अपि का कथान्येषामिति भावः विजिताः वशीकृताः, ताः अबलाः कथम् ? नैवाबला इत्यर्थः । वसन्ततिलकं वृत्तम् ॥ ११ ॥

नूनमिति । मकरध्वजः कामः तस्याः सुभ्रुवः कान्तायाः आज्ञाकरः किङ्करः इति नूनम् उत्प्रेक्षे । यतः यस्मात् तस्याः सुभ्रुवः नेत्रसञ्चारेण सूदितेषु व्यथितेषु जनेष्विति शेषः सूचितेष्विति पाठे सूचितः संहितः दृग्भ्यः शरः यत्र तत् यथा तथा प्रवर्त्तते प्रसरति । अनुष्टुब्वृत्तम् ॥ १२ ॥

केया इति । हे तन्वि ! कृशाङ्गि ! तव केयाः संयमिनः संयताः वेण्याकारेण बद्धा इति यावत् इन्द्रियसंयमवन्त इति ध्वनिः । लोचने नेत्रे श्रुतेरपि श्रवणेन्द्रियस्यापि वेदस्यापीति ध्वनिः परं पारं गते, आकर्णकृष्टे इति यावत् श्रुतिपारदृश्वनी इति ध्वनिः वक्त्रं वदनमपि स्वभावशुचिभिः द्विजानां दन्तानां ब्राह्मणानाञ्चेति ध्वनिः गणैः, दन्तविप्राद्यजा द्विजा इत्यमरः । अन्तः कीर्णं व्याप्तं

मुक्तानां सततादिवासरुचिरं वक्षोजकुम्भद्वयम्
इत्थं तन्वि ! वपुः प्रयान्तमपि ते क्षोभं करोत्येव नः ॥१३॥
मुग्धे ! धनुष्मती केयमपूर्वापि च दृश्यसे ।
यथावद्धंसि चेतांसि गुणैरेव न सायकैः ॥ १४ ॥
सति प्रदीपे सत्यग्नौ सत्सु तारारवीन्दुषु ।
विना मे मृगशावाक्ष्या तमोभूतमिदं जगत् ॥ १५ ॥

वक्षोजकुम्भद्वयं स्तनकलशयुगलं मुक्तानां मौक्तिकसराणां सिद्धानामेति ध्वनिः सततादिवासेन सततसङ्गेन रुचिरं मनोहरम् इत्थं प्रयान्तं गौण्यमपि प्रकृष्टयमपरमर्षीति ध्वनिः ते तव वपुः शरीरं नः अस्माकं क्षोभं व्यथां करोत्येव त्वत्प्राप्तिलालसयेति भावः । अत्र क्षोभहेतुं विना क्षोभकार्योत्पत्तेर्विभावनालङ्कारः, क्षोभहेतौ सत्यपि तत्फलाभावात् विशेषोक्तिरलङ्कारश्चेत्यनयोः सङ्करः । तदुक्तं दर्पणे । विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते इति, सति हेतौ फलाभावो विशेषोक्तिस्तथा द्विधेति च । आर्दूलविक्रीडितं वृत्तम् ॥ १३ ॥

मुग्धे इति । हे मुग्धे ! का इयम् अपूर्वा अद्भुता धनुष्मती दृश्यसे त्वमिति शेषः । तथाहि गुणैः सौन्दर्यादिभिः मौर्वीभिश्चेति ध्वनिः एव यथावद् यथोचितं चेतांसि मनांसि हंसि विध्यसि, न सायकैः न शरैः हंसीति पूर्वेणान्वयः । धनुष्मान् शरेणैव लक्ष्यं विध्यति त्वं गुणैरेवेति तव धनुष्मत्वम् अपूर्वमिति भावः । अनुष्टुब्वृत्तम् ॥ १४ ॥

सतीति । प्रदीपे सति अग्नौ सति तारारवीन्दुषु नक्षत्रसूर्यचन्द्रमःसु सत्सु सत्यपि मृगशावाक्ष्या कान्तया विना इदं जगत् मे मम तमोभूतम् अन्धकारमयं जातमिति शेषः । विरचित्थ उक्तिरियम् । अत्रापि विभावनाविशेषोक्त्योः सङ्करः । अनुष्टुब्वृत्तम् ॥ १५ ॥

उद्वृत्तःस्तनभार एष तरले नेत्रे चले भ्रूलते
रागान्धेषु तदोष्ठपल्लवमिदं कुर्वन्तु नाम व्यथाम् ।
सौभाग्याक्षरपंक्तिरेव लिखिता पुष्पायुधेन स्वयं
मध्यस्थापि करोति तापमधिकं रोमावली केन सा ॥१६॥
गुरुणा स्तनभारेण मुखचन्द्रेण भास्वता ।
शनैश्चराभ्यां पादाभ्यां रेजे ग्रहमयीव सा ॥ १७ ॥
तस्याः स्तनौ यदि घनौ जघनं विहारि
वक्त्रं च चारु तव चित्त ! किमाकुलत्वम् ।

उद्वृत्त इति । उद्वृत्तः उन्नतः अत्युन्नतत्वादिति भावः एष स्तनभारः तरले चञ्चले नेत्रे चले भ्रूलते तत् रक्षन्तिति भावः इदं ओष्ठपल्लवम् एतानि रागान्धेषु प्रणयान्धेषु जनेषु व्यथां पीड़ां कुर्वन्तु नाम । पुष्पायुधेन कामेन स्वयं सौभाग्याक्षरपङ्क्तिरेव इयं सुभगा भवेदित्येवं वर्णावली वेत्यर्थः । अत्रैवशब्द इवार्थः । लिखिता मध्यस्था मध्यदेशवर्त्तिनीत्यर्थः उदासीनेति ध्वनिः सा रोमावली केन हेतुना अधिकं तापं करोति जनयति ? कामिन्या रोमावलीदर्शनस्यातीवोद्दीपकत्वादिति भावः । अत्र माध्यस्थ्यस्य तापहेतुत्वाभावौचित्येऽपि तापकारकत्वेन कीर्त्तनात् विभावनालङ्कारः । शार्दूलविक्रीड़ितं वृत्तम् ॥ १६ ॥

गुरुणेति । सा कान्ता गुरुणा महता वृहत्स्तनेन च भास्वता कान्तिमता सूर्य्येण च मुखचन्द्रेण मुखेन चन्द्रेणैव तथा शनैश्चराभ्यां मन्दगतिभ्यां तदाख्यग्रहाभ्याञ्च पादाभ्यां चरणाभ्यां ग्रहमयीव गुरुचन्द्रसूर्य्यशनैश्चरग्रहरूपेव रेजे शुशुभे । अत्र श्लेषानुप्राणितोत्प्रेक्षालङ्कारः । अनुष्टुब्वृत्तम् ॥ १७ ॥

तस्या इति । हे चित्त ! तस्याः कान्तायाः स्तनौ यदि घनौ निविड़ौ, जघनं कटिपुरोभागः यदि विहारि विश्वस्य मनोहारकं,

पुण्यं कुरुष्व यदि तेषु तवास्ति वाञ्छा
पुण्यैर्विना न हि भवन्ति समीहितार्थाः ॥ १८ ॥

मात्सर्यमुत्सार्य विचार्य कार्यम्
आर्याः समर्यादमिदं वदन्तु ।
सेव्या नितम्बा किमु भूधराणाम् ?
उत स्मरस्मेरविलासिनीनाम् ? ॥ १९ ॥

संसारेऽस्मिन्नसारे परिणतितरले हे गती पण्डितानां
तत्त्वज्ञानामृताभ्यःपुलकितमनसां यातु कालः कदाचित् ।
नोचेन्मुग्धाङ्गनानां स्तनजघनभराभोगसम्भोगिनीनां
स्थूलोपस्थस्थलीषु स्खलितकरतलस्पर्शलोलोद्यतानाम् ॥२०॥

वक्त्रं वदनञ्च यदि चारु मनोज्ञं, तदा तव व्याकुलत्वं व्याकुलत्वं किम् ? किमर्थम् ? कथं त्वं व्याकुलीभवसीत्यर्थः यदि तेषु स्तनादिषु भोक्तव्येष्विति भावः तव वाञ्छा अभिलाषः अस्ति, तदा पुण्यं कुरुष्व, पुण्यैः विना समीहितार्थाः इष्टार्थाः न हि भवन्ति । वसन्ततिलकं वृत्तम् ॥ १८ ॥

मात्सर्यमिति । आर्याः विद्वांसः मात्सर्यं विद्वेषम् उत्सार्य त्यक्त्वा कार्यं विचार्य विविच्य भूधराणां पर्वतानां किमु ? उत अथवा स्मरेण कामेन स्मेराः स्मदुच्छ्वासिन्यः याः विलासिन्यः कामिन्यः तासां नितम्बाः सेव्याः इदं समर्यादं सयुक्तिकं वदन्तु । समर्यादमुदाहरन्ति वा पाठः । उपजातिवृत्तम् ॥ १९ ॥

संसारे इति । अस्मिन् असारे परिणतितरले परिणामचपले अचिरपरिणामिनि क्षणध्वंसिनीति यावत् संसारे पण्डितानां विदुषां हे गती उपायौ कालः क्षणः अस्तु इति भावः । कदाचित् तत्त्वज्ञानमेव अमृतं तदेव अम्भः जलं तेन तत्पानेनेति भावः पुलकितम् आनन्दितं

मुखेन चन्द्रकान्तेन महानीलैः शिरोरुहैः ।
पाणिभ्यां पद्मरागाभ्यां रेजे रत्नमयीव सा ॥ २१ ॥
सम्मोहयन्ति मदयन्ति विडम्बयन्ति
निर्भर्त्सयन्ति रमयन्ति विषादयन्ति ।
एताः प्रविश्य सदयं हृदयं नराणां
किन्नाम वामनयना न समाचरन्ति ॥ २२ ॥

मनो येषां तथाभूतानां सतां कालः यातु गच्छतु । नोचेत् तदा स्तनयोर्जघनभरश्च विशालजघनश्च आभोगे विस्तरे यः सम्भोगः सम्यग्भोगः तद्वतीनां सुधाङ्गनानां सुन्दरीणां स्थूलोपस्थस्थलीषु विशालयोनिषु स्थगितेन स्थितेन निक्षिप्तेनेति यावत् करतलेन यः स्पर्शः तस्मिन् लोल सतृष्णं चञ्चलं वा, लोलश्चपलतृष्णयोरित्यमरः । उद्यतानां प्रवृत्तानां सतां कालः वार्त्तिकेन सम्बन्धः । स्रग्धराछन्दः, म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयमिति तल्लक्षणात् ॥ २० ॥

मुखेनेति । सा नारी चन्द्रकान्तेन चन्द्रवत् रमणीयेन तदाख्यमणिना च, महानीलैः अतिनीलवर्णैः नीलकान्तमणिभिश्च शिरोरुहैः केशैः तथा पद्मरागाभ्यां पद्मवत् रागः कान्तिर्ययोस्ताभ्यां तदाख्यरत्नाभ्याञ्च पाणिभ्यां भुजाभ्यां रत्नमयीव चन्द्रकान्तनीलकान्तपद्मरागरत्नखचितेव रेजे शुशुभे । श्लेषानुप्राणितोत्प्रेक्षा । अनुष्टुब्वृत्तम् ॥ २१ ॥

सम्मोहयन्तीति । एताः वामनयनाः कुटिलनेत्राः सुन्दरनयना वा नार्य्यः नराणां पुंसां हृदयं सदयं प्रविश्य किं नाम न समाचरन्ति ? सर्वमेव समाचरन्तीत्यर्थः । तथाहि सम्मोहयन्ति ज्ञानशून्यान् कुर्वन्ति, मदयन्ति उल्लासयन्ति मत्तान् कुर्वन्ति वा, विडम्बयन्ति प्रतारयन्ति, निर्भर्त्सयन्ति तिरस्कुर्वन्ति, रमयन्ति रतं कारयन्ति, विषादयन्ति

विश्रम्य विश्रम्य वनद्रुमाणां
छायासु तन्वी विचचार काचित् ।
स्तनोत्तरीयेण करोद्धृतेन
निवारयन्ती शशिनो मयूखान् ॥ २३ ॥
अदर्शने दर्शनमात्रकामा
दृष्ट्वा परिष्वङ्गरसैकलोला ।
आलिङ्गितायां पुनरायताक्ष्याम्
आशाम्महे विग्रहयोरभेदम् ॥ २४ ॥

विषयान् कुर्वन्ति च । दीपकालङ्कारः । तदुक्तं दर्पणे । अप्रस्तुत-प्रस्तुतयोर्दीपकन्तु निगद्यते । अथ कारकमेकं स्यादनेकासु क्रियासु चेदिति । वसन्ततिलकं वृत्तम् ॥ २२ ॥

विश्रम्येति । काचित् तन्वी वनद्रुमाणां वनतरूणां छायासु विश्रम्य विश्रम्य करोद्धृतेन हस्तेन ऊर्द्ध्वं नीतेन स्तनोत्तरीयेण स्तनावरणस्य अञ्चलेनेत्यर्थः शशिनः चन्द्रस्य मयूखान् किरणान् निवारयन्ती विचचार । विरहिण्या दर्शनमिदं, तस्या एव चन्द्रमयूखस्योद्दीपकत्वेन तद्वारणाय वसनाञ्चलाच्छादनस्यौचित्यादिति भावः । उपजातिवृत्तम् ॥ २३ ॥

अदर्शने इति । अदर्शने दर्शनाभावे आयताक्ष्या इति शेषः दर्शनमात्रकामाः दर्शनमेव परिष्वङ्गमिच्छन्तीति दर्शनमात्रकामाः दृष्ट्वा आयताक्ष्यामिति शेषः परिष्वङ्गः आलिङ्गनं तस्मिन् यः रसः स्वादः तत्र एकलोला अतितृष्णा इत्यर्थः आयताक्ष्यां विशालनयनायां कान्तायामिति शेषः आलिङ्गितायां पुनः विग्रहयोः शरीरयोः अभेदं विश्लेषाभावमित्यर्थः आशाम्महे आकाङ्क्षामः वयमिति शेषः । उपजातिवृत्तम् ॥ २४ ॥

मालती शिरसि जृम्भणोन्मुखी
चन्दनं वपुषि कुङ्कुमाविलम् ।
वक्षसि प्रियतमा मनोहरा
स्वर्ग एष परिशिष्ट आगतः ॥ २५ ॥

ऋतुवर्णनं तत्रादौ वसन्तः ।

परिमलभृतो वाताः शाखा नवाङ्कुरकोटयो
मधुरविरतोत्कण्ठा वाचः प्रियाः पिकपक्षिणाम् ।
विरलसुरतस्वेदोद्रेका बधूवदनेन्दवः
प्रसरति मधौ रात्र्यां जातो न कस्य गुणोदयः ॥२६॥

मालतीति । जृम्भणोन्मुखो विकासेन उच्चन्मुखा मालती पुष्पमालेति यावत् शिरसि, कुङ्कुमेन व्याविलं सम्पृक्तं चन्दनं वपुषि शरीरे, मनोहरा प्रियतमा वक्षसि यदि स्यादिति शेषः, तदा एषः परिशिष्टः अपरः स्वर्गः आगतः उपस्थितः । रथोद्धतावृत्तं, रात् परैर्नरलभे रथोद्धतेति तल्लक्षणात् ॥ २५ ॥

परिमलेति । मधौ वसन्ते रात्र्यां कस्य वस्तुन इति शेषः गुणोदयः गुणोत्कर्षः जातः मनु न प्रसरति न विजृम्भते ? अपितु सर्वस्यैवेत्यर्थः । तथाहि वाताः वायवः परिमलभृतः विविधपुष्पाणां मलयजानाञ्च सौरभशालिनः, शाखाः तरुविटपाः नवा अङ्कुराणां कोटिः अग्रावयवा यासु तथोक्ताः नवकिसलयविकासशालिन्य इति भावः पिकपक्षिणां पिकानां कोकिलानाम अन्येषाञ्च पक्षिणां मधुराः मनोहराः विरतोत्कण्ठा उत्कण्ठाचारण्यः यद्वा विशिष्टेषु रतेषु उत्कण्ठा औत्सुक्यं याभिः तथाभूताः प्रियाः प्रीतिदायिन्यः वाचः, तथा बधूना कामिनीनां वदनेन्दवः सुखचन्द्रमसः विरलः अल्पः सुरतात् स्वेदोद्रेकः घर्मसलिलोदयः येषु तादृशाः नातिशीतोष्णत्वात् सुखस्पर्शा इति भावः । मधौ वसन्ते प्रसरति सत्युज्जृम्भमाणे सति

मधुरयं मधुरैरपि कोकिला-
कलकलैर्मलयस्य च वायुभिः ।
विरहिणः प्रथिहन्ति शरीरिणो
विपदि हन्त सुधापि विषायते ॥ २७ ॥

आवासः किल किञ्चिदेव दयितापार्श्वे विलासालसः
कर्णे कोकिलकाकलीकलरवस्त्रेरा लतामण्डपाः ।
गोष्ठी सत्कविभिः समङ्कतिपयैः सेव्याः सितांशोः करा:
केषाञ्चित्सुखयन्ति नेत्रहृदये चैत्रे विचित्राः क्षपाः॥२८॥

रात्र्यां कस्य गुणोदयः न जात इत्यन्वयः समीचीन इति बोध्यम् । अत्र वाक्यार्थहेतुक काव्यलिङ्गमलङ्कारः । हरिणीवृत्तं, नसमरसलागः षड्भिर्हयैर्हरिणा मतेति तल्लक्षणात् ॥ २६ ॥

मधुरयमिति । अयं मधुरैरपि मधुरैः मनोहरैः कोकिलानां आकल-कलैः मलयस्य वायुभिश्च विरहिणः शरीरिणः प्राणिनः प्रथिहन्ति व्यथयन्तीति भावः । हन्त खेदे विपदि सुधापि अमृतमपि विषायते विषवत् आचरति । अत्र च विरहिणां विरह एव विपदिति बोध्यम् । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः । तदुक्तं दर्पणे । सामान्यं वा विशेषेण विशेषस्तेन वा यदि । कार्यञ्च कारणेनेदं कार्येण च समर्थ्यते । साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा तत इति ॥ २७ ॥

आवास इति । दयितायाः कान्तायाः पार्श्वे किञ्चिदेव कियत्-क्षणमपीति भावः विलासेन ततसङ्गजेनालस्यं विवशः आवासः अवस्थानं कर्णे कोकिलानां काकलीकलरवस्य सूक्ष्मकलध्वनिना स्त्रेराः विकसन्त्यः स्त्रिग्धाः लतामण्डपाः, कतिपयैः सत्कविभिः सभ्यैः सेव्या गोष्ठी सभा, सितांशोश्चन्द्रस्य कराः किरणाः, तथा चैत्रे विचित्राः मनोहारिणश्च क्षपाः रात्रयः केषाञ्चित् पुण्यवतामिति भावः नेत्रहृदये अत्र मनसा सुखयन्ति । शार्दूलविक्रीडितं वृत्तम् ॥२८॥

पान्थस्त्रीविरहानलाहुतिकणानातन्वती मञ्जरी
माकन्देषु पिकाङ्गनाभिरधुना सोत्कण्ठमालोक्यते ।
अप्येते नवपाटलापरिमलप्राग्भारपाटच्चराः
वान्ति क्लान्तिहराः सुशीतलतराः श्रीखण्डशैलानिलाः॥२९
सङ्कारकुसुमकेसरनिकरभरामोदमूर्च्छितदिगन्ते ।
मधुरमधुविधुरमधुपे मधौ सदा भवेदुत्कण्ठा ॥ ३० ॥

ग्रीष्मः ।

अच्छाच्छचन्दनरसार्द्रकरा मृगाक्ष्यो
धाराग्टहाणि कुसुमानि च कौमुदी च ।

पान्थेति । अधुना वसन्ते पिकाङ्गनाभिः कोकिलाभिः माकन्देषु चूतेषु पान्थस्त्रीणां पथिकाङ्गनानां विरहानलेषु आहुतिकणान् हवनीयाज्यानिभान् मकरन्दानिति भावः आतन्वती विस्तारयन्ती मञ्जरी सोत्कण्ठं सकौतुकम् आलोक्यते दृश्यते । अपि किञ्च एते नवानां पाटलानां पाटलापुष्पाणां परिमलस्य सौरभस्य प्राग्भारः उत्कर्षातिशयः अथवा पूर्वभारः प्रथमोद्गम इति यावत् तस्य पाटच्चराः तस्कराः तद्हारिण इति यावत् क्लान्तिहराः श्रमहारिणः सुशीतलतराः अतिसुशीतलाः श्रीखण्डशैलानिलाः मलयवायवः वान्ति वहन्ति । शार्दूलविक्रीडितं वृत्तम् ॥ २९ ॥

सङ्कारेति । सङ्कारकुसुमानां चूतकुसुमानां केसरनिकरभरस्य किञ्जल्कनिचयातिशयस्य आमोदेन मूर्च्छितः व्याप्तः दिगन्तः यस्मिन् तादृशे मधुरेण मनोज्ञेन मधुना मकरन्देन तत्पानेनेति भावः विधुराः मत्ताः मधुपाः भ्रमरा यत्र तादृशे मधौ वसन्ते सदा उत्कण्ठा भवेत् विराहच्यामिति शेषः आर्य्यावृत्तम् ॥ ३० ॥

अच्छेति । अच्छाच्छैरतिविशदैः चन्दनरसैः आर्द्रकराः सिक्तकृत्ताः मृगाक्ष्यः मृगनेत्रा नार्य्यः धाराग्टहाणि जलयन्त्रमन्दिराणि

मन्दो मरुत् सुमनसः शुचि हर्म्यपृष्ठं
ग्रीष्मे मदश्च मदनश्च विवर्द्धयन्ति ॥ २१ ॥
स्रजो हृद्यामोदव्यजनपवनश्चन्द्रकिरणः
परागः कासारी मलयजरजः सिन्धुविशदम्।
शुचिः सौधोत्सङ्गः प्रतनु वसनं पङ्कजदृशो
निदाघे तूर्णं तत्सुखमुपलभन्ते सुकृतिनः ॥ २२ ॥
सुधाशुभ्रन्याम स्फुरदमलरश्मिः शशधरः
प्रियावक्त्राम्भोजं मलयजरजश्चातिसुरभि।

कुसुमानि, कौशदी ज्योत्स्ना, मन्दः सुमनसः कुसुमञ्च सुमनसामिति पाठस्तु समीचीनः। मरुत् वायुः, शुचि परिच्छन्नं हर्म्यपृष्ठम् अट्टालिकोपरिभाग इत्यर्थः ग्रीष्मे मदञ्च उल्लासम् आनन्दमिति यावत् मदनञ्च कामञ्च विवर्द्धयन्ति जनयन्ति। वसन्ततिलकं वृत्तम् ॥ २१ ॥

स्रज इति। स्रजः हाराः, हृद्यः मनोज्ञः आमोदः सौरभं यस्य तादृशः व्यजनपवनः वीजनवायुः, चन्द्रकिरणः, कासारी सरोवरसम्बन्धी पद्मसम्बन्धीति भावः, अत्र कासारशब्देन सरोजं लक्ष्यते। परागः रजः कमलरज इत्यर्थः, सिन्धुविशदं सरित्स्वच्छं मलयजरजः चन्दनधूलिः, शुचिः परिशुद्धः सौधोत्सङ्गः हर्म्यतलं, प्रतनु सूक्ष्मं वसनं पङ्कजदृशः कमलनेत्राः कान्ता इति शेषः। निदाघे ग्रीष्मे तूर्णं शीघ्रं सुकृतिनः पुण्यवन्तः तत्सुखं तत्तत्सुखसामग्रीनां सम्भोगसुखम् उपलभन्ते प्राप्नुवन्ति। शिखरिणीवृत्तं, रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणीति तल्लक्षणात् ॥ २२ ॥

सुधेति। सुधया चूर्णेन शुभ्रं धौतं धाम गृहं स्फुरन्तः प्रसरन्तः अमलाः निर्मलाः रश्मयः किरणाः यस्य तादृशः शशधरश्चन्द्रः

स्रजो हृद्याः कौन्दास्तदिदमखिलं रागिणि जने
करोत्यन्तःक्षोभं न तु विषयसंसर्गविमुखे ॥ २३ ॥

वर्षासमयः ।

तरुणी वक्षा दीपितकामा विकसज्जातीपुष्पसुगन्धिः ।
उन्नतपीनपयोधरभारा प्रावृट् कुरुते कस्य न हर्षम् ॥२४॥

वियदुपचितमेघभूमयः कन्दलिन्यो
नवकुटजकदम्बामोदिनो गन्धवाहाः ।

प्रियायाः कान्तायाः वक्त्रान्मोज सुखकमलम् अतिसुरभि मलयजरज-चन्दनधूलिः हृद्याः मनोज्ञाः कौन्दाः स्रजः कुन्दकुसुमहाराः तत्-इदम् अखिलं सर्वं रागिणि विषयवासनावति जने रागिणो जनस्येति भावः अन्तः क्षोभं मनोदुःखं तत्तदभावनिबन्धनमिति भावः करोति, विषयसंसर्गविमुखे वीतरागे इत्यर्थः न तु, वीतरागस्य नैतेषु मनःक्षोभः स्यादिति भावः । शिखरिणीवृत्तम् ॥ २३ ॥

तरुण्यादि । तरुणी नवीना वक्षा लवङ्गकुसुमामोदवती वक्षवर्त्तिनी च दीपितकामा कामोद्दीपनी उद्दीप्तकामा च विकसज्जातीपुष्पैः सुगन्धिः शोभनगन्धशालिनी विकसितजातीकुसुमसदृक्षेन सौरभवती च उन्नताः उदिताः पीनाः पयोधराणां भाराः यस्याः तथोक्ता उन्नतपीनस्तनाभोगा च प्रावृट् वर्षाकालः कस्य जनस्य हर्षम् आनन्दं न कुरुते ? सर्वस्यैव कुरुते इत्यर्थः । अत्र समानलिङ्गविशेषणाभ्यां प्रावृषि अप्रस्तुतायां नायिकायां व्यवहारसमारोपरूपा समासोक्तिः । तदुक्तं दर्पणे । समासोक्तिः समैर्यत्र कार्य्यलिङ्गविशेषणैः । व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुन इति ॥ २४ ॥

वियदिति । उपचिताः वृद्धिं गताः मेघाः यत्र तादृशं वियत् आकाशं, कन्दलिन्यः सद्यानकन्दलकुसुमाः भूमयः, नवैः कुटजैः तदाख्यकुसुमैः कदम्बैश्च आमोदिनः सौरभवन्तः गन्धवाहाः वायवः,

शिखिकुलकलकेका एव रम्या वनान्ताः
सुखिनमसुखिनं वा सर्वमुत्कण्ठयन्ति ॥ २५ ॥
उपरि घनं घनपटलं तिर्यगगिरयोऽपि नर्तितमयूराः ।
वसुधा कन्दलधवला तुष्टिं पथिकः क्व पातयतु ॥ २६ ॥
इतो विद्युल्लोविलसितमितः केतकितरोः
स्फुरन्ध्रः प्रोद्यज्जलदनिनदस्फूर्जितमितः ।
इतः केकिक्रीडाकलकलरवः पक्ष्मलदृशां
कथं यास्यन्त्येते विरहदिवसाः सम्भृतरसाः ॥ २७ ॥

शिखिकुलानां मयूरवृन्दानां कलाः मधुरास्फुटाः केकाः रवविशेषाः, केका वाणी मयूरस्त्वमरः । रम्याः मनोहराः नवपत्रपुष्पोद्गमेनेति भावः वनान्ताः वनसामान्यः सुखिनम् अविरहिणम् असुखिनं विरहिणं वा सर्वं जनम् उत्कण्ठयन्ति कामावेशेन व्याकुलयन्तीत्यर्थः । मालिनीवृत्तं, ननमयययुतेयं मालिनी भोगिलोकैरिति तल्लक्षणात् ॥ २५ ॥

उपरीति । उपरि आकाशे इति भावः घनं सान्द्रं घनपटलं मेघवृन्दं, तिर्यक् पार्श्वयोरिति यावत् गिरयः पर्वता अपि नर्तितमयूराः मयूराणां नर्तनशालिनः, वसुधा तलभूमिरित्यर्थः कन्दलैः नवाङ्कुरैः धवला, अतः पथिकः क्व कुत्र तुष्टिं सन्तोषं पातयतु करोत्वित्यर्थः निर्दृतिं लभतामिति भावः । तुष्टिमित्यत्र दृष्टिमिति पाठः समीचीनः । आर्यावृत्तं, यस्याः प्रथमे पादे द्वादशमात्रास्तथा तृतीयेऽपि । अष्टादश द्वितीये पञ्चदश चतुर्थके सार्येति तल्लक्षणात् ॥ २६ ॥

इत इति । इतः अस्मिन् प्रदेशे विद्युद्युल्लोनां विद्युल्लतानां विलसितं स्फुरणम्, इतः अस्मिन् स्थले केतकितरोः केतकवृक्षस्य

अमुष्मिन संसारे तमसि नभसि प्रौढ़जलद-
ध्वनिप्राये तस्मिन् पतति दृषदां तीरनिचये।
इदं सौदामिन्याः कनककमनीयं विलसितं
सुदृश्यं ग्लानिञ्च प्रथयति पथिष्वेव सुदृशाम् ॥ ३८ ॥
आसारेषु न हर्म्यतः प्रियतमैर्यातुं यदा शक्यते
शीतोत्कम्पनिमित्तमायतदृशी गाढ़ं समालिङ्गते।
जाताः शीतलशीकराश्च मरुतो वात्यन्तखेदच्छिदो
धन्यानां बत दुर्दिनं सुदिनतां याति प्रियासङ्गमे ॥ ३९ ॥

स्फुरन् प्रसरन् मन्द्रः, इतः अस्मिन् स्थाने प्रोद्यताम् उद्यमानानां जलदानां मेघानां निनदश्च स्फूर्जितं वज्रनिर्घोषध्वनिः, इतः अस्मिन् देशे केकिना मयूराणां क्रीड़ासु कलः मधुरः कलरवः, अतः एते पक्ष्मलदृशां घनशोणाष्टनेत्राणां सम्भृतरसाः रागोद्दीपिनः विरहदिवसाः कथं यास्यन्ति ? अतिक्लेशकरा एते दिवसा विरहिणामिति भावः। शिखरिणीवृत्तम् ॥ ३७ ॥

अस्मिन्निति। अस्मिन् संसारे जगत्यां तमसि अन्धकारे अन्धकाराच्छन्ने इति भावः नभसि आकाशे प्रौढ़ानां समुद्भूतानां जलदानां मेघानां ध्वनिप्राय गर्जितभूयिष्ठे तस्मिन् दृषदां प्रस्तराणां तीरनिचये शरसमूहे करकानिचये इति भावः पतति सति इदं सौदामिन्याः विद्युतः कनककमनीयं काञ्चनवत् रमणीयं विलसितं स्फुरणं सुदृशां सुन्दरीणां पथिष्वेव मार्गेष्वेव स्थानेष्वित्यर्थः सुदृश्यं दृश्यं ग्लानिञ्च व्यथाञ्च प्रथयति विस्तारयति। तत्र अविरहिणीनां सुदं विरहिणीनां ग्लानिमिति यथावद्य बोद्धव्यम्। शिखरिणीवृत्तम् ॥ ३८ ॥

आसारेष्वित्यादि। आसारेषु धारासम्पातेषु प्रियतमैः यदा हर्म्यतः सौधमन्दिरात् यातुं निर्गन्तुं न शक्यते, तदा आयतदृशी

शरद: ।

अर्द्धं नीत्वा निशाया: सरभससुरतायासखिन्नश्लथाङ्ग:
प्रोद्भूतासह्यतृष्णो मधुमदनिरतो हर्म्यपृष्ठे विविक्ते ।
सम्भोगक्लान्तकान्ताश्रिथिलभुजलतातर्जितं कर्कशान्तं
ज्योत्स्नाभिन्नाधरांशं पिबति न सलिलं शारदं मन्दभाग्य:४०

हेमन्ते दधिदुग्धसर्पिरशना माञ्जिष्ठवासोधृता:
काश्मीरद्रवसान्द्रदिग्धवपुष: खिन्ना विचित्ररतै: ।

विशालनेत्रा कान्ता शीतेन उत्कम्पनिमित्तं गाढं यथा तथा समाश्लिष्यति समाश्लिष्यति । अत्यन्तखेदाच्छद: अतिशयेन श्रमापहा: शीतलशीकरा: शीतलाम्बुकणवाहिन: मरुत: वायवस्तु जाता वा जाता एव । वाशब्दोऽवधारणार्थ: । अत: यत हर्षे, प्रियासङ्गमे सति धन्यानां पुण्यवतां दुर्दिनं मेघाच्छन्नं दिनं सुदिनतां याति गच्छति । शार्दूलविक्रीडितं वृत्तम् ॥ ३९ ॥

अर्द्धमिति । मन्दभाग्य: दुर्भाग्यो जन: विविक्ते विजने, विविक्तौ पूतविजनाविल्वसर: । हर्म्यपृष्ठे सौधोपरिभागे सरभसेन सवेगेन अत्यन्तेत्यर्थ: सुरतायासेन निधुवनपरिश्रमेण खिन्नं क्लान्तं श्लथं विवशम् अङ्गं यस्य तथाभूत: सन् निशाया: अर्द्धं नीत्वा अतिवाह्य मधुमदे सुरापानजनितोल्लासे निरत: प्रोद्भूता असह्या दु:सहा तृष्णा जलपानलालसा यस्य तादृश: अभिरत्याध्याहार्य्य: सम्भोगेन क्लान्ताया: कान्ताया: श्रियश्चलतया खिन्नतयेति भाव: भुजलतया तर्जितं तर्जनया दत्तं कर्कशान्तं कर्कशो दृश्य: तद्वत् अन्तं रन्ध्रं यस्मिन् तथाभूतं यावत् ज्योत्स्नया अभिन्न: अभेदं गत: अधराश: निम्नभाग: यस्य तथाभूतं शारदं शरत्कालभवं सलिलं न पिबति तर्जनया दत्ततया अभिमानादिति भाव: । शिखरिणीवृत्तम् ॥ ४० ॥

हेमन्ते इति । हेमन्ते धन्या: पुण्यवन्त: दधि दुग्धं सर्पिर्घृतं तानि अशनि भुञ्जते इति तथोक्ता:, माञ्जिष्ठया रञ्जितं माञ्जिष्ठं

पीनोरःस्थलकामिनीजनकृताश्लेषा गृहाभ्यन्तरे
ताम्बूलोदलपूगपूरितमुखा धन्याः सुखं शेरते ॥ ४१ ॥

शिशिरः ।

चुम्बन्तो गण्डभित्तीरलकवति मुखे शीत्कृतान्यादधाना
वक्षःसूत्कञ्चुकेषु स्तनभरपुलकोद्भेदमापादयन्तः ।
जघ्नाक्रम्यन्तः पृथुजघनतटात् स्रंसयन्तोऽंशुकानि
व्यक्तं कान्ताजनानां विटचरितभृतः शैशिरा वान्ति वाताः ४२

यत् वासः वसनं तत् भृतं यैः तथोक्ताः, काश्मीरद्रवेण कुङ्कुमरसेन बान्धं निबिड़ यथा तथा दिग्धं लिप्तं वपुः शरीरं येषां तथाभूताः गृहाभ्यन्तरे पीनं पीवरं कुचयोः सन्निवेशादिति भावः उरःस्थलं वक्ष ताद्दशेन कामिनीजनेन कृताश्लेषाः कृतालिङ्गनाः अतएव विचित्रैः विविधैः रतैः सुरतैः खिन्नाः क्लान्ताः ताम्बूलदलपूगाभ्यां पूरितं सुखं येषां तथोक्ताः सन्तः सुखं शेरते स्वपन्ति । शार्दूलविक्रीड़ितं वृत्तम् ॥ ४१ ॥

चुम्बन्त इति । गण्डभित्तीः कपोलदेशान् चुम्बन्तः अलकवति चूर्णकुन्तलशालिनि सुखे शीत्कृतानि शीत्कारान् आदधानाः जनयन्तः उत्कञ्चुकेषु उन्नमितकञ्चुकेषु, स्तनयोरुच्छ्रायातिशयादिति भावः वक्षःसु स्तनभरयोः पुलकोद्भेदं रोमहर्षविकासम् आदधानाः उत्पादयन्तः जघ्नान् आक्रम्यन्तः पृथुजघनतटात् विशालकटिपुरोभागात् अंशुकानि वसनानि स्रंसयन्तः अतएव कान्तानां नारीणां व्यक्तं स्फुटं विटचरितभृतः लम्पटचरित्रशालिनः शैशिराः वाताः शिशिरवायवः वान्ति वहन्ति । खग्धराछन्दः । अत्र एकस्य धर्मं कथयन्तो बहवोऽपि विटचरितमिव चरितमिति बिम्बानुबिम्बवत्प्रत्यायनात् असम्भवद्वस्तुसम्बन्धरूपा निदर्शना । तदुक्तं दर्पणे । सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वापि कुत्रचित् यत्र बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शनेति ॥ ४२ ॥

केशानाकलयन् दृशौ मुकुलयन् वासो बलादाक्षिपन्
आतन्वन् पुलकोद्गमं प्रकटयन्नालिङ्ग्य कम्पं मनैः ।
वारंवारमुदारशीत्कृततकृतो दन्तच्छदान् पीड़यन्
प्रायः शैशिर एष सम्प्रति मरुत् कान्तासु कान्तायते ॥४३॥

असाराः सन्ततोऽमी विरतिविरसायासविषया
जुगुप्सान्तां यद्वा ननु सकलदोषास्पदमिति ।
तथाप्यन्तस्तत्त्वे प्रणिहितधियामप्यतिबल-
स्तदीयो नाख्येयः स्फुरति हृदये कोऽपि महिमा ॥४४॥

भवन्तो वेदान्तप्रणिहितधियां सन्तु गुरवो
विदग्धालापानां वयमपि कवीनामनुचराः ।

केशानिति । एष शैशिरो मरुत् वायुः सम्प्रति इदानीं केशान् आकलयन् स्पृशन्, दृशः नयनानि मुकुलयन् निमीलयन्, बलात् वासः वसनम् आक्षिपन् आकर्षन्, पुलकोद्गमं रोमाञ्चम् आतन्वन् विस्तारयन्, मनैः मन्दं मन्दम् आलिङ्ग्य कम्पं प्रकटयन् प्रापयन् वारंवारं पुनःपुनः उदारशीत्कृततकृतः महाशीत्कारवत इत्यर्थः दन्तच्छदान् अधरान् पीड़यन्, अतएव कान्तासु नारीषु प्रायः बाहुल्येन कान्तायते कान्तावत् आचरति । उपमालङ्कारः । शार्दूलविक्रीड़ितं वृत्तम् ॥४३॥

असारा इति । इते विरतिः परिणामः तत्र विरसाः विषमाः आयासविषयाः खेदविषयाः कान्तासम्भोगादय इति भावः असाराः सारहिताः अस्थिरा इति यावत् यद्वा सकलदोषाणाम् आस्पदं स्थानम् इति हेतोः जुगुप्सन्तां निन्द्यतां बत खलु । तथापि इत्थं जुगुप्सितत्वेऽपि अतिबलः अतिप्रबलः तदीयः कान्तासम्बन्धीत्यर्थः कोऽपि अनिर्वचनीयः अनिर्वचनीयः महिमा अन्तस्तत्त्वे आत्मन्यविकृतत्व-दर्शने इति यावत् प्रणिहितधियां समर्पितमतीनामपि हृदये स्फुरति विकाशते । शिखरिणीवृत्तम् ॥ ४४ ॥

तथाप्येतद् भूमौ न हि परहितात् पुण्यमधिकं
न चास्मिन् संसारे कुवलयदृशो रम्यमपरम् ॥ ४५ ॥
किमिह बहुभिरुक्तैर्युक्तिशून्यैः प्रलापै-
र्इयमिह पुरुषाणां सर्वदा सेवनीयम् ।
अभिनवमदलीलालालसं सुन्दरीणां
स्तनभरपरिखिन्नं यौवनं वा वनं वा ॥ ४६ ॥
सत्यं जना ! वच्मि न पक्षपातात्
लोकेषु सर्वेषु च तथ्यमेतत् ।

भवन्त इति । भवन्तः वेदान्तेषु उपनिषत्सु प्रविहिता निश्चिता बोधः यैः तथोक्तानां तत्त्वदर्शिनामिति भावः सुरवः सन्तु भवन्तु । वयमपि विदग्धः सरसः आलापः वचनं येषां तथोक्तानां कवीनां काव्यरचयितृणाम् अनुचराः सङ्गिनः । तथापि भवादृशम्यः अस्माकं क्षुद्रबोधत्वेऽपीत्यर्थः एतत् सिद्धान्तितमस्माभिरिति शेषः भूमौ पृथिव्यां परहितात् परेषां हितकरणात् अधिकं पुण्यं न हि नैव अस्तीति शेषः तथा अस्मिन् संसारे कुवलयदृशः नीलोत्पलाक्ष्याः कान्तायाः अपरम् अन्यं रम्यं रमणीयं वस्तु न च अस्तीति शेषः । शिखरिणी-वृत्तम् ॥ ४५ ॥

किमिति । इह संसारे बहुभिः युक्तिशून्यैः उक्तैः प्रलापैः अनर्थकैः वचोभिरित्यर्थः किम् ? न किमपि प्रयोजनमित्यर्थः । इह संसारे पुरुषाणाम् अभिनवमदलीलायां लालसं निरतं स्तनयोर्भरेण परिखिन्नं क्लान्तं सुन्दरीणां यौवनं वा वनं वा एतत् द्वयं द्वयोरन्यतरमिति भावः सर्वदा सेवनीयम् । मालिनीवृत्तं, ननमयययुतेयं मालिनी भोगिलोकैरिति तल्लक्षणात् ॥ ४६ ॥

सत्यमिति । हे जनाः ! सत्यं वच्मि वदामि, पक्षपातात् प्रत्ययात् हेत्वाद्या नेत्यर्थः । सर्वेषु लोकेषु जगत्सु च एतत् तथ्यम् अवि-

नान्यन्मनोहारि नितम्बिनीभ्यो
दुःखैकहेतुर्न च कश्चिदन्यः ॥ ४७ ॥

प्राङ्मा मेति मनागमानितगुणं जाताभिलाषं ततः
सव्रीड़ं तदनु स्रथोद्यतमनु प्रत्यस्तधैर्य्यं पुनः ।
प्रेमादु:स्पृहणीयनिर्भररहःक्रीड़ाप्रगल्भं ततो
निःशङ्काङ्गविकर्षणाधिकसुखं रम्यं कुलस्त्रीरतम् ॥ ४८ ॥

उरसि निपतितानां स्रस्तधम्मिल्लकानां
मुकुलितनयनानां किञ्चिदुन्मीलितानाम् ।

तथं निश्चितमिति भावः । नितम्बिनीभ्यः कान्ताभ्यः अन्यत् अपरम् मनोहारि वस्तु न अस्तीति शेषः, अन्यः नितम्बिनीभ्य इति शेषः कश्चित् विषय इति शेषः दुःखस्य एकहेतुः एकमात्रकारणं न च अस्तीति शेषः, नितम्बिन्य एव रमणीयं वस्तु दुःखनिदानञ्च नापरमिति निष्कर्षः । इन्द्रवज्राछन्दः ॥ ४७ ॥

प्राङ्मिति । प्राक् प्रथमं मा मा न न इति मनाक् अल्पं यथा तथा अमानितः अस्वीकृतः गुणः धर्मविशेषः यस्य तथोक्तं, ततः ईषत्स्वीकारानन्तरमिति भावः जाताभिलाषं सञ्जाताकाङ्क्षं तदनु तदनन्तरं सव्रीड़ं सलज्जम् अनु तदनन्तरं स्रथं स्रगु यथा तथा उद्यतं सन्नद्धमित्यर्थः पुनः तदनन्तरं प्रत्यस्तधैर्य्यं ध्वस्तधैर्य्यं, ततः धैर्य्यध्वंसानन्तरं प्रेमात् प्रणयातिरेकात् दुःस्पृहणीया दुराकाङ्क्षणीया या निर्भररहःक्रीड़ा आत्यन्तिको विहारः तत्र प्रगल्भं लोलं लालसमिति यावत् ततः निःशङ्कं यथा तथा अङ्गानां विकर्षणेन मर्दनेन अधिकं सुखं यत्र तथाभूतं कुलस्त्रीणां कुलकामिनीनां रतं सुरतं रम्यं मनोहरम् । शार्दूलविक्रीड़ितं छन्दः ॥ ४८ ॥

उरसीति । भाग्यवन्तः जनाः उरसि वक्षसि निपतितानां स्रस्ताः स्खलिताः धम्मिल्लाः संयतकेशाः यासां तथोक्तानां, धम्मिल्लाः

सुरतजनितखेदादार्द्रगण्डस्थलीनां
अधरमधु वधूनां भाग्यवन्तः पिबन्ति ॥ ४९

आमीलितनयनानां
यत् सुरतरसोऽनुसंविदं कुरुते ।
मिथुनैर्मिथोऽवधारित-
मवितथमिदमेव कामनिर्वर्हणम् ॥ ५० ॥

इदमनुचितमक्रमश्च पुंसां
यदिह जरास्वपि मान्मथा विकाराः ।
यदपि च न कृतं नितम्बिनीनां
स्तनपतनावधि जीवितं रतं वा ॥ ५१ ॥

संवृताः कवा इत्यमरः । सुकुलितनयनानां सुखभरेण निमीलितनेत्राणां किञ्चित् ईषत् उन्मीलितानाम् उन्मीलितचक्षुषामिति भावः सुरत-जनितखेदात् आर्द्रगण्डस्थलीनां स्विन्नकपोलानां वधूनां कान्तानाम् अधरमधु अधरामृतं पिबन्ति । मालिनीवृत्तम् ॥ ४९ ॥

आमीलितेति । आमीलितनयनानाम् ईषन्मुकुलितनेत्राणां वधूनां युवतीनाञ्चेति शेषः सुरतरसः सुरतास्वादः यत् अनुसंविदं चेतनां-संवलनं कुरुते चित्तस्थानं हृदयं प्रवेशयतीति भावः, इदं कामनिर्वर्हणं मन्मथपरिणमनं मिथुनैः स्त्रीपुरुषैः मिथः परस्परम् अवितथं सत्यम् अवधारितं निर्णीतम् । आर्याछन्दः ॥ ५० ॥

इदमिति । इह संसारे जरासु वार्द्धकेषु अपि पुंसां यत् मान्मथाः विकाराः कामविक्रियाः भवन्तीति शेषः इदम् अनुचितम् अक्रमश्च अनियमश्च । यदपि यच्च नितम्बिनीनां कामिनीनां स्तन-पतनावधि जीवितं जीवनं वा रतं वा न कृतं न निर्णीतं विधिनेति शेषः इदमपि अनुचितमक्रमश्चेति शेषः । पुष्पिताग्राछन्दः ॥ ५१ ॥

एतत्कामफलं लोके यदुभयोरेकचित्तता
अन्यचित्तकृते कामे शवयोरिव सङ्गमः ॥ ५२ ॥
प्रणयमधुराः प्रेमोद्गाढा रसादलसास्तथा
भणितिमधुराः मुग्धप्रायाः प्रकाशितप्रेमदाः ।
प्रकृतिसुभगा विश्रम्भार्हं स्मरोदयदायिनः
रहसि किमपि स्वैरालापा हरन्ति मृगीदृशाम् ॥ ५३ ॥
आवासः क्रियतां गाङ्गे पापहारिणि वारिणि ।
स्तनमध्ये तरुण्या वा मनोहारिणि हारिणि ॥ ५४ ॥

एतदिति । द्वयोः स्त्रीपुंसयोः यत् एकचित्तता अभिन्ननोदृत्तित्वं लोके जगति एतत् कामफलं सदनकार्थेषु । कामे मन्मथे विषये अन्यत्र पुंसि स्त्रियां वेति भावः चित्तज्ञते मनसि हृते सति शवयोरिव मृतदेहयोरिव सङ्गमः भवतीति शेषः न तत्र किमपि सुखमिति भावः । अनुष्टुप्वृत्तम् ॥ ५२ ॥

प्रणयेति । प्रणयेन प्रेमातिशयेन मधुराः मनोहराः प्रेम्णा उद्गाढाः निबिडाः रसात् अनुरागात् अलसाः मन्दाः परिमिता इति यावत् भणित्या वाग्भङ्गिविशेषेणेत्यर्थः मधुराः मनोज्ञाः, क्वचित्तीति पाठे भणितिरिति अवश्यमावेनेत्यर्थः । मुग्धप्रायाः प्रायेण सरलाः प्रकाशितं यथा तथा प्रेमदा प्रणयवत्त्वेन इत्यर्थः प्रकृत्या स्वभावेन सुभगाः चारवः विश्रम्भार्हाः विश्वासयोग्याः स्मरस्य कामस्य उदयदायिनः इङ्गिकराः मृगीदृशां कामिनीनां रहसि विजने किमपि अनिर्वचनीया इति भावः स्वैरालापाः स्वेच्छाकृतवाक्यानि हरन्ति मोहयन्ति । हरिणीवृत्तं, नसमरसलागः षड्भिर्दैर्हयैर्हरिणी मतेति तल्लक्षणात् ॥ ५३ ॥

आवास इति । पापहारिणि गाङ्गे वारिणि गङ्गाजले, तरुण्याः

प्रियपुरतो युवतीनां तावत्पदमातनोतु हृद्विमानः ।
भवति न यावच्चन्दनतरुसुरभिर्मधुनिर्मलः पवनः ॥५५॥

दुर्विरक्तप्रशंसा ।

तावदेव कृतिनामपि स्फुरत्येष निर्मलविवेकदीपकः ।
यावदेव न कुरङ्गचक्षुषां ताड्यते चपललोचनाञ्चलैः ॥५६॥
वचसि भवति सङ्गत्यागमुद्दिश्य वार्ता
श्रुतिमुखरमुखानां केवलं पण्डितानाम् ।
जघनमरुणरत्नग्रन्थिकाञ्चीकलापं
कुवलयनयनानां को विहातुं समर्थः ॥ ५७ ॥

मनोहारिणि हारिणि हारशोभिते स्तनमध्ये वा आवासः क्रियताम् । अनुष्टुब्वृत्तम् ॥ ५४ ॥

प्रियेति । प्रियस्य कान्तस्य पुरतः अग्रतः युवतीनां हृदः हृदयस्य विमानः विशिष्टो मानः तावत् पदम् आतनोतु विस्तारयति, यावत् चन्दनतरुसुरभिः मधुना वसन्तेन निर्मलः पवनः न भवति न वहति । भवतीत्यत्र वहतीति पाठान्तरं मनोरमम् । आर्याछन्दः ॥ ५५ ॥

तावदिति । कृतिना तत्त्वदर्शिनामपि तावदेव एष निर्मलविवेकदीपकः स्फुरति प्रकाशते, यावदेव कुरङ्गचक्षुषा मृगदृशां रमणीनां चपललोचनाञ्चलैः चञ्चलनयनप्रान्तैः न ताड्यते न निरीक्ष्यते इति यावत् । स्त्रीणां कटाक्षविद्धो विवेकं विस्मरतीति भावः । रथोद्धताछन्दः, रात् नरैर्नरङ्गै रथोद्धतेति तल्लक्षणात् ॥ ५६ ॥

वचसीति । श्रुत्या वेदपाठेन मुखरं मुखं येषां तथाभूतानां वेदमात्रज्ञानामिति भावः पण्डितानां विदुषां केवलं वचसि वाक्ये न तु मनसीति भावः सङ्गत्यागं विषयाणामिति शेषः उद्दिश्य वार्ता आलापः भवति । को जनः कुवलयनयनानां नीलोत्पलाक्षीणाम्

स्वपरप्रतारकोऽसौ निन्दति योऽलीकं पण्डितो युवतीः ।
यस्मात्तपसोऽपि फलं स्वर्गः स्वर्गस्यापि फलं तथा स रसः५८

मत्तेभकुम्भदलने भुवि सन्ति शूराः
केचित् प्रचण्डमृगराजवधेऽपि दक्षाः ।
किन्तु ब्रवीमि बलिनां पुरतः प्रसह्य
कन्दर्पदर्पदलने विरला मनुष्याः ॥ ५९ ॥

सन्मार्गे तावदास्ते प्रभवति च नरस्तावदेवेन्द्रियाणां
लज्जां तावद्विधत्ते विनयमपि समालम्बते तावदेव ।
भ्रूचापाकृष्टमुक्ताः श्रवणपथगता नीलपक्ष्माण एते
यावल्लीलावतीनां न हृदि धृतिमुषो दृष्टिबाणाः पतन्ति ॥६०

रत्नानां रत्नानां पत्त्वयो यत्र तादृशः काञ्चीकलापः रशनादाम यस्मिन् तादृशं जघनं कटिपुरोभागं विदारितुं त्यक्तुं समर्थः ? न कोऽपीत्यर्थः । मालिनीवृत्तम् ॥ ५७ ॥

स्वपरेति । यः पण्डितः अलीकं वृथा युवतीः निन्दति, असौ स्वपरप्रतारकः स्वस्य आत्मनः परस्य च प्रवञ्चकः । यस्मात् तपसः अपि फलं स्वर्गः, स्वर्गस्यापि तथा स एव रसः युवतीनां सम्भोगास्वादः फलम् । आर्यावृत्तम् ॥ ५८ ॥

मत्तेभेति । भुवि पृथिव्यां मत्तानां दृप्तानां हस्तिनां कुम्भदलने कुम्भविदारणे शूराः बलवन्तः सिंहा इति भावः सन्ति विद्यन्ते । केचित् प्रचण्डानां मृगराजानां सिंहानामपि वधे दक्षाः समर्थाः सन्तीति शेषः । किन्तु अहं प्रसह्य बलेन बलिनां बलवतां पुरतः अग्रतः ब्रवीमि कन्दर्पस्य मदनस्य दर्पदलने दर्पेऽरण्ये मनुष्याः विरलाः न यत्किञ्चा इति भावः । वसन्ततिलकं वृत्तम् ॥ ५९ ॥

सन्मार्गे इति । भ्रूचापेन भ्रूधनुषा आकृष्टाः सङ्घाच्च निक्षिप्ताच्च श्रवणपथगताः आकर्णकृष्टा इत्यर्थः नीलानि पक्ष्माणि रोमाणि

उन्मत्तप्रेमसंरम्भादारभन्ते मदं जनाः ।
तत्र प्रत्यूहमाधातुं ब्रह्मापि खलु कातरः ॥ ६१ ॥
तावन्महत्त्वं पाण्डित्यं कुलीनत्वं विवेकिता ।
यावज्ज्वलति नाङ्गेषु स्मरः पञ्चेषुसायकः ॥ ६२ ॥
शास्त्रज्ञोऽपि प्रथितविनयोऽप्यात्मबोधोऽपि वाढ़ं
संसारेऽस्मिन् भवति विरलो भाजनं सद्गतीनाम् ।
येनैतस्मिन्निरयनगरद्वारमुद्घाटयन्ती
वामाक्षीणां भवति कुटिला भ्रूलताकृपाणिव ॥ ६३ ॥

येषां तथोक्ताः एते धृतिभ्रंशः धैर्यभ्रंशिनः लीलावलीना विलासिनीना दृष्टिबाणाः कटाक्षशराः हृदि यावत् न पतन्ति, नरः तावत् सन्मार्गे शिष्टाचारे आस्ते तिष्ठति, तावदेव इन्द्रियाणां प्रभवति प्रभुर्भवति, तावत् लज्जां विधत्ते करोति, तावदेव विनयवानपि नम्रतामपि समालम्बते आश्रयति न त्यजतीति भावः । स्रग्धराछन्दः ॥ ६० ॥

उन्मत्तेति । जनाः उन्मत्तस्य उत्कटस्य प्रेम्णः संरम्भात् संवेगात् मदं मत्तताम् अविनयमिति यावत् आरभन्ते कुर्वन्ति, ब्रह्मापि का कथान्येषामिति भावः तत्र मदारम्भे प्रत्यूहं विघ्नम् आधातुं जनयितुं कातरः खलु असमर्थ एव । अनुष्टुब्वृत्तम् ॥ ६१ ॥

तावदिति । यावत् अङ्गेषु पञ्चेषुसायकः मदनशरः स्मरः आत्मना न ज्वलति न दीप्यते, तावत् महत्त्वम् औदार्यम्, पाण्डित्यं विद्यावत्त्वं, कुलीनत्वं सत्कुलजातत्वं, विवेकिता विज्ञत्वञ्च तिष्ठतीति शेषः । कामपीड़ितस्य महत्त्वादयो नश्यन्तीति भावः । अनुष्टुब्वृत्तम् ॥६२॥

शास्त्रज्ञ इति । अस्मिन् संसारे शास्त्रज्ञः अपि प्रथितः प्रख्यातः विनयः शिष्टाचारः यस्य तादृशोऽपि वाढ़म् अत्यर्थम् आत्मबोधः आत्मज्ञानवानपि विरलः अत्यल्पो जनः सद्गतीनां सत्पदानां भाजनं पात्रं भवति । येन हेतुना एतस्मिन् संसारे निरयनगरद्वारं नरक-

क्वचित्कालः काणः खञ्जः श्रवणरहितः पुच्छविकलो
व्रणी पूयक्लिन्नः कृमिकुलशतैरावृततनुः ।
क्षुधाक्षामो जीर्णः पिठरककलापार्पितगलः
शुनीमन्वेति श्वा हतमपि निहन्त्येव मदनः ॥ ६४ ॥
स्त्रीमुद्रां भवकेतनस्य जननीं सर्वार्थसम्पत्करीं
ये मूढाः प्रविहाय यान्ति कुधियो मिथ्याफलान्वेषिणः ।
ते तेनैव निहत्य निर्दयतरं नग्नीकृता मुण्डिताः ।
केचित्पञ्चशिखीकृताश्च जटिलाः कापालिकाश्चापरे॥६५॥

पुरद्वारम् उद्घाटवन्तौ आकुञ्चितेव केनापि सङ्कोचं नीतेव कुटिला वामाक्ष्णोः वामनयनानां भ्रूलता भवति तिष्ठति । वामाक्ष्णोः कुटिलभ्रूविद्धः कोऽपि निष्कृतिं न लभते इति भावः । अस्माक्रान्ता-वृत्तम् ॥ ६३ ॥

क्वचिदिति । क्वचित् कस्मिंश्चित् काणः दृष्टिहीनः खञ्जः चरणरहितः श्रवणरहितः बधिरः पुच्छविकलः वालूनरहितः व्रणी क्षताङ्गः पूयक्लिन्नः क्षरत्पूय इत्यर्थः कृमिकुलानां कृमिकीटनिचयानां शतैः आवृततनुः व्याप्तदेहः, क्षुधया क्षामः क्षीणः जीर्णः वृद्धः पिठरक-कलापेन रोगविशेषेणेति भावः अर्पितगलः बद्धकण्ठ इति यावत् श्वा कुक्कुरः शुनीं कुक्कुरीम् अन्वेति अनुसरति सम्भोगेच्छयेति भावः, अतः मदनः कामः हतमपि निहन्त्येव । सामान्येन विशेषसमर्थनरूपो-ऽर्थान्तरन्यासः । शिखरिणीवृत्तम् ॥ ६४ ॥

स्त्रीमुद्रामिति । ये मूढाः मूर्खाः कुधियः कुबुद्धयः मिथ्याफलान्वेषिणः वृथाप्राप्त्यनुसन्धाविनः जनाः भवकेतनस्य कामस्य जननीम् उद्दीपनीमित्यर्थः मातरञ्चेति ध्वनिः सर्वार्थसम्पत्करीं सर्वकार्यसम्पादि-विधायिनीं स्त्रीमुद्रां स्त्रीरूपां मुद्रां मुद्दो हर्षान् राति ददातीति तथोक्तां स्त्रीरत्नमिति भावः प्रविहाय परित्यज्य यान्ति गच्छन्ति न

विश्वामित्रपराशरप्रभृतयो वाताम्बुपर्णाशना-
स्तेऽपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः ।
शाल्यन्नं सघृतं पयोदधियुतं ये भुञ्जते मानवा-
स्तेषामिन्द्रियनिग्रहो यदि भवेत् विन्ध्यस्तरेत्सागरम् ॥६६

स्त्रीणां परित्यागप्रशंसा ।

संसारेऽस्मिन्नसारे कुनृपतिभवनद्वारसेवावलग्न-
व्यासङ्गव्यस्तधैर्याः कथममलधियो मानसं संविदध्युः ।
यद्येताः प्रोद्यदिन्दुद्युतिनिचयभृतो न स्युरभ्योजनेत्राः
प्रेङ्खत्काञ्चीकलापाः स्तनभरविनमन्मध्यभागास्तरुण्यः ॥६७॥

व्याक्रियन्ते इति भावः, ते जनाः तेनैव ऋषेतनेनैव निर्दयतरम् अतिनिष्ठुरं यथा तथा निकृत्य जनन्या अनादरादिति भावः नग्नीकृताः विवसनीकृताः, लुञ्चिताः कृतशिरोलुञ्चनाः । केचित् पञ्चशिखीकृताश्च जटिलाश्च जटावन्तश्च, अपरे कापालिका कपालधारिणश्च कृता इति शेषः । कामज्वरार्त्ताः कामभोगमप्राप्यैव वैराग्येण तादृशा श्रीष्मदा जाता इति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ६५ ॥

विश्वामित्रेति । ते प्रसिद्धाः वाताम्बुपर्णाशनाः वायुभोजिनः जलमात्रपायिनः पत्रमात्राशिनश्च विश्वामित्रपराशरप्रभृतयः मङ्कानय इति भावः अपि सुललितम् अतिमनोहरम् स्त्रीणां मुखपङ्कजं दृष्ट्वैव मोहं गताः । ये मानवाः सघृतं पयोदधियुतं दुग्धदधिसंवलितं शाल्यन्नं शालिधान्यसम्भूतमन्नं भुञ्जते, तेषाम् इन्द्रियनिग्रहः यदि भवेत् तदा विन्ध्यः गिरिरिति शेषः सागरं तरेत् । शार्दूलविक्रीडितं वृत्तम् ॥ ६६ ॥

संसारे इति । अस्मिन् असारे सारराहिते दुःखबहुले इति भावः संसारे अमलधियः निर्मलमतयः कुनृपतेः कुत्सितस्य प्रभोरिति यावत् भवनद्वारस्य सेवावलग्नव्यासङ्गेन सेवावलग्ननसम्पर्केण व्यस्तं विगतं

सिद्धाध्यासितकन्दरे हरवृषस्कन्धावगाढ़द्रुमे
गङ्गाधौतशिलातले हिमवतः स्थाने स्थिते श्रेयसि ।
कः कुर्वीत शिरःप्रणाममलिनं मानं मनस्वी जनो
यद्युत्तप्तकुरङ्गशावनयना न स्युः स्मरास्त्रं स्त्रियः ॥६८॥
संसार ! तव निस्तारपद्वी न दूरीयसी ।

धैर्यं येषां तथाभूताः नितरां विरज्यमानचित्ता इति भावः कथं केन प्रकारेण मानसं संविदध्युः सत्कारयेयुः क्षणमपि सुखेन कालं नयेयुरिति भावः, यदि प्रोद्यतः उद्दयमानस्य इन्दोश्चन्द्रस्य द्युतिनिचयभृतः कान्तिसमूहधारिण्यः चन्द्रकान्ता इति यावत् अम्भोजनेत्राः पद्मनयनाः प्रेङ्खत् भ्रूनस्कारं कुर्वन् काञ्चीकलापः रणनादाः यासां तथाभूताः स्तनभरेण विनमन् मध्यभागः यासां ताडृश्यः एताः तरुण्यः न स्युः न तिष्ठेयुः । स्टष्टे यदि तादृशी तरुणी स्यात् यत् स्मराग्ने चित्तं प्रसीदति तदा प्रभुनिकटे दासत्वक्लेशोऽपि सह्यते इति भावः । स्रग्धराछन्दम् ॥ ६७ ॥

सिद्धेति । यदि उद्यत्तप्तकुरङ्गशावनयनाः चकितमृगशावनेत्राः स्त्रियः स्मरस्य कामस्य अस्त्रं न स्युः न तिष्ठेयुः, तदा सिद्धैः देवयोनिविशेषैः तपःसिद्धिं मतैर्वा अध्यासिता अधिष्ठिता कन्दरा गुहा यस्य तादृशे हरस्य यो वृषः तस्य स्कन्धेन कक्षुदेति यावत् अवगाढ़ः उद्दधर्षितः द्रुमः तरुः यत्र तथोक्ते गङ्गया धौतं क्षालितं शिलातलं यस्य तथाभूते अतिपवित्रे इति भावः हिमवतः हिमाद्रेः श्रेयसि सर्वोत्कृष्टे स्थाने स्थिते सति कः मनस्वी प्रशस्तमनाः जनः मानं स्वगौरवं शिरसा प्रणामेन प्रणत्या मलिनं खर्वमित्यर्थः कुर्वीत ? न कोऽपीत्यर्थः । कामशरार्त्त एव स्त्रीषु प्रणत्या स्वगौरवं नाशयतीति भावः स्त्रीनिमित्तं हि प्रभुसेवा ततश्च अपमानस्वीकारः इति भावः । शार्दूलविक्रीड़ितं छन्दम् ॥ ६८ ॥

संसारेति । रे संसार ! तव निस्तारपद्वी त्वत्तः परित्राणमार्गः

अन्तरा दुस्तरा न स्युर्यदि रे मदिरेक्षणाः ॥ ६९ ॥

यौवनप्रशंसा ।

राजन् ! तृष्णाम्बुराशेर्न हि जगति गतः कश्चिदेवावसानम्
किं वाथोच्चैः प्रभूतैः स्ववपुषि गलिते यौवने सानुरागे ।
गच्छामः सद्म यावद्विकसितमुदेन्दीवरालोकनीनाम्
आक्रम्याक्रम्यरूपं झटिति न जरया लुप्यते प्रेयसीनाम् ॥७०॥

रागस्यागारमेकं नरकशतमहादुःखसम्पत्तिहेतु-
र्मोहस्योत्पत्तिबीजं जलधरपटलं ज्ञानतारात्विषश्च ।

दूरार्थः न दवीयसी नातिदूरवर्त्तिनीत्यर्थः, यदि अन्तरा मध्ये मदिरेक्षणाः मत्तखञ्जनसदृशाः कामिन्य इति शेषः दुस्तराः अपाराः न स्युः न भवेयुः । स्त्रीषु प्रणयरहिता एव संसारात् मुच्यन्ते इति भावः । अनुष्टुवृत्तम् ॥ ६९ ॥

राजन्निति । हे राजन् ! जगति कश्चिदेव कोऽपीत्यर्थः तृष्णाम्बुराशेः वासनासागरस्य अवसानं पारं न हि गतः नैव प्राप्तः । स्ववपुषि निजशरीरे सानुरागे यौवने गलिते नष्टे सति तैः प्रभूतैः प्रचुरैः अर्थैः धनैः किं वा ? न किमपि प्रयोजनमित्यर्थः । यावत् जरया विकसितं यत् कुसुदम् इन्दीवरं नीलोत्पलञ्च तद्वत् आलोकन्ते अवलोकयन्तीति तथोक्तानां प्रेयसीनां कान्तानां रूपं सौन्दर्य्यं आक्रम्य आक्रम्य झटिति न लुप्यते न नाश्यते तावत् सद्म गृहं गच्छामः गृहे तिष्ठाम इति भावः । यावत् प्रेयस्याः मम च जरा न आक्रामति तावत् प्रेयस्या सह सङ्गं करोमीति तात्पर्य्यम् । खग्धराछन्दः ॥ ७० ॥

रागस्येति । अस्मिन् लोके जगति यौवनात् अन्यात् अपरं रागस्य विषयवासनाया एकमद्वितीयम् आगारं गृहं नरकाणां शतं

कन्दर्पस्यैकमित्रं प्रकटितविविधक्लृप्तदोषप्रबन्धं
लोकोऽस्मिन्नात्मनर्थं निजकुलदहनं यौवनादन्यदस्ति॥७१॥
शृङ्गारद्रुमनीरदे बहुतरक्रीड़ारसस्रोतसि
प्रद्युम्नप्रियबान्धवे चतुरतामुक्ताफलोदन्वति।
तन्वीनेत्रचकोरपारणविधौ सौभाग्यलक्ष्मीनिधौ
धन्यः कोऽपि न विक्रियां कलयति प्राप्ते नवे यौवने ॥७२॥

कामिनीगर्हणम्।

कान्तेत्युत्पललोचनेति विपुलश्रोणीभरेत्युत्सुकः

तत्र यत् नष्टाङ्गः तस्य यस्याग्निहेतुः यस्याग्नेः कारणं, कोऽस्य यस्यानस्य उत्पत्तिबीजम् उद्भवनिदानं ज्ञानतारापिधस्य ज्ञानचन्द्रस्य; जलधरपटलं मेघवृन्दम् आवरकमिति यावत्, कन्दर्पस्य कामस्य एकम् अद्वितीयं मित्रं, प्रकटितः प्रकाशितः विविधः बहुप्रकारः क्लृप्तः दोषाणां प्रबन्धः निचयः येन यस्मिन् वा तत् निजकुलदहनं स्ववंशदहनकारि अनर्थम् अनिष्टसाधनम् वक्ष्यति शेषः न हि अस्ति नैव विद्यते। क्लम्बराष्टत्तम् ॥ ७१ ॥

शृङ्गारेति। कोऽपि धन्यः पुण्यवान् जनः शृङ्गारद्रुमस्य निधुवनवृक्षस्य नीरदे जलदे जलदो यथा वर्षं पुष्णाति यौवनं तथा शृङ्गारमिति भावः, बहुतरा या क्रीड़ा विहारः तस्याः रसः स्वादः तस्य स्रोतसि प्रवाहस्वरूपे इति यावत्, प्रद्युम्नस्य कामस्य प्रियबान्धवे उद्दीपकत्वादिति भावः, चतुरता रसिकता एव मुक्ताफलानि तेषाम् उदन्वान् समुद्रः तस्मिन्, तन्वीनां युवतीनां नेत्रचकोरस्य नयनरूपचकोरपक्षिणः पारणे सुधापाने विधुः चन्द्रः तस्मिन् सौभाग्यस्य वाल्लभ्यस्य या लक्ष्मीः श्रीः तस्याः निधौ आस्पदे प्राप्ते आगते नवे यौवने न विक्रियां विकारं कलयति करोति सन्तुष्यतीति भावः। रूपकालङ्कारः। शार्दूलविक्रीड़ितं वृत्तम् ॥ ७२ ॥

पीनोत्तुङ्गपयोधरेति सुमुखाम्भोजेति सुभ्रूरिति ।
दृष्ट्वा मादयति मोदतेऽतिरमते प्रस्तौति जानन्नपि
प्रत्यक्षाशुचिपुत्रिकां स्त्रियमहो ! मोहस्य दुश्चेष्टितम् ॥७३॥
श्रुता भवति तापाय दृष्टा चोन्मादवर्द्धिनी ।
स्पृष्टा भवति मोहाय सा नाम दयिता कथम् ॥ ७४ ॥
तावदेवामृतमयी यावल्लोचनगोचरा
चक्षुःपथादपगता विषादप्यतिरिच्यते ॥ ७५ ॥

कान्तेति । उत्तुङ्गः कामातुर इति भावः जनः स्त्रियं प्रत्यक्षाशुचिपुत्रिकां प्रत्यक्षपरिदृश्यमानाम् अपवित्रपुत्तलिकां जानन्नपि ज्ञात्वा इति उत्पललोचना इन्दीवराक्षी इति विपुलश्रोणीभरा विस्तीर्णनितम्बा इति पीनोत्तुङ्गपयोधरा पीवरोन्नतस्तनी इति सुष्ठु सुखाम्भोजं वदनकमलं यस्यास्तथोक्तेति सुभ्रूरिति दृष्ट्वा दृष्ट्वेति भावः मादयति मत्तो भवति मोदते हृष्यति अतिरमते अतिमात्रं विहरति प्रस्तौति प्रकर्षेण प्रशंसति अहो आश्चर्ये मोहस्य अज्ञानस्य दुश्चेष्टितं दुर्विलसितम् । कारणेन कार्यसमर्थनरूपोऽर्थान्तरन्यासः । शार्दूलविक्रीडितं वृत्तम् ॥ ७३ ॥

श्रुतेति । सा श्रुता कीर्त्तितापि नामग्रहणेऽपीत्यर्थः तापाय भवति, दृष्टा च अवलोकिता च उन्मादवर्द्धिनी भवति, स्पृष्टा सती मोहाय भवति मुग्धं करोतीति भावः, सा दयिता प्रिया नाम कथम् ? देहनिष्कारिणीत्वेऽपि प्रियत्वं कुत इति भावः । अनुष्टुब्वृत्तम् ॥ ७४ ॥

तावदिति । यावत् लोचनगोचरा दृष्टिपथवर्त्तिनी तावदेव अमृतमयी कान्तेति शेषः, चक्षुःपथात् दृष्टिज्ञानात् अपगता अन्तर्ज्ञान्ता चेद्भवति शेषः विषादपि अतिरिच्यते अधिकदुःखकरी भवतीत्यर्थः । अनुष्टुब्वृत्तम् ॥ ७५ ॥

नामृतं न विषं किञ्चिदेकां मुक्ता नितम्बिनीम् ।
सैवामृतलता रक्ता विरक्ता विषवल्लरी ॥ ७६ ॥
आवर्त्तः संशयानामविनयभवनं पत्तनं साहसानां
दोषाणां सन्निधानं कपटशतमयं चेतसप्रत्ययानाम् ।
स्वर्गद्वारस्य विघ्नो नरकपुरमुखं सर्वमायाकरण्डं
स्त्रीयन्त्रं केन सृष्टं विषममृतमयं प्राणिनां मोहपाशः ॥७७
न सत्येन शशाङ्क एष वदनीभूतो नवेन्दीवर-
द्वन्द्वे लोचनताङ्किते न कनकैरप्यङ्गयष्टिः कृता ।

नामृतमिति । एकां केवलां नितम्बिनीं बालां मुक्ता विहाय किञ्चित् वस्तु अमृतं न विषञ्च न, सैव नितम्बिन्येव रक्ता अनुरागिणी सती अमृतलता, विरक्ता अननुरक्ता सती विषवल्लरी गरलमञ्जरी भवति । अनुष्टुब्वृत्तम् ॥ ७६ ॥

आवर्त्त इति । संशयानां सन्देहानाम् आवर्त्तः भ्रमिविशेषः आस्पद इति यावत्, अविनयस्य दुर्व्यवस्य भवनं गृहं, साहसानाम् अविमृश्यकारितायाः पत्तनं नगरं दोषाणां सन्निधानं निधिरित्यर्थः कपटशतमयं बहुधा कपटात्मकम् अप्रत्ययानाम् अविश्वासानाम् चेतः स्थानं स्वर्गद्वारस्य वैदिकानुष्ठानस्य विघ्नः प्रत्यूहः नरकपुरस्य मुखं द्वारमित्यर्थः सर्वासां मायानां कपटानां करण्डं पेटकं विषं गरलमयम् अमृतमयञ्च प्राणिनां मोहपाशः मोहनरज्जुः मोहनायेति पाठान्तरम् । स्त्रीरूपं केन हेतुना कथं वा केन जनेन वा सृष्टं निर्मितम् । स्रग्धराछन्दः । रूपकमलङ्कारः ॥ ७७ ॥

नेति । एषः वदनीभूतः वदनरूपेणावतीर्णः शशाङ्कः चन्द्रः सत्येन तत्त्वतः न, इन्दीवरद्वन्द्वे नीलोत्पलयुगले न वा लोचनतां नयनत्वं गते प्राप्ते, अङ्गयष्टिरपि कनकैः न कृता न निर्मिता ।

किन्त्वेवं कविभिः प्रतारितमनास्तत्त्वं विजानन्नपि
त्वङ्मांसास्थिमयं वपुर्मृगदृशां मन्दो जनः सेवते ॥ ७८ ॥
लीलावतीनां सहजा विलासास्ता एव मूढ़स्य हृदि स्फुरन्ति ।
रागो नलिन्या हि निसर्गसिद्धस्तत्र भ्रमत्येव मुदा षड़ङ्घ्रिः ॥ ७९ ॥
यदेतत् पूर्णेन्दुद्युतिहरमुदाराकृतिवरं
सुखाजं तन्वङ्ग्याः किल वसति तत्राधरमधु ।
इदं तावत्पक्वं द्रुमफलमिवातीव विरसं
व्यतीतेऽस्मिन् काले विषमिव भविष्यत्यसुखदम् ॥ ८० ॥

किन्तु कविभिः एवम् एतत् प्रतारितमनाः विप्रलब्धचित्तः मन्दो मूढो जनः तत्त्वं याथार्थ्यं विजानन्नपि विशेषेण बुध्यमानोऽपि मृगदृशां त्वङ्मांसास्थिमयं वपुः शरीरं सेवते रमणीयतयेति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ७८ ॥

लीलावतीनामिति । लीलावतीनां विलासिनीनां सहजाः स्वाभाविकाः ये विलासाः सन्तीति शेषः त एव विलासाः मूढस्य मन्दबुद्धेः हृदि स्फुरन्ति विकाशन्ते । हि यतोहि नलिन्याः पद्मिन्याः रागः विकासः निसर्गसिद्धः स्वभावसिद्धः । षड़ङ्घ्रिः षट्चरणः भ्रमरः सुदा आनन्देन तत्रैव भ्रमति । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः । उपजातिवृत्तम् ॥ ७९ ॥

यदिति । यत् एतत् पूर्णेन्दुद्युतिहरं पूर्णचन्द्रकान्तिहरम् उदारा आकृतिर्यस्य तथोक्तं वरं श्रेष्ठं तन्वङ्ग्याः कृशाङ्ग्याः सुखाजं सुखकमलम् अस्तीति शेषः तत्र अधरमधु वसति किल तिष्ठत्येव । इदं सुखाजं तावत् आपातत इत्यर्थः पक्वं द्रुमफलमिव वृक्षफलमिव सरसं सुमधुरम् । अस्मिन् काले व्यतीते अतिक्रान्ते सति विषमिव असुखद भविष्यति । शिखरिणीवृत्तम् । उपमालङ्कारः ॥ ८० ॥

उन्मीलत्त्रिवलीतरङ्गनिलया प्रोत्तुङ्गपीनस्तन-
द्वन्द्वेनोद्यतचक्रवाकमिथुनाकाराम्बुजोद्भासिनी ।
कान्ताकारधरा नदीयमभितः क्रूराशया नेष्यते
संसारार्णवमज्जनं यदि जना दूरात् परित्यज्यताम् ॥ ८१॥
जल्पन्ति सार्द्धमन्येन पश्यन्त्यन्यं सविभ्रमाः ।
हृदये चिन्तयन्त्यन्यं प्रियः को नाम योषिताम् ? ॥८२॥

उन्मीलदिति । हे जनाः ! यदि उन्मीलन्त्यः राजन्त्यः याः त्रिवल्यः ता एव तरङ्गाः तेषां निलया आश्रया तद्वतीत्यर्थः प्रोत्तुङ्गेन अत्युन्नतेन पीनेन स्तनद्वन्द्वेन कुचयुगलेन उद्यतः उदितः चक्रवाकमिथुनस्य आकारः यस्या तादृशी अम्बुजवत् कमलवत् उद्भासिनी शोभिनी अम्बुजैरुद्भासिनी च कान्तः रमणीयः आकारः तस्य धरतीति धरा पचाद्यच्प्रत्ययः । कान्तायाः आकारस्य धरा वा अभितः समन्ततः क्रूराशया भीषणान्तःकरणा हिंस्रजलजन्तुभिः व्याप्तत्वात् निष्ठुरान्तरा इयं नदी न दृश्यते नाभिलष्यते, तदा संसारार्णवे भवाम्बुधौ मज्जनं दूरात् परित्यज्यताम् । नदीपक्षेनैव लोकाः समुद्रं गच्छन्ति तत्र मज्जन्ति च तत्परित्यागे यथा समुद्रे मज्जनाभावः, तथा नारीपरित्यागे निमज्जनाभाव इति भावः । अत्र नायिकायां नदीत्वारोपात् संसारे चार्णवत्वारोपात् रूपकालङ्कारः । शार्दूलविक्रीडितं वृत्तम् ॥ ८१ ॥

जल्पन्तीति । अन्येन जनेन सार्द्धं सह जल्पन्ति आलपन्ति योषित इति शेषः सविभ्रमाः सविलासाः सत्यः अन्यं जनं पश्यन्ति । अन्यं जनं हृदये चिन्तयन्ति अतः को जनः योषितां प्रियो नाम सम्भावनायाम् । न कोऽपि प्रिय इति सम्भावयामीत्यर्थः । अनुष्टुब्वृत्तम् । काव्यलिङ्गमलङ्कारः । तदुक्तं दर्पणे, हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते इति ॥ ८२ ॥

मधु तिष्ठति वाचि योषितां हृदि हालाहलमेव केवलम् ।
अतएव निपीयतेऽधरो हृदयं सृष्टिभिरेव ताड्यते ॥ ८३ ॥
अपसर सखे ! दूरं तस्मात् कटाक्षविषानलात्
प्रकृतिविषमाद्योषित्सर्पादिलासफणाभृतः ।
इतरफणिना दष्टाः शक्याश्चिकित्सितुमौषधै-
श्चतुरवनिताभोगिग्रस्तं त्यजन्ति हि मन्त्रिणः ॥ ८४ ॥
विस्तारितं मकरकेतनधीवरेण
स्त्रीसंज्ञितं वडिशमत्र भवाम्बुराशौ ।

मध्विति । योषितां नारीणां वाचि मधु तिष्ठति, हृदि केवलमेव हालाहलं विषं तिष्ठतीति पूर्वेण सम्बन्धः । अतएव अधरः मधुभाजनमिति भावः निपीयते हृदयं सृष्टिभिरेव ताड्यते प्रक्षिप्यते खनद्दयं मर्द्यते इति भावः जनैरिति शेषः । काव्यलिङ्गमलङ्कारः । सुन्दरीष्टत्तं विषमे सलजा गुरुः समे सभराल्गौ यदि सुन्दरी तदेति तल्लक्षणात् ॥ ८३ ॥

अपसरेति । हे सखे ! कटाक्ष एव विषानलः गरलाग्निः यस्य तथोक्तात् प्रकृतिविषमात् स्वभावभीषणात् विलासाः विभ्रमा एव फणाः विभर्त्तीति तस्मात् तस्मात् योषिदेव सर्पः तस्मात् दूरम् अपसर अपगच्छ । इतरेण अन्येन फणिना भुजङ्गेन दष्टाः जनाः औषधैः चिकित्सितुं शक्याः साध्याः, चतुरा या वनिता कान्ता सा एव भोगी सर्पः तेन यस्तं दष्टं कवलितमिति यावत् जनं मन्त्रिणः मन्त्रकुशलाः सदुपदेशिन इति भावः त्यजन्ति हि परिहरन्त्येव । रूपकालङ्कारः । हरिणीवृत्तम् ॥ ८४ ॥

विस्तारितमिति । मकरकेतनः काम एव धीवरः मत्स्यग्राही येन अत्र भवाम्बुराशौ संसारसागरे स्त्रीति संज्ञा आख्या यस्य

येनाचिरात्तदधरामिषलोलमर्त्य-
मत्स्यान् विकृष्य पचतीत्यनुरागवङ्क्षौ । ८५ ॥
कामिनीकायकान्तारे कुचपर्वतदुर्गमे ।
मा सञ्चर मनःपान्थ ! तत्रास्ते स्मरतस्करः ॥ ८६ ॥
आदीर्घेण चलेन चक्रगतिना तेजस्विना भोगिना
नीलाब्जद्युतिहारिणा वरमहं दृष्टो न तच्चक्षुषा ।
धन्याः सन्ति विलासिकाः दिशि दिशि प्रायेण धर्मार्थिनो
मुग्धाक्षीक्षणवीक्षितस्य न हि मे वैद्यो न चाप्यौषधम् ॥ ८७ ॥

अस्तीति तयोक्तं अस्य आस्ते इति इतप्रत्ययः । वडिश मत्स्यवेधन-यन्त्रं विस्तारितं प्रसारितम् । येन स्त्रीसंबन्धिनेन वडिशेन अचिरात् झटिति तस्य स्त्रीसम्बन्धिनवडिशस्य अधर एव आमिषं भोग्यं वस्तु तस्मिन् लोलाः चटुलाः मत्स्याः मानवा एव मत्स्याः तान् विकृष्य आकृष्य अनुरागः प्रेम एव वाङ्क्षः तस्मिन् इतीत्थं पचति । रूपकालङ्कारः । वसन्ततिलकं वृत्तम् ॥ ८५ ॥

कामिनीति । हे मनःपान्थ ! चित्तपथिक ! कुचा एव पर्वताः तैः दुर्गमे गन्तुमशक्ये अपारणीये इति भावः कामिनीनां कायः देह एव कान्तारः दुर्गमं वनं कान्तारो वर्त्म दुर्गमस्थलमरः । तस्मिन् मा सञ्चर न भ्रम, तत्र कान्तारे स्मर एव काम एव तस्करः चौरः आस्ते तिष्ठति । स तव सर्वस्वं लुण्ठिष्यतीति भावः । रूपकसमालङ्कारः । अनुष्टुब्वृत्तम् ॥ ८६ ॥

आदीर्घेणेति । आदीर्घेण अत्यायतेन चलेन चञ्चलेन चक्रगतिना चक्रवत् भ्रमणशीलेनेति भावः चक्रगतिना कुटिलगामिना तेजस्विना प्रबलेन कान्तिमता च नीलाब्जस्य नीलपद्मस्य द्युतिहारिणा कान्तिहारिणा लक्ष्यवर्णेन च भोगिना सर्पेण वरम् अहं दृष्टः भवेयमिति शेषः । तस्याः मुग्धाक्ष्याः चक्षुषा पूर्वोक्तविशेषणविशिष्टेनेति भावः

इह हि मधुरगीतं नृत्यमेतद्रसोऽपि
स्फुरति परिमलोऽसौ स्पर्श एष स्तनानाम् ।
इति हृतपरमार्थैरिन्द्रियैर्भाव्यमाणै-
रहितकरणदक्षैः पञ्चभिर्वञ्चितोऽस्मि ॥ ८८ ॥

न गम्यो मन्त्राणां न च भवति भैषज्यविषयो
न चापि प्रध्वंसं व्रजति विविधैः शान्तिशतकैः ।
भ्रमावेगादङ्गे किमपि विदधज्जन्यमसमः
स्मरापस्मारोऽयं भ्रमयति दृशं घूर्णयति च ॥ ८९ ॥

न दृष्टः भवेयमिति शेषः । धन्याः पुण्यवन्तः प्रायेण धर्मार्थिनः धर्माभिलाषिणः चिकित्सकाः दिशि दिशि सन्ति ये सर्पदष्टं मां चिकित्सित्वा अरोगं कुर्वन्तीति भावः । किन्तु मुग्धाच्या वामलोचनया स्वयं वीक्षितस्य निरीक्षितस्य मे मम वैद्यः चिकित्सकः न हि नैव, औषधञ्चापि न अस्तीति शेषः । अत्रार्थश्लेषः । तदुक्तं दर्पणे, शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनमिति । शार्दूलविक्रीडितं वृत्तम् ॥ ८७ ॥

दृष्टेति । दृष्ट अस्यां कान्तायां मधुरं गीतम् एतत् नृत्यं रसः अनुरागः अपि स्फुरति विकाशते, असौ परिमलः विमर्दोत्थगन्धः, विमर्दोत्थे परिमल इत्यमरः । एष स्तनानां स्पर्शः स्पर्शजनितं सुखमित्यर्थः । इति इत्थं हृताः नाशिताः परमार्थाः धर्मादय इति यावत् यैः तथाभूतैः भाव्यमाणैः विषयेष्विति शेषः मनसेति कर्तृपदमूह्यम् । अहितकरणेषु कुकार्य्यानुष्ठानेषु दक्षैः पटुभिः पञ्चभिरिन्द्रियैः श्रोत्रनेत्ररसनाघ्राणत्वगभिरिति यावत् वञ्चितः प्रतारितः अस्मि । मालिनीवृत्तम् ॥ ८८ ॥

नेति । अयम् असमः अतुल्यः स्मरापस्मारः कामरूपापस्मारः रोगविशेषः मन्त्राणां न गम्यः न प्रतिविधेयः भैषज्यविषयः औषध-

जात्यन्धाय च दुर्मुखाय च जराजीर्णाखिलाङ्गाय च
ग्रामीणाय च दुष्कुलाय च गलत्कुष्ठाभिभूताय च ।
यच्छन्तीषु मनोहरं निजवपुर्लक्ष्मीलवश्रद्धया
पण्यस्त्रीषु विवेककल्पलतिकाग्रस्तीषु रज्येत कः ॥ ९० ॥
वेश्यासौ मदनज्वाला रूपेन्धनसमेधिता ।
कामिभिर्यत्र हूयन्ते यौवनानि धनानि च ॥ ९१ ॥
कस्मुखति कुलपुरुषो वेश्याधरपल्लवं मनोज्ञमपि ।

प्रतीकार्यं च न भवति, विविधैः नानाप्रकारैः प्राणिगतकैः उपभोगकवस्तुभिः न च प्रध्वंसं क्षयं व्रजति न च नश्यतीत्यर्थः भ्रमावेशात् मोहावेशवशात् अङ्गे देहे किमपि अनिर्वचनीयं भव्यं सुखं विदधत् जनयत् भ्रमयति घूर्णयति दृशं नेत्रं घूर्णयति च । रूपकालङ्कारः । शिखरिणीवृत्तम् ॥ ८९ ॥

जात्यन्धायेति । लक्ष्मीलवश्रद्धया यत्किञ्चिद्धनाशयेत्यर्थः जात्यन्धाय जन्मान्धाय च दुर्मुखाय कटुभाषिणे च जरया जीर्णम् अखिलं समस्तम् अङ्गं यस्य तादृशाय च ग्रामीणाय अविदग्धायेत्यर्थः दुष्कुलाय च अकुलजाताय च गलता कुष्ठेन अभिभूताय आक्रान्ताय च मनोहरं निजं स्वं वपुः शरीरं यच्छन्तीषु अर्पयन्तीषु विवेकः सदसद्ज्ञानमेव कल्पलतिका कल्पतरुः तस्याः ग्रस्तीषु संहारिणीभिति भावः पण्यस्त्रीषु वेश्यासु को जनः रज्येत ? अनुरक्तो भवति ? न कोऽपीत्यर्थः । शार्दूलविक्रीडितं वृत्तम् । रूपकालङ्कारः ॥ ९० ॥

वेश्येति । असौ वेश्या रूपमेव इन्धनं काष्ठं तेन समेधिता संवर्द्धिता मदनज्वाला मदनाग्निशिखेत्यर्थः । यत्र अग्निशिखायां कामिभिः यौवनानि धनानि च हूयन्ते प्रक्षिप्यन्ते । रूपकालङ्कारः । अनुष्टुब्वृत्तम् ॥ ९१ ॥

कस्मुखतीति । कः कुलपुरुषः सत्कुलोद्भवः मानवः मनोज्ञमपि

चारभटचौरचेटकनटविटनिष्ठीवनशरावम् ॥ ९२ ॥

सुचरित्रप्रशंसा ।

धन्यास्त एव तरलायतलोचनानां
तारुण्यपूर्णघनपीनपयोधराणाम् ।
श्यामोदरीषरिलसत्त्रिवलीलतानां
दृष्ट्वाकृतिं विकृतिमेति मनो न येषाम् ॥ ९३ ॥

बाले ! लीलामुकुलितममी सुन्दरा दृष्टिपाताः
किं क्षिप्यन्ते विरम विरम व्यर्थ एष श्रमस्ते ।
सम्प्रत्यन्ये वयमुपरतं बाल्यमाश्रा वनान्ते
श्रान्तो मोहस्तृणमिव जगज्जालमालोकयामः ॥ ९४ ॥

चाराणां किङ्करविशेषाणां भटानां सैनिकानां चौराणां तस्कराणां चेटकानां नीचजातीयविशेषाणां विटानां लम्पटानां निष्ठीवनस्य सुखप्रक्षिप्तश्लेष्मणः शरावं भाजनविशेषभूतं देह्यायाः अधरपल्लवं चुम्बति ? न कोऽपीत्यर्थः । रूपकालङ्कारः । आर्याछन्दः ॥ ९२ ॥

धन्या इति । येषां मनः तरलायतलोचनानां चञ्चलविशालनेत्राणां तारुण्येन पूर्णौ घनौ निबिडौ पीनौ पीवरौ पयोधरौ स्तनौ यासां तथोक्तानां श्यामस्य श्रीणस्य उदरस्य उपरि लसन्त्यः राजन्त्यः त्रिवल्य एव लता यासां तथाभूतानां कान्तानामिति शेषः आकृतिं दृष्ट्वा विकृतिं विकारम् एति प्राप्नोति, त एव धन्याः पुण्यवन्तः । वसन्ततिलकं वृत्तम् ॥ ९३ ॥

बाले इति । हे बाले ! सुन्दरि ! लीलया विभ्रमेण मुकुलितं यथा तथा अमी सुन्दराः चारवः दृष्टिपाताः किं कथं क्षिप्यन्ते ? विरम विरम निवर्तस्व निवर्तस्व एष ते तव श्रमः व्यर्थः निरर्थकः । सम्प्रति वयम् अन्ये अपरे, बाल्यं शैशवम् उपरतं विनष्टम् । वनान्ते

इयं बाला मां प्रत्यनवरतमिन्दीवरदल-
प्रभाचौरं चक्षुः क्षिपति किमभिप्रेतमनया ।
मतो मोहोऽस्माकं स्मरसमरबाणव्यतिकर-
ज्वरज्वालाः शान्तास्तदपि न वराकी विरमति ॥ ९५ ॥
शुभ्रं सद्रसविभ्रमा युवतयः श्वेतातपत्रोज्ज्वला
लक्ष्मीरित्यनुभूयते स्थिरमिव स्फीते शुभे कर्मणि ।
विच्छिन्ने नितरामनङ्गकलहक्रीडात्रुटत्तन्तु किं
मुक्ताजालमिव प्रयाति झटिति भ्रश्यद्दृढो दृश्यताम् ॥ ९६ ॥

वनमोमायाम् आख्या वक्रः, मोहः ज्ञानः निष्टप्तः । जगज्जालं दृश्यमिव आलोकयामः पश्यामः मन्दाक्रान्ता वृत्तम् ॥ ९४ ॥

इयमिति । इयं बाला मां प्रति अनवरतम् इन्दीवराणां प्रभाचौरं कान्तिहरं चक्षुः क्षिपति, अनया बालया किम् अभिप्रेतम् दृष्टम् ? अस्माकं मोहः गतः नष्टः, स्मरस्य कामस्य समरे बाण-व्यतिकरस्य शरनिपातस्य ज्वरज्वालाः सन्तापशिखाः शान्ताः निष्टप्ताः, तदपि तथापि वराकी तपस्विनी इयमिति शेषः न विरमति न निवर्त्तते अनुरागं दर्शयतीति भावः । शिखरिणीवृत्तम् । उपमा-लङ्कारः ॥ ९५ ॥

शुभ्रमिति । शुभ्रा गौरवर्णाः सद्रसविभ्रमाः सन् रसेन रागेण च विभ्रमः विलासः येषां तादृश्यः सुष्ठु रसवत्य इत्यर्थः युवतयः तरुण्यः शुभे कर्मणि कर्मजनिता पूर्वं इति भावः स्फीते प्रवृद्धे सति श्वेतात-पत्रेण उज्ज्वला लक्ष्मीरिति स्थिरमिव अनुभूयते प्रतीयते । विच्छिन्ने अवसिते तस्मिन् शुभे कर्मणीति शेषः तत् स्थिरलक्ष्मीवत् युवति-मण्डलमिति शेषः अनङ्गकलहे या क्रीड़ा तया त्रुटत् छेदं गच्छत् मुक्ताजालमिव नितराम् अतिशयेन भ्रश्यत् अपगच्छत् झटिति द्रुतं

सदा योगाभ्यासव्यसनवशयोरात्ममनसो-
रविच्छिन्ना मैत्री स्फुरति यमिनस्तस्य किमु तैः ।
प्रियाणामालापैरधरमधुभिर्वक्त्रविधुभिः
सनिश्वासामोदैः सकुचकलयाश्लेषसुरतैः ॥ ८७ ॥
किं कन्दर्प ! करं कदर्थयसि ? किङ्कोदण्डझङ्कारितम् ?
रे रे कोकिल ! कोमलङ्कलरवङ्किञ्चित्वं वृथा भाषसे ?
मुग्ध ! स्निग्धविदग्धमधुरैर्लीलैः कटाक्षैरलं ?
चेतः सम्प्रति चन्द्रचूडचरणध्यानामृते वर्त्तते ॥ ८८ ॥

अदृश्यतां प्रयाति किम् ? यावत् शुभादृष्टसद्भावः तावत् तादृश-लक्ष्मीसदृशप्रेयसीसम्भोगः स्यात् असति शुभादृष्टे तत्सम्भोगो नैव भवतीति भावः । शार्दूलविक्रीडितं वृत्तम् । उपमालङ्कारः ॥ ८६ ॥

सदेति । सदा सततं योगाभ्यासव्यसनेन जीवब्रह्मणोरैक्यचिन्तनं सोऽहमिति भावनमिति भावः योगः तस्य अभ्यासे पुनःपुनरनुशीलने यत् व्यसनम् आसक्तिः तेन वशयोः वशं गतयोः आत्ममनसोः जीवचित्तयोः अविच्छिन्ना अनवरता मैत्री यस्य यमिनः जितेन्द्रियस्य स्फुरति विकाशते, तस्य तैः प्रियाणां कान्तानाम् आलापैः मधुरैरिति शेषः अधरमधुभिः वक्त्रविधुभिः मुखचन्द्रैः सुष्ठु निश्वासामोदैः निश्वाससौरभैः तथा सङ्कुचकलयाश्लेषः स्तनमर्दन पूर्वकविहारैरित्यर्थः किमु ? न किमपि प्रयोजनमित्यर्थः । प्रियालापादयः तं तं न विचालयन्तीति भावः । शिखरिणी वृत्तम् ॥ ८७ ॥

किमिति । हे कन्दर्प ! किं कोदण्डेन कुत्सितधनुषा झङ्कारितम् आस्फालितं करं किं कथं कदर्थयसि क्लेशयसि ? रे रे कोकिल ! त्वं वृथा कोमलं कलरवं मधुररवं किं कथं भाषसे ? हे मुग्धे सुन्दरि ! स्निग्धविदग्धमधुरैः सप्रणयचतुरमनोहरैः कटाक्षैः अलं

यदासीदज्ञानं स्मरतिमिरसञ्चारजनितं
तदा सर्वं नारीमयमिदमशेषं जगदभूत्।
इदानीमस्माकं पटुतरविवेकाञ्जनदृशां
समीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते ॥ ९९ ॥
यां चिन्तयामि सततं मयि सा विरक्ता
सा चान्यमिच्छति जनं स जनोऽन्यरक्तः।
अस्मत्कृतेऽपि परितुष्यति काचिदन्या
धिक् तां च तं च मदनं च इमां च मां च ॥ १०० ॥
इति श्रीभर्तृहरिविरचितं शृङ्गारशतकं समाप्तम्।

न किमपि प्रयोजनं मयीति शेषः, यतः चेतः मनः मदीयमिति शेषः चन्द्रचूड़स्य हरस्य चरणध्यानमेव अनन्तं तस्मिन् तत्पाने इति भावः वर्तते तिष्ठति। इदानीं युष्मत्परतन्त्रो नाऽहमिति भावः। शार्दूलविक्रीड़ितं वृत्तम् ॥ ९८ ॥

यदेति। यदा स्मरः काम एव तिमिरम् अन्धकारः तस्य सञ्चारेण आविर्भावेन जनितम् अज्ञानं मोहः आसीत् तदा इदं सर्वम् अशेषं जगत् नारीमयम् अभूत्। इदानीं पटुतरः विशुद्धतरः विवेकः ज्ञानमेव अञ्जनं दृशोर्नयनयोर्येषां तथाभूतानाम् अस्माकं समीभूता दृष्टिः सर्वत्र समदृष्टिरित्यर्थः त्रिभुवनमपि ब्रह्म मनुते पश्यति। शिखरिणीवृत्तम् ॥ ९९ ॥

यामिति। यां सततं चिन्तयामि भावयामि, सा मयि विरक्ता सा च मच्चिन्तितेति शेषः अन्यं जनम् इच्छति, स तद्दिष्टो जनः अन्यस्यां नार्यां रक्तः अनुरागवान्। काचित् अन्या नारी अस्मत्कृतेऽपि मदर्थमपि परितुष्यति, परिचिन्तयतीति पाठान्तरम्। अतः तां नारीं तं पुरुषं मदनं इमां मां च धिक्। संसारोऽयं धिक्कार्य इति भावः वसन्ततिलकं वृत्तम् ॥ १०० ॥

इति वि, ए उपाधिधारिणा श्रीजीवानन्दविद्यासागरभट्टाचार्येण विरचिता शृङ्गारशतकव्याख्या समाप्ता।

दृष्टान्तशतकम् ।

शिवस्मरणमेवैकं संसारान्तकनाशनम् ।
वनौघो घोरदावाग्निनिर्वापणपटुर्भवेत् ॥ १ ॥
साधुरेव प्रवीणः स्यात् सद्गुणास्तवर्णने ।
नवचूताङ्कुरास्वादकुशलः कोकिलः किल ॥ २ ॥
दुर्जनो दूषयत्येव सतां गुणगणं क्षणात् ।
मलिनीकुरुते धूमः सर्वथा विमलाम्बरम् ॥ ३ ॥
यथा दोषो विभात्यस्य जनस्य न तथा गुणः ।
प्रायः कलङ्क एवेन्दोः प्रकटो न प्रसन्नता ॥ ४ ॥

शिवेति । एकं शिवस्य स्मरणमेव ध्यानमेव संसार एव अन्तकः यमः तस्य नाशनं नाशहेतुः । वनानां वेपानां ओघः समूहः घोरस्य उत्कटस्य दावाग्नेर्वनानलस्य निर्वापणे भस्मीकरणे पटुः समर्थः भवेत् । दृष्टान्तालङ्कारः । तदुक्तं, दृष्टान्तस्तु स्वधर्मस्य वस्तुनः प्रतिबिम्बनमिति । अनुष्टुप्वृत्तम् । प्रायेणेवमुत्तरत्र बोध्यम् ॥ १ ॥

साधुरिति । साधुरेव सतां सज्जनानां गुणा एव अद्भुतानि तेषां वर्णने कीर्त्तने प्रवीणः निपुणः स्यात् नान्य इति शेषः । कोकिलः किल पिक एव नवः यः चूताङ्कुरः तस्य आस्वादे कुशलः पटुः नान्य इति शेषः ॥ २ ॥

दुर्जन इति । दुर्जनः क्षणात् क्षणमात्रेण सतां साधूनां गुणगणं गुणराशिं दूषयत्येव । धूमः विमलं निर्मलम् अम्बरम् आकाशं वस्त्रं वा सर्वथा मलिनीकुरुते मलिनयति ॥ ३ ॥

यथेति । अस्य जनस्य प्राणिनः यथा दोषः विभाति प्रकाशते,

विवेक एव व्यसनं पुंसां चययितुं क्षमः ।
अपहर्त्तुं समर्थोऽसौ रविरेव निशातमः ॥ ५ ॥
प्रायः सन्त्युपदेशार्हा धीमन्तो न जड़ाशयाः ।
तिलाः कुसुमसौगन्ध्यवाहिनो न यवाः क्वचित् ॥ ६ ॥
चिन्त्यते नय एवादावमन्दं समुपेप्सुभिः ।
विनम्य पूर्वं सिंहोऽपि हन्ति हस्तिनमोजसा ॥ ७ ॥
संस्थितस्य गुणोत्कर्षः प्रायः प्रस्फुरति स्फुटम् ।
दग्धस्यागुरुखण्डस्य सौरभम् ॥ ८ ॥

तथा गुणो न । इन्दावुदस्य कलङ्क एव प्रायः प्रस्फुटः सुव्यक्तः, प्रसन्नता निर्मलता च ॥ ४ ॥

विवेक इति । विवेकः ज्ञानमेव पुंसां व्यसनं विपदं क्षययितुं नाशयितुं क्षमः योग्यः । असौ रविः सूर्य एव निशातमः रात्रि-तिमिरम् अपहर्त्तुं नाशयितुं समर्थः ॥ ५ ॥

प्राय इति । धीमन्तः बुद्धिमन्तः जनाः प्रायः उपदेशार्हाः उपदेशयोग्याः सन्ति भवन्ति, जड़ाशयाः निर्बोधा न । तिलाः कुसुमानां सौगन्ध्यं वहन्तीति तथाभूताः, यवाः क्वचित् कुत्रापि न तथेति शेषः ॥ ६ ॥

चिन्त्यते इति । अमन्दम् अनपायमित्यर्थः समुपेप्सुभिः सम्यगुपेप्सुभिः जनैः आदौ अयतः नय एव नीतिरेव चिन्त्यते केन नयेन वर्त्तितव्यमिति भाव्यते । सिंहोऽपि पशुरपीति भावः का कथा मानवानामित्यपिशब्दार्थः । पूर्वम् अयतः विनम्य विनतो भूत्वा ओजसा बलेन हस्तिनं हन्ति नाशयति ॥ ७ ॥

संस्थितस्येति । प्रायः बाहुल्येनेत्यर्थः संस्थितस्य स्थितस्य जनस्य गुणानाम् उत्कर्षः स्फुटं सुव्यक्तं यथा तथा प्रस्फुरति प्रकाशते ।

मनस्विहृदयं धत्ते रोषेणैव प्रसन्नताम् ।
भस्मना ज्वलदङ्गारः प्रसादं लभतेतराम् ॥ ९ ॥
उत्तमः क्लेशविक्षोभं क्षमः सोढुं न हीतरः ।
मणिरेव महाशाणघर्षणं न तु मृत्कणः ॥ १० ॥
सजातीयं विना वैरी न जय्यः स्यात् कदाचन ।
विना वज्रमणिं मुक्तामणिर्भेद्यः कथं भवेत् ॥ ११ ॥
सज्जना एव साधूनां प्रथयन्ति गुणोत्करम् ।
पुष्पाणां सौरभं प्रायस्तनुते दिक्षु मारुतः ॥ १२ ॥

दग्धस्य अगुरुखण्डस्य चन्दनविशेषखण्डस्य सौरभं सौगन्ध्यं स्फारीभवति विस्तारं गच्छति ॥ ८ ॥

मनस्विहृदयमिति । मनस्विनां प्रशस्तमनसां जनानां हृदयं रोषेणैव क्रोधेनैव प्रसन्नतां धत्ते आश्रयति यथं रोषाकुलमपि शीघ्रं प्रसीदतीत्यर्थः । ज्वलदङ्गारः ज्वलन्नग्नि इति यावत् भस्मना प्रसादं सौम्यतां शीतलतां लभतेतराम् अतिशयेन लभते इत्यर्थः ॥ ९ ॥

उत्तम इति । उत्तमः महान् जनः क्लेशस्य विक्षोभं विशेषाक्रमणं सोढुं क्षमः शक्तः, इतरः क्षुद्रः जनः न हि नैव क्षम इति शेषः । मणिरेव रत्नमेव महाशाणेन घर्षणं सोढुं क्षम इति शेषः, मृत्कणः मृत्तिकाकणः न ॥ १० ॥

सजातीयमिति । सजातीयं विना वैरी शत्रुः कदाचन न जय्यः जेतुं शक्यः स्यात् । वज्रमणिं हीरकप्रस्तरं विना मुक्तामणिः कथं भेद्यः भवेत् नैव भवेदित्यर्थः ॥ ११ ॥

सज्जना इति । सज्जनाः साधव एव साधूनां गुणोत्करं गुणनिचयं प्रथयन्ति विस्तारयन्ति । मारुतः वायुः प्रायः पुष्पाणां सौरभं दिक्षु तनुते विस्तारयति ॥ १२ ॥

उपकर्त्तुं यथा स्वल्पः समर्थो न तथा महान् ।
प्रायः कूपस्तृषां हन्ति सततं न तु वारिधिः ॥ १३ ॥
सति शीले गुणा भान्ति पुंसां शौर्यादयो यथा ।
यौवने सदलङ्काराः शोभाम्बिभ्रति सुभ्रुवः ॥ १४ ॥
जड़ः प्रभवति प्रायो दुःखं बिभ्रति साधवः ।
शीतांशावुदिते पद्माः सङ्कोचं यान्ति वारिणि ॥ १५ ॥
गुणेन स्पृहणीयः स्यान्न रूपेण युतो नरः ।
सौभाग्यहीनं नादेयं पुष्पं कान्तमपि क्वचित् ॥१६॥

उपकर्त्तुमिति । स्वल्पः सामान्य इतरो जनः यथा उपकर्त्तुं समर्थः, महान् जनः तथा न । कूपः प्रायः बाहुल्येन सततं तृषां पिपासां हन्ति, वारिधिः समुद्रः न तु नैवेत्यर्थः । यथा वारिधेर्जलं लवणमयत्वात् लोकैर्न पीयते, कूपजलन्तु मधुरत्वात् शीतलत्वाच्च पीयते, तथा सामान्यजनेन स्वल्पे कोनापि अनुपकारे कृते दुःखं जानता लोकस्य उपकारः क्रियते, महता तु परेण क्रियमाणमुपकारमनाकाङ्क्षता प्रायेण उपकर्त्तुं नेष्यते इत्यतः सामान्यजनस्य यत्नतः क्रियमाणमुपकारं सर्व आद्रियते महतस्तु कथञ्चित् अयत्नेन क्रियमाणमुपकारं न बहु मन्यते इति भावः ॥ १३ ॥

सतीति । शीले सौजन्ये सति पुंसां शौर्यादयः गुणाः यथा भान्ति शोभन्ते, यौवने सति सुभ्रुवां नारीणां सदलङ्काराः उत्तमभूषणानि तथा शोभा बिभ्रति धारयन्ति ॥ १४ ॥

जड़ इति । जड़ः मूर्खः प्रायः बाहुल्येन प्रभवति प्रभुर्भवतीत्यर्थः साधवस्तु दुःखं बिभ्रति भजन्ते न प्रभावं प्राप्नुवन्तीति भावः । शीतांशौ चन्द्रे जड़मये इति भावः उदिते सति वारिणि जले पद्माः कमलानि सङ्कोचं यान्ति निमीलन्ति ॥ १५ ॥

गुणेनेति । जनः गुणेन युतः स्पृहणीयः प्रशंसनीय इति भावः

कश्चित् कस्यचिदेव स्यात् सुहृद्विश्रम्भभाजनम् ।
पद्मं विकासयत्यर्कः सङ्कोचयति कैरवम् ॥ १७ ॥
ईश्वराः पिशुनान् श्वश्वद् विशन्तीति किमद्भुतम् ।
प्रायो निधय एवाहीन् द्विजिह्वान् दधतेतराम् ॥ १८ ॥
सम्पदास्ते परैः साकं विपदि स्वजनैर्जड़ः ।
जृम्भत्यम्भोरुहं भृङ्गैः शुष्यत्युदकशैवलैः ॥ १९ ॥

स्यात्, कृपेण युतः कृपवानित्यर्थः न । क्वचित् कुत्रापि कालमपि रमणीयमपि पुष्पं सौगन्ध्येन हीनं वर्जितं न आदेयं न ग्राह्यं नादरणीयमित्यर्थः ॥ १६ ॥

कश्चिदिति । कश्चित् जनः कस्यचिदेव जनस्य विश्रम्भभाजनं विश्वासमात्रं सुहृत् सखा स्यात् । अर्कः सूर्यः पद्मं विकासयति प्रस्फोटयति किन्तु कैरवं कुसुदं सङ्कोचयति निमीलयति ॥ १७ ॥

ईश्वरा इति । ईश्वराः धनिन इति यावत् श्वश्वत् सततं पिशुनान् दुर्जनान् विशन्ति आश्रयन्ति इति एतत् किम् अद्भुतम् आश्चर्यम् ? प्रायः बाहुल्येन निधयः रत्नानि द्विजिह्वान् अहीन् सर्पानेव दधतेतराम् अतिशयेन अवलम्बन्ते तेषां शिरःसु तिष्ठन्तीति भावः ॥ १८ ॥

सम्पदीति । जड़ः अज्ञः जनः सम्पदि परैः साकं सार्द्धम् आस्ते तिष्ठति परान् सम्पत्सु सुलभान् जनानाश्रयतीत्यर्थः । विपदि स्वजनैः साकम् आस्ते तिष्ठति विपत्काले सम्पत्सुलभैर्जनैः परित्यक्तत्वात् अनन्यगत्या स्वजनमाश्रयतीति भावः । अम्भोरुहं पद्मं भृङ्गैः सह जृम्भति विजृम्भते विकसितं सत् भृङ्गैः सह शुष्यति शोषं प्राप्नोति । तदानीं भृङ्गा न दृश्यन्ते इति भावः ॥ १९ ॥

नीचावमानमलिनां प्रभुङ्क्ते सम्मदं पुमान् ।
लशुनाक्तां सकर्पूरचर्चां वितनुते तनौ ॥ २० ॥
व्यसनानन्तरं सौख्यं स्वल्पमप्यधिकं भवेत् ।
काषायरसमास्वाद्य स्वादुतीवाम्बु विन्दते ॥ २१ ॥
गुणानामन्तरं प्रायस्तज्ज्ञो जानाति नेतरः ।
मालतीमल्लिकामोदं घ्राणं वेत्ति न लोचनम् ॥ २२ ॥
प्रभूतवयसः पुंसो धियः पाकः प्रवर्त्तते ।
जीर्णस्य चन्दनतरोरामोद उपजायते ॥ २३ ॥

नीचेति । पुमान् भिक्षुः भिक्षुरो वेति भावः नीचानां क्षुद्राणां दास्यां प्रभूणां वेति भावः अवमानेन अनादरेण मलिनां दूषितामित्यर्थः सम्मदं प्रभुङ्क्ते प्रकर्षेण भुनक्ति । तथाहि तनौ शरीरे लशुनाक्तां लशुनमिश्रितां सकर्पूरचर्चां कर्पूराक्तविलेपनं वितनुते करोति जन इति शेषः ॥ २० ॥

व्यसनेति । व्यसनानन्तरं विपदपगमात् परं स्वल्पमपि सौख्यम् अधिकं भवेत् अधिकमिव प्रतीयते इति भावः । काषायरसं हरीतक्यादिरसमिति भावः आस्वाद्य अम्बु जलम् अतीव अतिमात्रं स्वादु मधुरं विन्दते बुध्यते ॥ २१ ॥

गुणानामिति । तज्ज्ञः गुणज्ञ इत्यर्थः गुणानाम् अन्तरं प्रभेदं प्रायः बाहुल्येन जानाति, इतरः अगुणज्ञः न । घ्राणं नासिका मालतीमल्लिकयोः आमोदं वेत्ति अवबुध्यते लोचनं नेत्रं न ॥ २२ ॥

प्रभूतेति । प्रभूतवयसः अधिकवयस्कस्य पुंसः पुरुषस्य धियः बुद्धेः पाकः परिणामः प्रवर्त्तते भवति । जीर्णस्य प्राचीनस्य चारुदत्त इति भावः चन्दनतरोः आमोदः सौरभातिशय इति यावत् उपजायते प्रसरति ॥ २३ ॥

कामाय सृहयत्यात्मा संयतोऽपि मनीषिणः ।
वीथीनियमितोऽप्युच्चा शष्पमासाद्य धावति ॥ २४ ॥
धनागमेऽधिकं पुंसां लोभमभ्येति मानसम् ।
निदाघकाले प्रालेयः प्रायः शैत्यं वहत्यलम् ॥ २५ ॥
सहजोऽपि गुणः पुंसां साधुवादेन वर्धते ।
कामं सुरसलेपेन कान्तिं वहति काञ्चनम् ॥ २६ ॥
निन्दां यः कुरुते साधोस्तथा स्वं दूषयत्यसौ ।
खे धूलिं यस्त्यजेदुच्चैर्मूर्ध्नि तस्यैव सा पतेत् ॥ २७ ॥

कामायेति । मनीषिणः विदुषः संयतोऽपि विषयेभ्यः निवृत्तोऽपि आत्मा अन्तःकरणं कामाय विषयसम्भोगायेत्यर्थः सृहयति आकाङ्क्षति । वीथीनियमितः वृत्तिनिबद्धोऽपि उच्चा दृषः शष्पं नवतृणम् आसाद्य समीपे दृष्ट्वेत्यर्थः धावति अभियाति ॥ २४ ॥

धनागमे इति । पुंसां मानसं धनागमे अर्थोपार्जने अधिकं लोभम् अभ्येति प्राप्नोति । निदाघकाले ग्रीष्मे प्रालेयः शिशिरः प्रायः बाहुल्येन अलम् अत्यर्थं शैत्यं शीतत्वं वहति आश्रयति ॥ २५ ॥

सहज इति । पुंसां सहजोऽपि स्वाभाविकोऽपि गुणः साधुवादेन प्रशंसयेत्यर्थः वर्द्धते वृद्धिं गच्छति । काञ्चनं स्वर्णं सुरसलेपेन सुष्ठुरससंयोगेन औज्ज्वल्यकारकद्रव्यसंयोगेनेत्यर्थः कामं सम्यक् कान्तिं दीप्तिं वहति आश्रयति ॥ २६ ॥

निन्दामिति । यः साधोः निन्दां कुरुते, असौ जनः स्वम् आत्मानं तथा तेनैव साधुनिन्दनेनैव दूषयति दूषितं करोति, सर्वो जनः साधोर्निन्दकमेव दूषयति न तु साधुमिति भावः । यः खे आकाशे धूलिं त्यजेत् सा धूलिः तस्यैव मूर्ध्नि शिरसि उच्चैरतिशयेन पतेत्, तेन आकाशस्य न काचित् हानिरिति भावः ॥ २७ ॥

स्वभावं नैव मुञ्चन्ति सन्तः संसर्गतोऽसताम् ।
न त्यजन्ति कृतं मञ्जु काकसम्पर्कतः पिकाः ॥ २८ ॥
सम्पत्तौ कर्कशं चित्तं खलस्यापदि कोमलम् ।
शीतलं कठिनं प्रायस्तप्तं मृदु भवत्ययः ॥ २९ ॥
प्रायः प्रकुप्यतितरां प्रीत्यैव प्रखलो जनः ।
नयनं स्नेहसम्पर्कात्कालुष्यं समुपैत्यलम् ॥ ३० ॥
शुभं वाप्यशुभं कर्म फलकालमुपेक्षते ।
शरद्येव फलत्याशु शालिर्न सुरभौ क्वचित् ॥ ३१ ॥

स्वभावमिति । सन्तः साधवः असतां संसर्गतः सङ्गात् स्वभावं निजं भावं नैव मुञ्चन्ति नैव त्यजन्ति । पिकाः कोकिलाः काकानां सम्पर्कतः सङ्गेन मञ्जु मनोहरं कृतं रवं न त्यजन्ति ॥ २८ ॥

सम्पत्ताविति । खलस्य दुर्जनस्य चित्तं सम्पत्तौ सम्पत्काले कर्कशं कठिनं लोकपोड़नशीलत्वादिति भावः, आपदि कोमलं मृदु भवति अनुभवादिति भावः । अयः लौहः प्रायः बाहुल्येन शीतलं सत् कठिनं भवति तथा तप्तम् अग्निसंयुक्तं सत् मृदु कोमलं भवति द्रवत्वादिति भावः ॥ २९ ॥

प्राय इति । प्रखलः प्रदुष्टः खलो जनः प्रायः बाहुल्येन प्रीत्यैव प्रणयेनैव प्रकुप्यतितराम् अतिशयेन कुप्यतीत्यर्थः । नयनं नेत्रं स्नेहस्य तैलस्य सम्पर्कात् अलम् अत्यर्थं कालुष्यम् आविलत्वं समुपैति प्राप्नोति ॥ ३० ॥

शुभमिति । शुभं वा अशुभं वा कर्म फलकालम् अपेक्षते प्रतीक्षते काले शुभकर्म अशुभकर्म वा फलतीत्यर्थः । शालिः धान्यविशेषः शरदि शरत्काल एव आशु शीघ्रं फलति, क्वचित् कुत्रापि सुरभौ वसन्ते न फलतीति शेषः ॥ ३१ ॥

भोगेच्छा नोपभोगेन भोगिनां जातु शाम्यति ।
लवणेनान्तरालेन तृष्णा प्रत्युत जायते ॥ ३२ ॥
दुर्लभोऽप्युत्तमः प्रायः सजातीयेन लभ्यते ।
कर्णकोटरगं वारि वारिणैवावकृष्यते ॥ ३३ ॥
जन्तोर्निरुपभोगस्य दृश्यते भुवि रूक्षता ।
वातांशिनो द्विजिह्वत्वं विहितं पश्य वेधसा ॥ ३४ ॥
अर्जितं सज्जनं दृष्ट्वा द्वेष्टि नीचः पुनः पुनः ।
कवलीकुरुते स्वर्भं विधुं दिवि विधुन्तुदः ॥ ३५ ॥
न लभन्ते विनोद्योगं जन्तवः सम्पदां पदम् ।

भोगेच्छेति । भोगिनां विषयभोगरतानां भोगेच्छा विषयसम्भोग-वासना उपभोगेन विषयसम्भोगेन जातु कदाचित् न शाम्यति न निवर्त्तते । अन्तरालेन अन्तःस्थितेन लवणेन जलस्येति भावः प्रत्युत वैपरीत्ये पिपासाङ्कुरस्य दूरे तिष्ठतीति भावः तृष्णा पिपासा जायते उद्भवति । लवणजलपाने तृष्णानिवृत्तिर्न स्यात् प्रत्युत तृष्णाद्वि-रेव स्यादिति भावः ॥ ३२ ॥

दुर्लभ इति । दुर्लभः दुष्प्रापोऽपि उत्तमः सज्जनः प्रायः बाहुल्येन सजातीयेन तुल्यजातीयेनैव लभ्यते प्राप्यते इत्यर्थः । कर्णकोटरगं कर्णविवरगतं वारि जलं वारिणैव जलेनैव अवकृष्यते आकृष्य बहिर्नीयते इति यावत् ॥ ३३ ॥

जन्तोरिति । भुवि पृथिव्यां निरुपभोगस्य निराहारस्य जन्तोः प्राणिनः रूक्षता कर्कशता दृश्यते । वातांशिनः वायुमात्रभोजिनः अन्यत् किमपि भक्ष्यमलभमानस्येति भावः भुजङ्गस्येति शेषः द्विजिह्वत्वं विषधरत्वमिति यावत् वेधसा विधात्रा विहितं पश्य अव-लोकय ॥ ३४ ॥

अर्जितमिति । नीचः क्षुद्रो जनः अर्जितम् अभ्युदितमित्यर्थः

सुराः क्षीरोदविक्षोभमनुभूयामृतं पपुः ॥ २६ ॥
सम्पत्तौ कोमलं चित्तं साधोरापदि कर्कशम् ।
सुकुमारं मधौ पत्रं तरोः स्यात्कठिनं शुचौ ॥ २७ ॥
आकरः कारणं जन्तोर्दौर्जन्यस्य न जायते ।
कालकूटः सुधासिन्धोः प्राणिनां प्राणहारकः ॥ २८ ॥
गुणदोषावबाध्येते पुसां संशीलनाद् बुधैः ।
लेभातेऽमृतगरले मन्थनाद्दक्षुधैः सुरैः ॥ २९ ॥

सज्जनं साधुं दृष्ट्वा पुनः पुनः हेष्टि निन्दति । विधुन्तुदः राहुः दिवि आकाशे खस्थं प्रकृतौ स्थितं खमेऽलक्षा दीप्यमानमिति भावः विधुं चन्द्रं कवलीकृते ग्रसति ॥ २५ ॥

नेति । जन्तवः प्राणिनः सदुद्योगं परिश्रमं विना सम्पदां पदं न लभन्ते न प्राप्नुवन्ति । सुराः देवाः क्षीरोदस्य क्षीरसागरस्य विक्षोभं विलोड़न-दुःखम् अनुभूय अमृतं पपुः पीतवन्तः ॥ २६ ॥

सम्पत्ताविति । सम्पत्काले साधोः चित्तं कोमलं लोकोपकारकरणोत्सुकमिति भावः, आपदि कर्कशं कठिनं तदुद्यम-त्यादिति भावः । तरोर्वृक्षस्य पत्रं मधौ वसन्ते सुकुमारं सुकोमलं, शुचौ ग्रीष्मे कठिनं स्यात् ॥ २७ ॥

आकर इति । आकरः उत्पत्तिस्थानं जन्तोः प्राणिनः दौर्ज-न्यस्य कारणं न जायते न भवति । सुधासिन्धोः अमृतनिधेः क्षीरसागरस्येत्यर्थः कालकूटः हलाहलं प्राणिनां प्राणहारकः जीवननाशकः भवतीति शेषः ॥ २८ ॥

गुणेति । बुधैर्विद्वद्भिः संशीलनात् सम्यगनुशीलनात् पुंसां गुण-दोषौ अवाप्येते ज्ञाप्येते इति भावः । सुरैः देवैः अब्धेः क्षीरसागरस्य मन्थनात् विलोड़नात् अमृतगरले अमृतहलाहले लेभाते ॥ २९ ॥

स्वभावं न जहात्येव साधुरापद्गतोऽपि सन् ।
कर्पूरः पावकस्पृष्टः सौरभं लभतेतराम् ॥ ४० ॥
न व्याप्तिरेषा गुणिनो गुणवान् जायते ध्रुवम् ।
चन्दनेऽनलसन्दग्धे न भस्म सुरभि क्वचित् ॥ ४१ ॥
अप्यापत्समयः साधोः प्रयाति श्लाघनीयताम् ।
विधोर्विधुन्तुदाक्रान्दविपत्कालोऽपि सुन्दरः ॥ ४२ ॥
विना परीक्षां नो तत्त्वं प्रसिद्धं ज्ञायते सतः ।
सुवर्णबन्धान्नो शुद्धिर्ज्ञायते कर्षणं विना ॥ ४३ ॥

स्वभावमिति । साधुर्जनः आपद्गतोऽपि सन् स्वभावं निजं भावं साधुत्वमित्यर्थः न जहात्येव न त्यजत्येव । कर्पूरः पावकेन अग्निना स्पृष्टोऽपि सौरभं लभतेतराम् अतिशयेन लभते इत्यर्थः ॥४०॥

नेति । गुणिनः गुणवतः जनात् गुणवान् जायते ध्रुवं निश्चितम् इषा व्याप्तिः सिद्धान्तः न । चन्दने अनलेन अग्निना सन्दग्धे सम्यक् दग्धे सति भस्म तदीयमिति शेषः क्वचित् कुत्रापि न सुरभि न सुगन्धं स्यादिति शेषः । गुणवतोऽपि चन्दनात् जातं भस्म न सुरभीति कारणगुणाः कार्यगुणमारभन्ते इति व्याप्तिर्न सर्वत्र प्रसरतीति भावः ॥ ४१ ॥

अपीति । साधोः सुजनस्य आपत्समयः अपि श्लाघनीयतां प्रशंसनीयतां प्रयाति गच्छति आपद्यपि साधुः श्लाघ्यं कर्म करोतीति भावः । विधोश्चन्द्रस्य विधुन्तुदेन राहुणा आक्रान्दः आक्रमणमेव विपत् तस्याः कालोऽपि सुन्दरः लोकोपकारकत्वात् सत्कार्यानुष्ठानेनेति भावः ॥ ४२ ॥

विनेति । परीक्षां परिदर्शनं विना सतः साधोः प्रसिद्धं प्रख्यातं तत्त्वं याथार्थ्यं नो ज्ञायते नावबुध्यते । कर्षणं कषणप्रस्तरे

प्राप्य वित्तं जड़ास्तूर्णं निर्वृतिं यान्ति नान्यथा ।
तोयमासाद्य गर्जन्ति न रिक्तास्तनयित्नवः ॥ ४४ ॥
कार्यापेक्षी जनः प्रायः प्रीतिमाविष्करोत्यलम् ।
लोभार्थी शौण्डिकः श्वभ्रैर्मेषं पुष्णाति पेशलैः ॥ ४५ ॥
दुर्जनो जीयते युक्त्या निग्रहेण न धीमता ।
निपात्यते महावृक्षस्तत्समीपक्षितिक्षयात् ॥ ४६ ॥

घर्षणं विना सुवर्णस्य बन्धात् कटककुण्डलादिनिर्माणात् बुद्धिः नैर्मल्यं न त्यजति ॥ ४३ ॥

प्राप्येति । जड़ाः मूर्खाः जड़स्वभावा वा वित्तं धनं प्राप्य तूर्णं शीघ्रं निर्वृतिं सन्तोषं यान्ति प्राप्नुवन्ति अन्यथा धनाप्राप्ताविति भावः न । स्तनयित्नवः मेघाः तोयं जलम् आसाद्य गर्जन्ति रिक्ताः जलरहिता इत्यर्थः न । दुर्जनानां पूर्णतैव औद्धत्यहेतुरिति भावः ॥ ४४ ॥

कार्यापेक्षी इति । कार्यमपेक्षते आकाङ्क्षतीति तथोक्तः कार्यार्थीत्यर्थः जनः प्रायः प्राचुर्येण अलम् अत्यर्थं प्रीतिम् आविष्करोति प्रकटयति, स्वकार्यं साधनायेति भावः । लोभार्थी लुब्धः मांसे इति यः । मांसार्थीति पाठान्तरं समीचीनम् । शौण्डिकः मांसजीवीत्यर्थः पेशलैः कोमलैः श्वभ्रैः नवत्वचैः मेषं पुष्णाति पालयति ॥ ४५ ॥

दुर्जन इति । धीमता बुद्धिमता जनेन दुर्जनः युक्त्या योगेन उपायेन जीयते जेतुं शक्यते, निग्रहेण शासनेन न । तस्य महावृक्षस्य समीपे तत्पार्श्वे इति यावत् या क्षितिः भूमिः तस्याः क्षयात् खननादिनेति भावः महावृक्षः निपात्यते अधः क्रियते । महावृक्षस्य अन्येन केनापि शाखादिच्छेदनभेदनेन यथा न पातनं तथा दुर्जनस्य अपमान— दभिने शान्तिः । विशिष्टोपायेन तत्खननेन वृक्षस्येव दुर्जनस्य निपातनं कार्यमिति भावः ॥ ४६ ॥

सुखदुःखे समे स्यातां जन्तूनां क्लेशहेतुके ।
मूर्ध्नि स्थितानां केशानां भवेतां स्नेहच्छेदने ॥ ४७ ॥
दुष्टदुर्जनदौरात्म्यैः सज्जने रज्यते जनः ।
आरुह्य पर्वतं पान्थः सानौ निर्वृतिमेत्यलम् ॥ ४८ ॥
स्वभावसुन्दरं वस्तु न संस्कारमपेक्षते ।
मुक्तारत्नस्य शाणास्त्वर्षणं नोपयुज्यते ॥ ४९ ॥
शोभते विदुषां मध्ये नैव निर्गुणमानसः ।
अन्तरे तमसान्धीपः शोभते नार्कतेजसाम् ॥ ५० ॥

सुखदुःखे इति । जन्तूनां प्राणिनां सुखदुःखे सुखजनकदुःखजनकवस्तुनी समे तुल्ये क्लेशहेतुके क्लेशकारणे स्याताम् । तथाहि मूर्ध्नि शिरसि स्थितानां केशानां स्नेहच्छेदने क्लेशहेतुके भवेताम् । केशेषु सत्सु स्नेहे शिरःपीड़या क्लेशः, स्नेहत्यागेन छेदने च मनोदुःखं तस्मात् वस्तुमात्रं सुखदं दुःखदञ्चेति भावः ॥ ४७ ॥

दुष्टेति । दुष्टानाम् असतां दुर्जनानां खलानां दौरात्म्यैः उपद्रवैरित्यर्थः जनः सज्जने साधुजने रज्यते अनुरक्तो भवति । पान्थः पथिकः पर्वतं दुरारोहं विविधहिंस्रादिजन्तुसद्भावादिति भावः आरुह्य सानौ तद्दोर्ध्वे प्रस्थदेशे अलम् अत्यर्थं निर्वृतिं विश्रामसुखमित्यर्थः एति प्राप्नोति ॥ ४८ ॥

स्वभावेति । स्वभावेन प्रकृत्या सुन्दरं मनोरमं वस्तु संस्कारं न अपेक्षते, न शोधनमर्हतीत्यर्थः । मुक्तारत्नस्य शाणास्त्वेष घर्षणं न उपयुज्यते । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः । सामान्यं वा विशेषेण विशेषस्तेन वा यदि । कार्यञ्च कारणेनेदं कार्येण च समर्थ्यते । साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा तत इति दर्पणकारः ॥ ४९ ॥

शोभते इति । निर्गुणं गुणरहितं मानसं यस्य तथाभूतो जनः

युक्त्या परोक्षं बाधेत विपक्षक्षपणक्षमः ।
शोषयत्यचिरेणैव प्रान्तरस्थमलं पयः ॥ ५१ ॥
दुर्गदेशप्रविष्टोऽपि शूरोऽभ्येति पराभवम् ।
गाढपङ्कनिमग्नाङ्गो मातङ्गोऽप्यवसीदति ॥ ५२ ॥
नयेनाङ्गुरितं शौर्यं जयाय न तु केवलम् ।
अन्ययुक्तं विषं भुक्तं पथ्यं स्यादन्यथा मृतिः ॥ ५३ ॥
मृदुभिर्बहुभिः शूरः पुम्भिरेको न बाध्यते ।

विदुषां पण्डितानां मध्ये नैव शोभते । दीपः तमसाम् अन्धकाराणाम् अन्तरे मध्ये शोभते, अर्कतेजसां सौररश्मीनाम् अन्तरे न शोभते इति शेषः ॥ ५० ॥

युक्त्येति । विपक्षाणां शत्रूणां क्षपणे निराकरणे क्षमः शक्तः युक्त्या उपायेन परोक्षम् अप्रत्यक्षं गूढमिति भावः बाधेत पीडयेत् शत्रुमिति शेषः । तथाहि प्रान्तरस्थं क्षेत्रमध्यस्थं पयः जलम् अचिरेणैव शीघ्रमेव अलम् अतिशयेन शोषयति रविरिति शेषः ॥५१॥

दुर्गेति । शूरः प्रबलः जनः दुर्गदेशप्रविष्टोऽपि शत्रुदुर्गमस्थानस्थितोऽपि पराभवम् अभ्येति लभते । मातङ्गः हस्ती अपि गाढे घने पङ्के कर्दमे निमग्नं प्रविष्टम् अङ्गं यस्य तथाभूतः सन् अवसीदति अवसादं प्राप्नोति विनश्यतीत्यर्थः उत्थातुमसामर्थ्यादिति भावः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ५२ ॥

नयेनेति । नयेन नीत्या अङ्गुरितं प्रयुक्तमिति यावत् शौर्यं बलं जयाय जयसाधनाय भवतीति शेषः केवलं शौर्यं न तु नैव जयायेति शेषः । अन्येन द्रव्येण युक्तं मिश्रितं विषं भुक्तं भक्षितं पथ्यं हितं स्यात्, अन्यथा कुफलभक्षणे इति भावः मृतिः मरणं स्यादिति शेषः ॥ ५३ ॥

मृदुभिरिति । एकः शूरः बलवान् जनः बहुभिः मृदुभिः

कपोतपोतकैरेकः श्येनो जातु न बाध्यते ॥ ५४ ॥
येनात्मा पण्यतां नीतः स एवान्विष्यते जनैः ।
हस्ती हेमसहस्रेण क्रीयते न मृगाधिपः ॥ ५५ ॥
गुणो गुणान्तरापेक्षी स्वरूपख्यातिहेतवे ।
स्वभावरम्यं लावण्यं तारुण्येन मनोहरम् ॥ ५६ ॥
सुलभं वस्तु सर्वस्य न यात्यादरणीयताम् ।
स्वदारपरिहारेण परदारार्थिनो जनाः ॥ ५७ ॥
विक्रीतं निजमात्मानं वस्त्रैः संस्कुरुते जड़ः ।

दुर्बलैरित्यर्थः पुंभिः न बाध्यते न पराजीयते इत्यर्थः । जातु कदाचित् कपोतपोतकैः पारावतशिशुभिः एकः श्येनः पक्षिविशेषः न बाध्यते न ताड्यते । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ५४ ॥

येनेति । येन आत्मा पण्यतां विक्रेयतां नीतः विक्रयार्थं प्रयुक्तः, स एव जनैः अन्विष्यते मृग्यते । हस्ती हेमसहस्रेण सहस्रसुवर्णमुद्रया क्रीयते, मृगाधिपः सिंहः न क्रीयते इति शेषः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ५५ ॥

गुण इति । गुणः गुणान्तरम् अपेक्षते इति तथोक्तः गुणान्तरसहकृत इति भावः स्वरूपस्य ख्यातिहेतवे प्रशंसाकारणाय भवतीति शेषः । स्वभावेन रम्यं लावण्यं तारुण्येन नवयौवनसुखेन मनोहरम् ॥ ५६ ॥

सुलभमिति । सुलभम् अनायासलभ्यं वस्तु सर्वस्य जनस्य आदरणीयतां न याति न प्राप्नोति । तथाहि जनाः स्वदारपरिहारेण निजभार्यापरित्यागेन परदारार्थिनः परस्त्रीलोलुपाः भवन्तीति शेषः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ५७ ॥

विक्रीतमिति । जड़ः मूर्खः जनः विक्रीतं निजम् आत्मानं

परेभ्य. स्वशरीरस्य के वा भूषां वितन्वते ॥ ५८ ॥
क्षणक्षयिणि सापाये भोगे रज्यन्ति नोत्तमाः ।
सत्यज्याम्भोजकिञ्जल्कं न प्रार्थयति शैवलम् ॥ ५९ ॥
असम्भवगुणस्तुत्या जायते स्वात्मनस्त्रपा ।
कर्णिकारं सुगन्धीति वदन् को नोपहस्यते ॥ ६० ॥
धनाशया खलीकारः कस्य नाम न जायते ।
दूरादामिषलोभेन बध्यते खे वरः खगः ॥ ६१ ॥

स्वदेहस्मित्यर्थः वस्त्रैः वसनैः सस्कुरुते भूषयतीत्यर्थः क्रीतदेहस्य भूषा केति भावः । के वा जनाः परेभ्यः परेषां तुष्ट्यर्थमिति भावः स्वशरीरस्य भूषाम् अलङ्कारं वितन्वते विस्तारयन्ति कुर्वन्तीत्यर्थः ॥५८॥

क्षणेति । उत्तमाः महान्तः क्षणक्षयिणि क्षणविनश्वरे सापाये सविघ्ने भोगे न रज्यन्ति न संसक्ता भवन्तीत्यर्थः । अम्भोजानां पद्मानां किञ्जल्कं केशरं सर्वदा सुलभमिति भावः सत्यज्य शैवलं जलनीलीम् अल्पकालस्थायिनीमिति भावः न प्रार्थयति नाकाङ्क्षति हंस इति शेषः प्रार्थयति इति परस्मैपदप्रयोगश्चिन्त्यः ॥ ५९ ॥

असम्भवेति । असम्भवतां गुणानां परकीयाणामिति भावः स्तुत्या प्रशंसया स्वस्य आत्मनः त्रपा लज्जा जायते । तथाहि कर्णिकारं कर्णिकारकुसुमं सुगन्धीति वदन् को जनः न उपहस्यते न उपहासास्पदं भवति ? सर्व एव भवतीत्यर्थः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ६० ॥

धनाशयेति । धनाशया अर्थलोभेन कस्य जनस्य खलीकारः निर्भर्त्सनमिति भावः न जायते नाम, सर्वस्यैव तदर्थं महान् क्लेशः स्यादिति तात्पर्यम् । सम्भावनायां नामशब्दः । तथाहि दूरात् आमिषं भोग्यवस्तु तस्य लोभेन खे आकाशे आगच्छन्निति शेषः वरः श्रेष्ठः महानित्यर्थः खगः पक्षी बध्यते निपात्यते व्याधैरिति शेषः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ६१ ॥

तटस्थैः ख्यापितास्त्वेतो विशन्ति गुणिनां गुणाः ।
उत्कोषितानां पद्मानां गन्धो वायुभिराहृतः ॥ ६२ ॥
निजाशयवदाभाति पुंसां चित्ते पराशयः ।
प्रतिमा सुखचन्द्राभे कृपाणे याति दीर्घताम् ॥ ६३ ॥
अधमं बाधते भूयो दुःखवेगो न तूत्तमम् ।
पादद्वयं व्रजत्याशु शीतरश्मेर्न चक्षुषी ॥ ६४ ॥
गुणवान् सुचिरस्थायी देवोऽपि नाभिजायते ।
तिष्ठत्येकां निशाञ्चन्द्रः श्रीमान् सम्पूर्णमण्डलः ॥ ६५ ॥

तटस्थैरिति । गुणिनां गुणवतां गुणाः दयादाक्षिण्यादयः तटस्थैः उदासीनैः तत्सम्बन्धवर्जितैरिति यावत् ख्यापिताः कीर्त्तिताः न तु स्वेन स्वकीयैर्वेति भावः चेतः लोकानामिति शेषः विशन्ति हृदयङ्गमा भवन्तीत्यर्थः । तथाहि उत्कोषितानां विकसितानां पद्मानां वायुभिराहृतः गन्धः लोकानां हृदयं प्रविश्य आनन्दयतीति शेषः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ६२ ॥

निजेति । पुंसां नराणां चित्ते मनसि पराशयः परस्य आशयः मानसो भावः निजाशयवत् स्वकीय आशय इव आभाति प्रकाशते । सुखचन्द्राभे सुखचन्द्रस्येव प्रभाशालिनि कृपाणे खड्गे प्रतिमा प्रतिबिम्बं सुखचन्द्रस्येति शेषः दीर्घतां आयतत्वं याति गच्छति कृपाणस्य दीर्घावयवत्वादिति भावः ॥ ६३ ॥

अधममिति । दुःखानां शोकक्लेशादीनां वेगः अधमं नीचं जनं भूयः अत्यन्तं बाधते उत्तमं महान्तं जनं न तु नैव बाधते इति शेषः । शीतरश्मेः पादद्वयं चरणयुगलम् आशु शीघ्रं व्रजति गच्छति, चक्षुषी नेत्रे न व्रजतीति शेषः ॥ ६४ ॥

गुणवानिति । गुणवान् देवोऽपि सुचिरस्थायी दीर्घकालजीवी न अभिजायते । तथाहि श्रीमान् सम्पूर्णमण्डलः चन्द्रः एकां निशां

यत एवागतो दोषस्तत एव निवर्त्तते।
अग्निदग्धस्य विस्फोटशान्तिः स्यादग्निना ध्रुवम् ॥६६॥
स्वधियो निश्चयो नास्ति यस्य स भ्रमते स्वयम्।
प्रवातबालपत्रस्थः पटस्तत्र निदर्शनम् ॥ ६७ ॥
कथाप्रबन्धे बन्ध्येऽपि कश्चिदेवानुरज्यते।
प्रायः श्वासादपत्यस्य श्वसन्निजकलेवरे ॥ ६८ ॥
बुद्धिमत्त्वाभिमानी को भवेत् प्राज्ञोपजीविनाम्।
अन्यदेयैरलङ्कारैर्नाहङ्कारो विभूषणे ॥ ६९ ॥

रात्रिं व्याप्येत्यर्थः, व्याप्तौ द्वितीया। तिष्ठति। विशेषेण सामान्य-समर्थनरूपोऽर्थान्तरन्यासः ॥ ६५ ॥

यत इति। दोषः यत एव यस्मादेव आगतः उत्पन्नः, तत एव निवर्त्तते शाम्यति। तथाहि अग्निदग्धस्य अग्निना ध्रुवम् अग्निनैव विस्फोटानां व्रणानां शान्तिः स्यात्। विशेषेण सामान्य-समर्थनरूपोऽर्थान्तरन्यासः ॥ ६६ ॥

स्वधिय इति। यस्य स्वधियः निजबुद्धेः निश्चयः स्थिरता नास्ति स स्वयं भ्रमते घूर्णते किमपि कर्त्तुं न निश्चिनोतीत्यर्थः। तत्र विषये प्रकृष्टो वातो वायुर्यत्र तादृशे बालपत्रे नवपत्रे तिष्ठतीति तथोक्तः पटः वसनं निदर्शनं दृष्टान्तः ॥ ६७ ॥

कथाप्रबन्धे इति। कथाप्रबन्धे बन्ध्येऽपि कश्चिदेव जनः अनुरज्यते अनुरक्तो भवति। प्रायः प्रायेणेत्यर्थः अपत्यस्य पुत्रस्येत्यर्थः श्वासात् जीवनात् निजकलेवरे स्वशरीरे श्वसन् जीवन् अनुरज्यते इति शेषः ॥ ६८ ॥

बुद्धिमत्त्वेति। प्राज्ञोपजीविनां पण्डितसेविनां मध्ये को जनः बुद्धिमत्त्वाभिमानी बुद्धिशालित्वाहङ्कारी भवेत्। अन्येन देवैः

उत्तमोऽप्यधमस्य स्याद् याच्ञानम्रकरः क्वचित् ।
कौस्तुभादीनि रत्नानि ययाचे हरिरब्धिम् ॥ ७० ॥
प्रयत्ने समके केचिदेव स्युः फलभागिनः ।
क्षीरोदमथनाद्दैवैरमृतं प्रापि नासुरैः ॥ ७१ ॥
गुणैः पूजा भवेत् पुंसां नैकस्माज्जायते कुलात् ।
चूडारत्नं शशी शम्भोः यानमुच्चैःश्रवा हरेः ॥ ७२ ॥

भिक्षालब्धैरिति भावः न तु स्वसामर्थ्येन प्राप्तैरिति भावः अलङ्कारैः विभूषणे स्वदेहालङ्करणे अहङ्कारो न कर्त्तव्य इति शेषः ॥ ६९ ॥

उत्तम इति । क्वचित् उत्तमोऽपि महानपि अधमस्य नीचस्य निकटे इति शेषः याच्ञया नम्रौ करौ यस्य तथाभूतः स्यात् । तथाहि हरिर्नारायणः कौस्तुभादीनि रत्नानि अब्धिं समुद्रं ययाचे प्रार्थयामास । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ७० ॥

प्रयत्ने इति । प्रयत्ने प्रयासे समके तुल्ये, अपिरत्राध्याहार्यः । केचिदेव न तु सर्वे इति भावः फलभागिनः स्युः भवेयुः । तथाहि दैवैः क्षीरोदस्य मथनात् अमृतं प्रापि प्राप्तम् असुरैः तुल्यप्रयासैरपीति भावः न प्रापीति शेषः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ७१ ॥

गुणैरिति । गुणैः पुंसां पूजा भवेत् गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वय इति प्रयोगश्चात्र साम्येनोद्दनीयः । एकस्मात् केवलात् कुलात् सद्वंशात् न जायते । सत्कुलजातत्वमेव न पूजास्थानमिति भावः । शशी चन्द्रः शम्भोः हरस्य चूडारत्नं शिरोमणिः, उच्चैःश्रवाः तदाख्यः अश्वः हरेरिन्द्रस्य यानं वाहनं जातः चन्द्रस्य गुणाधिक्यात् हरमौलौ अवस्थानं तथा एकस्थानजातस्यापि उच्चैःश्रवसः गुणाप्रकर्षात् इन्द्रस्य वाहनत्वं सञ्जातम् । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ७२ ॥

भोगः परोपतापेन पुंसां दुःखाय न स्थिरः ।
पानमप्यसृजः क्षिप्रं स्वपीड़ायै जलौकसाम् ॥ ७३ ॥
नोपभोगपरानर्थान् कोऽपि सञ्चिनुते चिरम् ।
आखवः किमलङ्कारानात्मन्याहृत्य कुर्वते ॥ ७४ ॥
विवर्णवचनैर्मन्युर्गूढ़ोऽप्यन्तः प्रकाशते ।
दग्धनान्तरसंस्थैश्च ज्वलत्यग्निः पयःकणैः ॥ ७५ ॥
निकटस्थं गरीयांसमपि लोको न मन्यते ।
पवित्रामपि यन्मर्त्या न नमस्यन्ति जाह्नवीम् ॥ ७६ ॥

भोग इति । परोपतापेन परं पीड़यित्वेति भावः पुंसां भोगः वषयसम्भोगः दुःखाय परिणतावितिशेषः भवति, अतः असौ न स्थिरः न परिणतिं सहते इति भावः । जलौकसाम् असृजः रक्तस्य परकीयस्येति शेषः पानमपि क्षिप्रं शीघ्रं स्वपीड़ायै आत्मपीड़ायै भवतीति शेषः । परिपाकं न कर्तुं शक्नुवन्तीति भावः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ७३ ॥

नेति । कोऽपि जनः उपभोगपरान् उपभोग्यानित्यर्थः अर्थान् परिच्छदादीनिति भावः चिरं न सञ्चिनुते न अर्थसञ्चयं करोतीत्यर्थः । तथाहि आखवः उन्दुरवः आत्मनि आहृत्य अलङ्कारान् भूषणानि किं कुर्वते नैव कुर्वते इत्यर्थः । खोदरपूरणार्थमेवार्थसञ्चयं जनाः कुर्वन्ति न तु भूषणाद्यर्थमिति भावः ॥ ७४ ॥

विवर्णेति । अन्तः गूढ़ोऽपि मन्युः क्रोधः शोको वा विवर्णवचनैः विकृतवचनैरिति यावत्, विवर्णवदनैरित्यपि पाठः । प्रकाशते । अग्निः दग्धनान्तरसंस्थैः काष्ठाभ्यन्तरस्थितैः पयसां जलानां कणैः अग्निः ज्वलति दीप्यते ॥ ७५ ॥

निकटस्थमिति । लोकः निकटस्थं सन्निहितं गरीयांसमपि जनं न मन्यते नाद्रियते, यत् यस्मात् मर्त्याः मानवाः पवित्रां पाप-

स्वजनः स्वात्मवज्जन्तुर्ज्ञायते गुणवान् परैः ।
गोपैर्गोपवदज्ञायि हरिर्देवैर्जगत्पतिः ॥ ७७ ॥
उत्तमस्तोषमायाति तदङ्गं पोष्यते यदि ।
वृक्षः प्रसीदति प्रायः पादाभ्यङ्गेन न स्वयम् ॥ ७८ ॥
सर्वत्र गुणवानेव चकास्ति प्रथिते नरे ।
मणिर्मूर्ध्नि गले बाहौ पादपीठेऽपि शोभते ॥ ७९ ॥
उत्तमं सुचिरं नैव विपदोऽभिभवन्त्यलम् ।
राहुग्रसनसम्भूता क्षणं विच्छाययेन्दुम् ॥ ८० ॥

हारिणीमपि जाह्नवीं गङ्गां निकटस्थामिति शेषः न नमस्यन्ति । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ७६ ॥

स्वजन इति । गुणवान् स्वजनः स्वजनैः इति शेषः स्वात्मवत् जन्तुः प्राणी ज्ञायते निश्चीयते तथा परैः स्वजनभिन्नैः जनैः गुणवान् एव ज्ञायते । तथाहि गोपैः हरिः कृष्णः गोपवत् गोप इव, देवैः जगतां पतिः अज्ञायि ज्ञातः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ७७ ॥

उत्तम इति । उत्तमः क्वान् जनः तोषम् आयाति सन्तुष्यतीत्यर्थः यदि तस्य अङ्गं क्षुते सेव्यते । वृक्षः पादाभ्यङ्गेन चरणे तैलदानेनेत्यर्थः मूले जलदानेनेति भावः प्रायः प्रसीदति प्रसादं गच्छति पोषं गच्छतीति भावः स्वयम् आत्मना न प्रसीदतीत्यर्थः ॥ ७८ ॥

सर्वत्रेति । गुणवान् जनः सर्वत्र प्रथिते विख्याते साधुत्वेनेति भावः नरे नरसमीपे इत्यर्थः एव चकास्ति शोभते । तथाहि मणिः मूर्ध्नि शिरसि गले कण्ठे बाहौ पादपीठेऽपि शोभते ॥ ७९ ॥

उत्तममिति । विपदः उत्तमं जनं सुचिरं दीर्घकालं नैव

प्रायः स्वभावं मुञ्चन्ति सन्तः संसर्गतोऽसताम् ।
चण्डाः कामानलात् पादा हिमांशोरमृतसृजः ॥८१॥
तुल्यं परोपतापित्वं क्रुद्धयोः साधुनीचयोः ।
न दाहे ज्वलतोर्भिन्नश्चन्दनेध्मनयोः क्वचित् ॥ ८२ ॥
न भाति वाच्छा वैजात्ये न देवा भान्ति वादिनि ।
अञ्जनं दूषणं वक्त्रे भूषणं किल लोचने ॥ ८३ ॥

अलम् अत्यर्थम् अभिभवन्ति । तथाहि राहुग्रसने सम्भूता सञ्जाता विप्रादिति शेषः । विधुं चन्द्रं क्षणं क्षणकाल व्याप्य विच्छाययेत् मलिनयेत् । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ८० ॥

प्राय इति । सन्तः साधवः असता ससर्गतः सङ्गात् स्वभावं निजं भावं प्रायः बाहुल्येन मुञ्चन्ति त्यजन्ति । तथाहि अमृतसृजः अमृतवर्षिणः हिमांशोः चन्द्रस्य पादाः किरणाः कामानलात् कामजन्यसन्तापात् चण्डाः उग्राः भवन्तीति शेषः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ८१ ॥

तुल्यमिति । क्रुद्धयोः कुपितयोः साधुनीचयोः परोपतापित्वं परपीडकत्वं तुल्यं समम् । क्वचित् कुत्रापि ज्वलतोः चन्दनेध्मनयोः चन्दनकाष्ठतदन्यकाष्ठयोः दाहे दहनकार्ये न भिन्नं न प्रभेदोऽस्तीति शेषः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥८२॥

नेति । वैजात्ये विजातीये वस्तुनीति शेषः अयोग्ये वस्तुनीति भावः वाच्छा अभिलाषः न भाति न शोभते, देवाः वादिनि तर्कवादरते नास्तिके इति भावः न भान्ति न शोभन्ते नाद्रियन्ते । तथाहि वक्त्रे वदने अञ्जनं कज्जलं दूषणं लोचने किल नयने एव भूषणम् अलङ्कारः शोभाधायकमिति भावः ॥ ८३ ॥

दुर्भगः स्यात् प्रकृत्या यो विभूत्यापि स तादृशः ।
गोमये श्रीनिवासोऽस्ति न तथापि मनोहरम् ॥ ८४ ॥
गुणानर्चन्ति जन्तूनां न जातिं केवलां क्वचित् ।
स्फाटिकं भजनं भग्नं काकिन्यापि न गृह्यते ॥ ८५ ॥
आगच्छन्नुत्सवो भाति यथैव न तथा गतः ।
हिमांशोरुदयः सायं चकास्ति न तथोषसि ॥ ८६ ॥
मनस्विनो न मन्यन्ते परतः प्राप्य जीवनम् ।
वलिभुग्भ्यो न काकेभ्यः स्पृहयन्ति हि कोकिलाः ॥ ८७ ॥

दुर्भग इति । यः प्रकृत्या स्वभावेन दुर्भगः अमनोहर इत्यर्थः स विभूत्यापि सम्पदापि तादृशः दुर्भग एवेत्यर्थः सम्पन्नोऽपि सुभगत्वेन नाद्रियते इति भावः । तथापि गोमये श्रिया लक्ष्म्या निवासो अस्ति भवति, तथापि मनोहरं न । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ८४ ॥

गुणानिति । जन्तूना गुणान् अर्चन्ति पूजयन्ति जना इति शेषः । गुणाः पूजास्थानमिति पूर्वसूक्तम् । केवलां जातिं सत्कुलजातत्वं क्वचिदपि न अर्चन्तीति शेषः । तथाहि भग्नं स्फाटिकं भाजनं स्फाटिकपात्रं काकिन्या विंशतिवराटिकयापि, वराटकानां दृषत्कल्पं यत् सा काकिनीति लीलावती । न गृह्यते न क्रीयते जनैरिति शेषः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ८५ ॥

आगच्छदिति । आगच्छन् उत्सवः यथैव भाति राजते, गतः अतीतः तथा न । तथाहि सायं हिमांशोश्चन्द्रस्य उदयः यथा चकास्ति शोभते, तथा उषसि प्रभाते न । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ८६ ॥

मनस्विन इति । मनस्विनः अभिमानिन इति यावत् परतः अन्यस्मात् जीवनं प्राप्य न मन्यन्ते न कृतघ्नतया तत् स्वीकुर्वन्तीत्यर्थः ।

सन्तोषक्षतये पुंसामाकस्मिकधनागमः ।
सरसां सेतुभेदाय वर्षौघः स च न स्थितः ॥ ८८ ॥
जीयते भूगतोऽप्यात्मा कालेनात्मापि खर्गतः ।
भवेत् श्मशानमुद्यानमुद्यानञ्च श्मशानभम् ॥ ८९ ॥
उच्चशेखरगं वस्तु शुभं स्यात्सुखकारणम् ।
उपशामयते बाधां यथैवासूतसंस्कृतम् ॥ ९० ॥

हि तथाहि कोकिलाः बलिभुग्भ्यः रटद्भेधिदत्तपूजाभोजिभ्यः काकेभ्यः खपोषकेभ्य इति भावः न रुचयन्ति न तान् पोषकान् मन्यन्ते इति भावः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ८७ ॥

सन्तोषेति । पुंसाम् आकस्मिकधनागमः सहसा धनलाभः सन्तोषस्य लालसाराहित्येन स्थितेरिति यावत् क्षतये नाशाय भवतीति शेषः उत्तरोत्तरं धनाशाया वर्द्धनादिति भावः । वर्षौघः वृष्टिजलप्रवाहः सरसां सरोवराणां सेतुभेदाय भवति, स च वर्षौघः न स्थितः न स्थायीत्यर्थः सेतुभेदेन तत्क्षणादेव निःसरतीति तादृशं धनञ्च न बहुकालं तिष्ठतीति भावः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ८८ ॥

जीयते इति । भूगतः पृथिवीस्थोऽपि आत्मा जीवते शत्रुभिः पराभूयते । कालेन स आत्मापि खर्गतः खर्गस्थः भवतीति शेषः । श्मशानम् उद्यानम् उपवनम्, उद्यानञ्च उपवनञ्च श्मशानभं श्मशानतुल्यं भवेत् कालेनेति शेषः । कदा कावस्था भवेदिति न केनापि ज्ञायते इति भावः ॥ ८९ ॥

उच्चेति । उच्चशेखरगम् उच्चतमशिरोभूषणस्थितम् उत्कृष्टमुकुटस्थमित्यर्थः वस्तु रत्नादिकमिति भावः सुखकारणं सुखहेतुः शोभावर्द्धनेन सन्तोषप्रदमिति भावः शुभं मङ्गलकरञ्च स्यात् । यथा

सन्तुष्यत्युत्तमः स्तुत्या धनेन महताधमः ।
प्रसीदन्ति जयैर्देवा बलिभिर्भूतविग्रहाः ॥ ९१ ॥
स्वजातीयविघाताय माहात्म्यं दृश्यते नृणाम् ।
श्येनो विहङ्गमानेव हिनस्ति न भुजङ्गमान् ॥ ९२ ॥
गुरुप्रयोजनोद्देशादर्चयन्ति न भक्तितः ।
दुग्धदात्रीति गौर्गेहे पोष्यते न तु धर्मतः ॥ ९३ ॥
महतां तादृशं तेजो यत्र गाम्यल्पनीजसः ।

तथाहीत्यर्थः अल्पतेन विभावक्या सल्पकं परिपक्वं वस्तु इति शेषः औषधमिति यावत् बाधां पीड़ाम् उपशामयते नाशयतीत्यर्थः ॥९०॥

सन्तुष्यतीति । उत्तमः साधुः स्तुत्या स्तुतिवचसा सन्तुष्यति, अधमः नीचः महता धनेन सन्तुष्यतीति शेषः । देवाः जयैः जयकीर्त्तनैः, जय देव जगन्नाथ इत्यादिभिरिति भावः प्रसीदन्ति प्रसन्ना भवन्ति । भूतविग्रहाः भूतानां वेतालादीनां विग्रहाः मूर्त्तयः बलिभिः मांसभक्षादिभिरिति भावः प्रसीदन्तीति शेषः ॥ ९१ ॥

स्वजातीयेति । नृणां प्राणिनामिति भावः स्वजातीयविघाताय स्वजातीयध्वंसाय माहात्म्यं प्राबल्यं सामर्थ्यमिति यावत् दृश्यते । तथाहि श्येनः पक्षिविशेषः विहङ्गमान् क्षुद्रपक्षिण एव हिनस्ति, न भुजङ्गमान् न सर्पान् । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ९२ ॥

गुरुरिति । गुरुणः महतः प्रयोजनस्य कार्य्यस्य उद्देशात् प्राप्त्यर्थमित्यर्थः अर्च्चयन्ति पूजयन्ति सेवन्ते इत्यर्थः जनानिति जना इति च शेषः, न भक्तितः अर्च्चयन्तीति शेषः । तथाहि गौः दुग्धदात्री इति हेतोः गेहे पोष्यते पाल्यते, धर्मतः गोसेवायां धर्मो भवेदिति बुद्ध्येत्यर्थः न पोष्यते इति शेषः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ९३ ॥

महतामिति । महतां जनानां तादृशं तेजः प्रताप इति

अस्तं यान्ति प्रकाशेन तारका हि विवस्वतः ॥ ९४ ॥

दाता दानस्यान्तरा स्यात् पृथिव्यां
गेहे गेहे याचकानां समूहः।
चिन्तारत्नस्यास्ति सत्त्वे विवादो
मार्गे मार्गे प्रार्थकाः सन्त्यसंख्याः ॥ ९५ ॥

चारुता अप्यपसदे पदार्थे धैर्येण तदनुवादिगुणत्वात्।
वेणुगो भवति मञ्जुरसो यन्त्रगो हि सुखदः कृतशब्दः ॥९६॥

नराः संस्कारार्हा जगति किल केचित् सुकृतिनः

यावत् अस्तीति शेषः, यत्र तेजसि सति अनौजसः निस्तेजसः जनाः शाम्यन्ति न विराजन्ते इति भावः। हि तथाहि तारकाः नक्षत्राणि विवस्वतः सूर्यस्य प्रकाशेन तेजसेत्यर्थः अस्तम् अदर्शनं यान्ति। विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ९४ ॥

दातेति। पृथिव्याम् अन्तरा मध्ये इत्यर्थः दानस्य देयवस्तुनः दाता स्यात् विरल इति शेषः। किन्तु गेहे गेहे प्रतिगृहं याचकानां भिक्षूणां समूहः आगच्छतीति भावः। हि यतः चिन्तारत्नस्य चिन्तामणेः सत्त्वे अस्तित्वे विवादः अस्ति कोऽपि वदति चिन्तामणिनामकमपि रत्नमस्ति, को तथा न स्वीकरोतीति भावः, किन्तु मार्गे मार्गे प्रतिपथम् असंख्याः अगण्याः प्रार्थकाः सन्ति। मालिनीवृत्तम् ॥९५॥

चारुतेति। अपसदे अधमे पदार्थे वस्तुनि अपि धैर्येण गाम्भीर्येण सहेति शेषः तदनुवादिगुणत्वात् गाम्भीर्यानुसारिगुणयोगात् चारुताः मनोहरत्वादयः गुणा इति शेषः सन्तीति शेषः। हि तथाहि यन्त्रगः वीणादियन्त्रगतः कृतशब्दः उच्चारितशब्दः वेणुगः अधमवंशगत इति यावत् मञ्जुरसः मनोहरास्वादः भवति वेणोर्गाम्भीर्यादिति भावः ॥ ९६ ॥

नरा इति। जगति केचित् सुकृतिनः पुण्यवन्तः परधियः उत्-

समानायां जात्यामपि वयसि सख्यां परधियः ।
अयं दृष्टान्तोऽत्र यत् स्फुटकरणतोऽभ्यसनतः
शुकः श्लोकान् वक्तुं प्रभवति न काकः क्वचिदपि ॥ ९७ ॥

धनमपि परदत्तं दुःखमौचित्यभाजां
भवति हृदि तदेवानन्दकारीतरेषाम् ।
मलयजरसदृच्चो वर्द्धते नो हि तोयैः
जगति च रसलाभादेवमन्यो यथा स्यात् ॥ ९८ ॥

कालक्रमेण परिणामवशाद्धि भव्या
भावा भवन्ति खलु पूर्वमतीवतुच्छाः ।

दृष्टमतयः नराः समानायां तुल्यायां जात्यामपि वयसि समानेऽपीति शेषः संस्कारार्हाः संस्कृतमतय इति यावत् विशुद्धचरिता इति भावः भवन्ति । अत्र अयं दृष्टान्तः निदर्शनं, यत् स्फुटकरणतः स्फुटेन्द्रियसङ्गावेऽपीत्यर्थः उभयोरिति भावः अभ्यसनतः अभ्यासबलात् शुकः श्लोकान् वक्तुम् उच्चारितुं प्रभवति शक्नोति क्वचिदपि काको न प्रभवतीति शेषः । तदशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः । शिखरिणीवृत्तम् । रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणीति तल्लक्षणात् ॥ ९७ ॥

धनमिति । परदत्तम् अन्येन अर्पितं धनम् औचित्यभाजां मानिनामिति यावत् दुःखं दुःखदमिति भावः परदत्तधनस्य भिक्षालब्धतया हेयत्वादिति भावः । तदेव परदत्तं धनम् इतरेषां नीचानां हृदि आनन्दकारि सन्तोषदं भवति । जगति पृथिव्यां मलयजरसदृच्चः चन्दनदृच्चः तोयैः नो हि वर्द्धते न वृद्धिं गच्छति यथा अन्यो वृक्ष इति शेषः रसलाभात् जलप्राप्त्या स्यात् वर्द्धते इति शेषः । मालिनीवृत्तम् । ननमयययुतेयं मालिनी भोगिलोकैरिति तल्लक्षणात् ॥ ९८ ॥

कालक्रमेणेति । पूर्वं प्राक् अतीवतुच्छाः भावाः पदार्थाः काल-

मुक्तामणिर्जलदतोयकणोऽप्यणीयान्
सम्पद्यते च चिरकीचकरन्ध्रमध्ये ॥ ९९ ॥
इयं कुसुमदेवेन कविनैकेन निर्मिता।
इष्टान्तकलिका नाम जृम्भतां कविमानसे ॥ १०० ॥
इति कुसुमदेवरचितं इष्टान्तशतकं सम्पूर्णम्।

नीतिशतकम्।

अल्पः सुखमाराध्यः सुखतरमाराध्यतेऽशेषज्ञः।
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति ॥ १ ॥

क्रमेण हि परिणामवशात् भव्याः सुन्दरा भवन्ति खलु भवन्त्येव। तथाहि अणीयान् अतिक्षुद्रः जलदस्य मेघस्य तोयकणः जलबिन्दुः चिरं कीचकरन्ध्रमध्ये वेणुविशेषशुषिरमध्ये स्थित इति शेषः। मुक्तामणिः मौक्तिकरत्नं सम्पद्यते जायते। विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः। वसन्ततिलकं वृत्तम्। ज्ञेयं वसन्ततिलकं तभजा जगौ ग इति तल्लक्षणात् ॥ ९९ ॥

इयमिति। एकेन केवलेन वा सुखेन कविना कुसुमदेवेन निर्मिता इयं इष्टान्तकलिका इष्टान्ताङ्कुरः इष्टान्तशतिकेति पाठान्तरं कवीनां मानसे जृम्भतां प्रकाशतां नाम सम्भावनायां कवय इमां मनसा धारयेयुरिति सम्भावयामीत्यर्थः ॥ १०० ॥

इति वि, ए उपाधिधारिणा श्रीजीवानन्दविद्यासागरभट्टाचार्येण विरचिता इष्टान्तशतकव्याख्या समाप्ता।

अल्प इति। अल्पः मूर्खः इत्यर्थः सुखं यथा तथा आराध्यः

लभेत सिकतासु तैलमपि यत्नतः पीड़यन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ।
कदाचिदपि पर्यटन् शशविषाणमासादयेत्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ २ ॥
प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्राङ्कुरात्
समुद्रमपि सन्तरेत् चपलमूर्मिमालाकुलम् ।
भुजङ्गमपि कोपितं शिरसि पुष्पवद्धारयेत्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ २ ॥

सेव्यः । अशेषज्ञः विज्ञ इत्यर्थः सुखतरम् अतिसुखेनेत्यर्थः आराध्यते सेव्यते । किन्तु ज्ञानलवेन यत्किञ्चिज्ज्ञानेन दुर्विदग्धं वितण्डा-चतुरमिति भावः नरं ब्रह्मापि चतुर्मुखोऽपि न रञ्जयति न तोषयति ॥ १ ॥

लभेतेति । यत्नतः यत्नेन पीड़यन् सिकतासु वालुकासु अपि मध्ये इति शेषः तैलं लभेत प्राप्नुयात् । पिपासार्दितः तृषार्त्तः मृगतृष्णिकासु मरीचिकासु अपि सलिलं पिबेच्च, तथा पर्यटन् परितो भ्रमन् कदाचिदपि शशविषाणं शशकस्मृगश्रृङ्गम् आसादयेत् लभेत, जन इति शेषः असम्भवमपि सम्भवेदिति भावः, तु किन्तु प्रतिनिविष्टस्य प्रतिवेशिनः मूर्खजनस्य दुर्जनस्येति भावः चित्तं न आराधयेत् न तोषयितुं शक्नुयादिति भावः । पृथ्वीवृत्तम् ॥ २ ॥

प्रसह्येति । प्रसह्य बलात् मकरस्य वक्त्रे वदने यः दंष्ट्राङ्कुरः दशनकलिका तस्मात् मणिं रत्नम् उद्धरेत् उत्पाटयेत्, ऊर्मि-मालाभिः तरङ्गनिचयैः व्याकुलं चपलं समुद्रमपि सन्तरेत्, कोपितं भुजङ्गमपि द्विजिह्वमपि शिरसि मस्तके पुष्पवत् पुष्पमालामिवेति भावः धारयेत्, तु किन्तु प्रतिनिविष्टेत्यादि । पृथ्वीवृत्तम् ॥ २ ॥

शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गनगतः खलो मनसि सप्त शल्यानि मे ॥ ४ ॥
मणिः शाणोल्लीढः समरविजयी हैतिनिहतो
मदक्षीणो नागः शरदि सरितः श्यामपुलिनाः ।
कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता
न निम्नाः शोभन्ते गलितविभवाश्चार्थिषु जनाः ॥ ५ ॥
परिक्षीणः कश्चित् स्पृहयति यवानां प्रसृतये
स पश्चात् सम्पूर्णो गणयति धरित्रीं तृणसमाम् ।

शशीति । शशी चन्द्रः दिवसे धूसरः मलिनः, कामिनी गलितयौवना भ्रष्टयौवना, सरः सरोवरं विगतवारिजं कमलशून्यं, स्वाकृतेः सुन्दराकारस्य पुरुषस्य मुखम् अनक्षरं वाक्शून्यं, प्रभुः स्वामी राजेत्यर्थः धनपरायणः अर्थलुब्धः, सज्जनः सततदुर्गतः सततदुःस्थः, खलः दुर्जनः नृपाङ्गनगतः राजस्त्रीस्थितः, एतानि सप्त मम मनसि शल्यानि । पृथ्वीवृत्तम् ॥ ४ ॥

मणिरिति । शाणेन शाणाख्ययन्त्रेण उल्लीढः घर्षितः मणिः, समरविजयी संग्रामजयी हैतिनिहतः अस्त्रनिहतः, नागः हस्ती मदेन मदजलस्रावेण क्षीणः क्षयः, शरदि शरत्काले श्यामपुलिनाः श्यामसैकताः सरितः नद्यः, कलाशेषः कलामात्रावशिष्टः चन्द्रः, सुरतेन मृदिता ग्लानिं नीता बालवनिता बाला स्त्री, अर्थिषु याचकेषु गलितविभवाः वितीर्णसम्पदः निम्नाः लघुतां प्राप्ताः जनाः न शोभन्ते । शिखरिणीवृत्तं, रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणीति तल्लक्षणात् ॥ ५ ॥

परिक्षीण इति । परिक्षीणः दरिद्रः कश्चित् जनः यवानां

अतश्चानेकान्ता गुरुलघुतयार्थेषु धनिनाम्
अवस्था वस्तूनि प्रथयति च सङ्कोचयति च ॥ ६ ॥
शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयागमा
विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः ।
तज्जाड्यं वसुधाधिपस्य सुधियो ह्यर्थं विनापीश्वराः
कुत्सा तद्धि परीक्षकस्य मणयो यद्यर्थतः पातिताः ॥ ७ ॥

प्रकृतये अर्द्धाङ्गिपरिमाणाय सृहयति आकाङ्क्षति । सः परिक्षीणः पश्चात् सम्पूर्णः धनसम्पदा युक्त इति यावत् धरित्रीं पृथिवीं तृणसमां तृणतुल्यां गणयति मन्यते । अतः अस्मात् कारणाच्च धनिनाम् अर्थेषु गुरुलघुतया गौरवलाघवयोगात् अनेकान्ता बहुविधा अवस्था वस्तूनि पदार्थान् प्रथयति च सङ्कोचयति च । कारणेन कार्य्यसमर्थनरूपोऽर्थान्तरन्यासः । तदुक्तं दर्पणे, सामान्यं वा विशेषेण विशेषस्तेन वा यदि । कार्य्यञ्च कारणेनेदं कार्य्येण च समर्थ्यते । साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा तत इति । शिखरिणीवृत्तम् ॥ ६ ॥

शास्त्रेति । शास्त्रेण व्याकरणादिना उपस्कृतः व्युत्पन्नः शब्दः यासु तथाविधाः सुन्दर्यः मनोहारिण्यः गिरः वाचः येषां तथोक्ताः तथा शिष्येभ्यः प्रदेयः आगमः शास्त्रं यैः तथाविधाः, विशेषणद्वयेनाध्ययनाध्यापने सूचिते । किन्तु निर्धनाः दरिद्राः विख्याताः कवयः यस्य प्रभोः राज्ञः विषये जनपदे वसन्ति, तत् तादृशकवेर्विषयेषु वासकरणमित्यर्थः वसुधाधिपस्य तस्येति शेषः जाड्यं मूर्खत्वम् । हि यतः सुधियः कवयः अर्थं विनापि धनाभावेऽपीत्यर्थः ईश्वराः प्रभवः संसारनिर्वहणसमर्था इत्यर्थः । तत् परीक्षकस्य कुत्सा नाम यदि हि बहुमूल्या मणयः रत्नानि अर्थतः यथार्थमूल्यात् पातिता जघन्यता भवन्ति इति शेषः । शार्दूलविक्रीडितं वृत्तं, सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितमिति तल्लक्षणात् ॥ ७ ॥

विपदि धैर्य्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥ ८ ॥
निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥ ९ ॥
हर्तुर्याति न गोचरं किमपि सम्पूर्णाति यत्सर्वदा-
प्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम् ।

विपदीति । विपदि विपत्काले धैर्य्यम्, अथ विपदनन्तरम् अभ्युदये सम्पदि क्षमा जनापराधसहनं, सदसि सभायां वाक्पटुता वाग्मिता, युधि युद्धे विक्रमः पराक्रमः, यशसि यशःसाधने कर्मणीत्यर्थः अभिरुचिः अभिनिवेशः, तथा श्रुतौ वेदार्थज्ञाने व्यसनम् आसक्तिः, इदं सर्वं महात्मना महापुरुषाणां प्रकृतिसिद्धं नैसर्गिकम् ॥ ८ ॥

निन्दन्त्विति । नीतिनिपुणाः नयकुशलाः निन्दन्तु निन्दां कुर्वन्तु, यदि वा किंवा स्तुवन्तु प्रशंसन्तु, लक्ष्मीः समाविशतु प्रविशतु गच्छतीति शेषः, वा यथेष्टं यथाकामं गच्छतु । अद्यैव मरणम् अस्तु भवतु युगान्तरे वा मरणमस्त्विति शेषः, किन्तु धीराः महान्तः न्याय्यात् पथः युक्तिमार्गादित्यर्थः पदम् एकमपीति शेषः न प्रविचलन्ति न प्रभ्रश्यन्ति । वसन्ततिलकं वृत्तं, तच्च वसन्ततिलकं तभजा जगौ ग इति तल्लक्षणात् ॥ ९ ॥

हर्तुर्याति इति । येषां विदुषामिदमर्थः यत् किमपि अनिर्वचनीयम्

कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं
येषां तान् प्रति मानमुज्झति नृपः कस्तेन संसर्धते ॥१०॥
अधिगतपरमार्थान् पण्डितान्मावमंस्था-
स्तृणमिव लघुलक्ष्मीर्नैव तान् संरुणद्धि ।
अभिनवमदलेखाश्यामगण्डस्थलानां
न भवति विसतन्तुर्वारणं वारणानाम् ॥ ११ ॥

अन्तर्धनम् अन्तःसारमिति यावत् विद्याख्यं विद्याख्यं धनं चौर्यः तस्करस्य गोचरं न याति तस्करेण चौर्यं न शक्यते इत्यर्थः, सर्वदा सर्वस्मिन् समये संपुष्णाति सम्यक् पुष्टिं गच्छति अनुशीलनेनेति भावः, अनिशं सततम् अर्थिभ्यः याचकेभ्यः शिष्येभ्य इति यावत् प्रतिपाद्यमानमपि दीयमानमपि परां महतीं वृद्धिं प्राप्नोति, तथा कल्पान्तेषु प्रलयेष्वपि निधनं नाशं न प्रयाति नापगच्छतीत्यर्थः, तान् सुधियः प्रति यः नृपः मानम् महत्त्वं दत्ते तेन नृपेण सहेत्यर्थः कः संसर्द्धते सम्यक् स्पर्द्धां करोति न कोऽपीत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ १० ॥

अधिगतेति । अधिगतः विदितः परमार्थः परमं तत्त्वं यैः तान् पण्डितान् विदुषः मा अवसंस्थाः न अवजानीहि, तृणमिव लघुलक्ष्मीः क्षुद्रा सम्पद् तान् विदुषः नैव संरुणद्धि न हि आवृणोति सामान्यधनलोभेन ते तव वशवर्त्तिनो न भविष्यन्तीति भावः । अभिनवया मदलेखया मदजलरेखया श्यामं मलिनं गण्डस्थलं येषां तथाभूतानां वारणानां हस्तिनां वारणं बन्धनकारणं विसतन्तुः मृणालसूत्रं न भवति । मृणालसूत्रेण हस्तिनो न बध्यन्ते इत्यर्थः । मालिनीवृत्तम् । ननमयययुतेयं मालिनी भोगिलोकैरिति तल्लक्षणात् । दृष्टान्तालङ्कारः । तदुक्तं दर्पणे । दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनमिति ॥ ११ ॥

क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्राणोऽपि कष्टां दशा-
मापन्नोऽपि विपन्नदीधितिरपि प्राणेषु नश्यत्स्वपि ।
उन्मत्तेभविभिन्नकुम्भकवलग्रासैकबद्धस्पृहः
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केशरी ॥ १२ ॥

असन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः क्षयधनः
प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम् ।
विपद्युच्चैः स्थेयं पदमनुविधेयञ्च महतां
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ १३ ॥

क्षुत्क्षाम इति । क्षुधा क्षामोऽपि क्षीणोऽपि जरया वार्द्धक्येन कृशोऽपि दुर्बलोऽपि शिथिलप्राणोऽपि लघुबलोऽपि कष्टां दशाम् अवस्थाम् आपन्नोऽपि प्राप्तोऽपि विपन्नदीधितिरपि निस्तेजा अपि उन्मत्तानां मदोद्धतानाम् इभानां हस्तिनां विभिन्नाः विदारिताः कुम्भा एव कवलाः ग्रासनादवस्तूनि तेषां यासे बद्धा स्थिता सृष्टा आकाङ्क्षा यस्य तथाविधः मानमहतां मानोन्नतानाम् अग्रेसरः अग्रणीः केशरी सिंहः प्राणेषु नश्यत्सु नाशं गच्छत्सु अपि आहाराभावादिति भावः जीर्णं तृणं किम् अत्ति किं खादति ? नैवेत्यर्थः । शार्दूलविक्रीडितं वृत्तम् । अत्राप्रस्तुतेन सिंहेन कस्यचित् प्रस्तुतस्य महतः प्रतीतेरप्रस्तुतप्रशंसालङ्कारः । तदुक्तं दर्पणे । क्वचिद् विशेषः सामान्यात्सामान्यं वा विशेषतः । कार्यात्किमित्तं कार्यञ्च हेतोरथ समात् समम् । अप्रस्तुतात् प्रस्तुतञ्चेद् गम्यते पञ्चधा ततः । अप्रस्तुतप्रशंसा स्यादिति ॥ १२ ॥

असन्त इति । असन्तः असाधवः न अभ्यर्थ्याः न प्रार्थनीयाः, क्षयधनः खलधनः सुहृदपि बन्धुरपि न याच्यः न अभ्यर्थनीयः । प्रिया प्रीतिकरी न्याय्या न्यायादनपेता वृत्तिः जीवनोपायः असुभङ्गेऽपि प्राणान्तेऽपि मलिनं पापम् असुकरं नैव कार्यमित्यर्थः ।

मनसि वचसि काये पुण्यपीयूषपूर्णा-
स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।
परगुणपरमाणुं पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥ १४ ॥
इतः स्वपिति केशवः कुलमितस्तदीयद्विषाम्
इतश्च शरणार्थिनः शिखरिपक्षिणः शेरते ।
इतश्च वडवानलः सह समस्तसंवर्तकैः
अहो ! विततमूर्जितभ्भरसहञ्च सिन्धोर्वपुः ॥ १५ ॥

विपदि उच्चैः उच्चततयेत्यर्थः स्थेयं धैर्यादच्यवनमित्यर्थः महतां पदम् अनुविधेयम् अनुसरणीयं, सतां साधूनाम् इदं विषमं दुर्वहमित्यर्थः असिधाराव्रतम् असिधारोपरिस्थितावपि तत्र पदास्खलनरूपमिति भावः केन उद्दिष्टम् उपदिष्टम् ? शिखरिणीवृत्तम् ॥ १३ ॥

मनसीति । मनसि वचसि काये पुण्यपीयूषेण सुकृतामृतेन पूर्णाः उपकारश्रेणिभिः उपकारपरम्पराभिः त्रिभुवनं प्रीणयन्तः नित्यं सततं परेषां गुणपरमाणुं गुणलेशमिति भावः पर्वतीकृत्य राशीकृत्य निजहृदि विकसन्तः उल्लसन्तः कियन्तः अल्पा इत्यर्थः सन्तः साधवः सन्ति विद्यन्ते । मालिनीवृत्तम् ॥ १४ ॥

इत इति । केशवः नारायणः इतः अस्मिन् स्थाने स्वपिति निद्राति, इतः अस्मिन् प्रदेशे तदीयद्विषाम् असुराणामित्यर्थः कुलं समूहः निवसतीति शेषः । इतश्च अस्मिंश्च स्थाने शरणार्थिनः त्राणार्थिनः इन्द्रकर्तृकपक्षच्छेदनादिति भावः शिखरिपक्षिणः पक्षयुक्ताः पर्वता इत्यर्थः मैनाकादय इति शेषः शेरते तिष्ठन्तीत्यर्थः । इतश्च अस्मिन् देशे च समस्तैः संवर्तकैः तदाख्यैर्मेघैः सह वडवानलः अस्तीति शेषः । अहो आश्चर्यं सिन्धोः समुद्रस्य वपुः शरीरं विततं विस्तृतम् अजितं महाबलं भरसहञ्च भारसहनक्षमञ्च ।

उद्वच्छिन्ना भूः स च निधिरपां योजनशतं
सदा पान्थः पूषा गगनपरिमाणं कलयति ।
इति प्रायो भावाः स्फुरदवधिमुद्रामुकुलिताः
सतां प्रज्ञोन्मेषः पुनरयमसीमो विजयताम् ॥ १६ ॥
क्वचिद् भूमौ शय्या क्वचिदपि च पर्यङ्कशयनः
क्वचिच्छाकाहारः क्वचिदपि च शाल्योदनरुचिः ।
क्वचित् कन्थाधारी क्वचिदपि च दिव्याम्बरधरो
मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम् ॥१७॥

वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः । तदुक्तं दर्पणे । हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते इति । पृथ्वीवृत्तम् ॥ १५ ॥

उदन्वदिति । भूः पृथिवी उदन्वता समुद्रेण क्षिप्ता परिच्छेदं नीता वेष्टितेत्यर्थः । स च अपां निधिः समुद्रः योजनशतं व्याप्य तिष्ठतीति शेषः । पान्थः पथिकः पूषा सूर्यः सदा गगनस्य आकाशस्य परिमाणं परिच्छेदं कलयति प्रदक्षिणीकरोतीति भावः । इत्येवं भावाः पदार्थाः प्रायः बाहुल्येन स्फुरन्त्या प्रसरन्त्या अवधिमुद्रया सीमावेष्टनेन मुकुलिताः परिच्छिन्नाः । पुनः किन्तु सतां साधूनाम् अयं प्रज्ञोन्मेषः बुद्धिविकासः असीमः अपरिमितः अतएव विजयतां सर्वोत्कर्षेण वर्त्तताम् । शिखरिणीवृत्तम् । अत्र व्यतिरेकालङ्कारो व्यङ्ग्यः ॥ १६ ॥

क्वचिदिति । क्वचित् कुत्रचित् प्रदेशे भूमौ भूतलं शय्या यस्य तथोक्तः क्वचिदपि पर्यङ्कः खट्वा शयनं शय्या यस्य तादृशः क्वचित् शाकाहारः शाकमात्रभोजी, क्वचिदपि शाल्योदने शालिधान्यसम्भवे अन्ने रुचिरभिलाषो यस्य तथाविधः क्वचित् कन्थाधारी स्वकन्थनिश्चितकन्थः क्वचिदपि दिव्याम्बरधरः उत्कृष्टवसनपरिधारी कार्यार्थी कार्यसाधनपरः मनस्वी धीरः दुःखं न सुखञ्च गणयति नैव विचार-

ये सन्तोषसुखप्रमोदमुदितास्तेषां न भिन्ना मुदो
ये त्वन्ये धनलोभसंकुलधियस्तेषां न तृष्णा हता ।
इत्थं कस्य कृते कृतः स विधिना तादृक् पदं सम्पदां
स्वात्मन्येव समाप्तहेममहिमा मेरुर्न मे रोचते ॥१८॥
नमस्यामो देवान्ननु हतविधेस्तेऽपि वशगा
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः ।
फलं कर्मायत्तं यदि किममरैः किञ्च विधिना
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति ॥ १९ ॥

यदि । कार्यं वा साधयितव्यं शरीरं वा पातयितव्यमिति भावः । शिखरिणीवृत्तम् ॥ १७ ॥

ये इति । ये जनाः सन्तोषेण यः सुखस्य प्रमोदः विकासः तेन मुदिताः हृष्टाः तेषां मुदः आनन्दाः न भिन्नाः न विच्छिन्नाः ते सततानन्दमग्ना इति भावः । ये तु अन्ये अपरे धनलोभेन सङ्कुलधियः समाच्छन्नमतयः, तेषां तृष्णा न हता नापगतेत्यर्थः । इत्थं सन्तोषेण सुखम् असन्तोषेण दुःखमेव स्थितौ इति भावः कस्य कृते किंनिमित्तमित्यर्थः विधिना विधात्रा तादृक् सम्पदां पदं स्थानं मेरुः सुमेरुगिरिः कृतः सृष्टः ? यः स्वात्मन्येव निजस्वरूपे एव न तु अन्यप्रयोजनार्थमिति भावः समाप्तः अवसितः हेम्नां काञ्चनानां महिमा गौरवं यस्य तथाभूतः स्वसौन्दर्यमात्रफल इति यावत् मे मह्यं न रोचते न प्रीतिं जनयतीत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ १८ ॥

नमस्याम इति । देवान् नमस्यामः नमस्कुर्मः, किन्तु तेऽपि देवाः हतविधेः दुर्दैवस्य वशगाः ननु वशवर्त्तिन एव, अतस्तेषां नमस्कारः निरर्थकमिति भावः । विधिः दैवं वन्द्यः नमस्कार्यः किन्तु सोऽपि विधिरपि प्रतिनियतं प्रत्यवधारितं यत् कर्म सुकृतं

दौर्मन्त्याद्भूपतिर्विनश्यति यतिः सङ्गात् सुतो लालनात्
विप्रोऽनध्ययनात् कुलं कुतनयाच्छीलं खलोपासनात् ।
ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रयात्
मैत्री चाप्रणयात्समृद्धिरनयात् त्यागात् प्रमादाद्धनम् ॥२०

रक्तत्वं कमलानां सुपुरुषाणां परोपकारित्वम् ।
अस्तत्वाच्च निसर्गसिद्धं त्रिषु त्रितयम् ॥२१॥

जाड्यं ह्रीमति गण्यते व्रतरुचौ दम्भः शुचौ कैतवं
शूरे निर्घृणता ऋजौ विमतिता दैन्यं प्रियालापिनि ।

दुष्कृतं वा तस्य एकं केवलं फलं ददातीति तथोक्तः अतस्तद्वन्दनं निरर्थकमिति भावः । यदि फलं कर्मायत्तं कर्माधीनं ततः अमरगणैः देवगणैः नमस्कृतैरिति भावः किम् ? विधिना वन्दितेन किम् ? न किमपि प्रयोजनमित्यर्थः । तत् तस्मात् कर्मभ्यः नमः, येभ्यः कर्मभ्यः विधिरपि दैवमपि न प्रभवति । कर्मापेक्षया विधेर्न प्राबल्यमिति कर्मैव शुभाशुभसाधने समर्थतया कर्त्तव्यमिति भावः । शिखरिणीवृत्तम् ॥ १९ ॥

दौर्मन्त्यादिति । नृपतिः राजा दौर्मन्त्यात् दुष्टमन्त्रणात्, यतिः सन्न्यासी सङ्गात् पुत्रकलत्रादीनामिति भावः, सुतः पुत्रः लालनात् आदरात्, विप्रः ब्राह्मणः अनध्ययनात् पठनाभावात्, कुलं वंशः कुतनयात् कुपुत्रात्, शीलं चरितं खलस्य दुर्जनस्य उपासनात् सेवनात् संसर्गादिति यावत्, ह्रीर्लज्जा मद्यात् सुरापानात्, कृषिः क्षेत्रकर्म अनवेक्षणात् अदर्शनात्, स्नेहः वात्सल्यं प्रवासाश्रयात् भिन्नदेशावस्थानात्, मैत्री बन्धुता अप्रणयात् अमदुभावात्, समृद्धिः सम्पद् अनयात् दुर्नयात् दुश्चेष्टितादिति यावत्, धनं त्यागात् अपरिमितव्ययात् प्रमादात् अनवधानाच्च विनश्यति नाशं गच्छति । शार्दूलविक्रीडितं वृत्तम् ॥ २० ॥

रक्तत्वमिति । कमलानां पङ्कजानां रक्तत्वं लोकरञ्जनत्वं

तेजस्विन्यवलिप्तता मुखरता वक्तर्यशक्तिः स्थिरे
तत् को नाम गुणो भवेत् सुगुणिनां यो दुर्जनैर्नाङ्कितः॥२२
जातिर्यातु रसातलं गुणगणस्तस्याप्यधो गच्छतु
शीलं शैलतटात्पतत्वभिजनः सन्दह्यतां वह्निना ।
शौर्यं वैरिणि वज्रनिरस्तमस्तु च तथाप्यर्थस्तु नः केवलं
येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे ॥२३॥

सुपुरुषाणां साधूनां परोपकारित्वम् असतां दुर्जनानां निर्दयत्वञ्च एतत् त्रिषु एतेष्विति शेषः स्वभावसिद्धं स्वाभाविकम् ॥ २१ ॥

जाड्यमिति । ह्रीमति लज्जाशीले जाड्यम् अस्य स्वभावो जड़ इति, व्रतरुचौ चान्द्रायणादिव्रताभिलाषिणि दम्भः प्रतारणपरत्वं, शुचौ पूततयावस्थायिनीति यावत् कैतवं कपटं, शूरे वीरे निर्दयता निर्दयता, ऋजौ सरले विमतिता बुद्धिहीनता, प्रियालापिनि प्रियभाषिणि दैन्यं कातरता, तेजस्विनि तेजःप्रकाशिनि अवलिप्तता गर्विता, वक्तरि वावदूके मुखरता वाचालता, स्थिरे तूष्णीं स्थिते अशक्तिः असामर्थ्यं गण्यते लोकैरिति शेषः, तत् तस्मात् सुगुणिनां शोभनगुणवतां को नाम गुणः भवेत् अस्तीत्यर्थः यः गुणः दुर्जनैः न अङ्कितः न कलङ्कितः न दूषित इत्यर्थः गुणवतां सर्व एव गुणा दुर्जनैर्दूष्यन्ते इति निष्कर्षः । शार्दूलविक्रीड़ितं वृत्तम् ॥ २२ ॥

जातिरिति । जातिः सत्कुले प्रसूतिरित्यर्थः रसातलं पातालं यातु गच्छतु, गुणगणः दयादाक्षिण्यादिः तस्यापि रसातलस्यापि अधः गच्छतु, शीलं सुचरितं शैलतटात् पतत् चूर्णीभवत्वित्यर्थः, अभिजनः वंशः वह्निना सन्दह्यतां सम्यक् भस्मीक्रियतां, शौर्यं बलं वज्रेण कुलिशेन निरस्तं हतम् अस्तु च तथापि नः अस्माकम् अर्थस्तु केवलम् अस्त्विति शेषः येन एकेन केवलेन अर्थेन विना समस्ता इमे गुणाः जात्यादयः तृणलवप्रायाः तृणबिन्दुतुल्याः भवन्तीति शेषः न गण्यन्ते इति भावः । शार्दूलविक्रीड़ितं वृत्तम् ॥ २३ ॥

भग्नाशस्य करण्डपीडिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः।
प्राप्तस्तत्क्षणचर्वितेन सत्वरमसौ तेनैव यातः पथा
स्वस्थास्तिष्ठत दैवमेव हि नृणां वृद्धौ क्षये कारणम्॥२४
पतितोऽपि कराघातैरुत्पतत्येव कन्दुकः।
प्रायेण साधुवृत्तीनामस्थायिन्यो विपत्तयः॥ २५॥
प्रायः कन्दुकपातेन पतत्यार्यः पतन्नपि।

भग्नाशस्येति। आखुर्मूषिकः स्वयं विवरं गर्त्तं कृत्वा भग्ना आशा जीवनस्येति भावः यस्य तादृशस्य करण्डेन बंशपात्रेण पीडिता क्लिष्टा तनुः शरीरं यस्य तथाभूतस्य क्षुधा म्लानेन्द्रियस्य असमर्थाङ्गस्येत्यर्थः भोगिनः भुजङ्गस्य मुखे नक्तं रात्रौ निपतितः। असौ भोगी सत्वरं शीघ्रं तस्य आखोः मूषिकस्य क्षणचर्वितेन क्षणेन दष्टः परिदष्टं गतः सन् तेनैव पथा आखुर्बिलेनेति भावः यातः गतः। अतः स्वस्थाः निश्चिन्ताः तिष्ठत यूयमिति शेषः दैवमेव नृणां प्राक्तनं दृष्टौ अभ्युदये क्षये च कारणं हेतुः। शार्दूलविक्रीडितं वृत्तम्॥ २४॥

पतितमिति। पतितोऽपि कन्दुकः गेन्दुकः कराघातैः हस्तप्रहारैः उत्पतत्येव। अतः साधुवृत्तानां सच्चरितानां सुहृद्गोष्ठीकृतीनाञ्चेति ध्वनिः कन्दुकस्य गोष्ठीकृतित्वादिति भावः। विपत्तयः आपदः अस्थायिन्यः न चिरं तिष्ठन्तीति यावत्। अनुष्टुप्वृत्तम्। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः। तदुक्तं दर्पणे। सामान्यं वा विशेषेण विशेषस्तेन वा यदि। कार्यञ्च कारणेनेदं कार्येण च समर्थ्यते। साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा तत इति॥ २५॥

प्राय इति। आर्यः साधुः पतन्नपि अधो गच्छन्नपि प्रायः

तथा त्वनार्यः पतति मृत्पिण्डपतनं यथा ॥ २६ ॥
प्रीणाति यः सुचरितैः पितरं स पुत्रो
यद्भर्तुरेव हितमिच्छति तत् कलत्रम् ।
तन्मित्रमापदि सुखे च समं प्रयाति
एतत्त्रयं जगति पुण्यकृतो लभन्ते ॥ २७ ॥
सम्पत्सु महतां चित्तम्भवेदुत्पलकोमलम् ।
आपत्सु च महाशैलशिलासंघातकर्कशम् ॥ २८ ॥
दुर्जनः परिहर्तव्यो विद्ययापि समन्वितः ।
मणिनालङ्कृतः सर्पः किमसौ न भयङ्करः ॥ २९ ॥

बाहुल्येन कन्दुकपातेन कन्दुकपतनन्यायेन उत्पतति ऊर्ध्वं गच्छतीत्यर्थः । तु किन्तु अनार्यः दुर्जनः मृत्पिण्डपतनं यथा मृत्पिण्डः यथा पतति न पुनरूर्ध्वं लभते इत्यर्थः तथा पतति न पुनरूर्ध्वं प्राप्नोतीत्यर्थः । उपमालङ्कारः । अनुष्टुब्वृत्तम् ॥ २६ ॥

प्रीणातीति । यः सुचरितैः पितरं प्रीणाति आनन्दयति, स पुत्रः, यत् भर्तुरेव स्वामिन एव नत्वपरपुरुषस्येति भावः हितं सेवामित्यर्थः इच्छति तत् कलत्रं पत्नी, यत् आपदि दुःखे सुखे च समं प्रयाति गच्छति समभावेन तिष्ठतीति भावः तत् मित्रम् । जगति पुण्यकृतः पुण्यवन्तः एतत्त्रयं पुत्रादित्रयं लभन्ते प्राप्नुवन्ति । वसन्ततिलकं वृत्तम् ॥ २७ ॥

सम्पत्स्विति । सम्पत्सु महतां चित्तम् उत्पलवत् कुमुदमिव कोमलं मृदुकं भवेत् परोपकारकत्वादिति भावः । आपत्सु च महाशैलस्य शिलासङ्घातवत् प्रस्तरनिचय इव कर्कशं कठिनम् अचलमिति यावत् । आपन्निवारणार्थं धैर्यस्यावश्यकत्वादिति भावः । अनुष्टुब्वृत्तम् ॥ २८ ॥

दुर्जन इति । विद्ययापि समन्वितः युक्तः विद्यायालङ्कृतोऽपि

क्षीरेणात्मगतोदकाय हि गुणा दत्ता पुरा तेऽखिलाः
क्षीरे तापमवेक्ष्य तेन पयसा ह्यात्मा कृशानौ हुतः ।
गन्तुं पावकमुन्मनो यदभवद् दृष्ट्वा तु मित्रापदं
युक्तं तत्तु तदेव सम्प्रति सतां मैत्री पुनस्त्वादृशी ॥२०॥

या साधून् हि खलान् करोति विदुषो मूर्खान् हितान् द्वेषिणः
प्रत्यक्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात् ।
तामाराधय भक्तिरीश्वरवतीन्द्राक्षीं फलं वाञ्छितं
हे साधो ! त्वमतो गुणेषु विफलेष्वास्थां वृथा मा कृथाः ॥२१

सन्निति पाठान्तरम् । दुर्जनः परिहर्तव्यः विद्ययाऽलङ्कृतः भूषित इति पाठान्तरम् । मणिना रत्नेन भूषितः किं भयङ्करो न ? अपि तु भयङ्कर एवेत्यर्थः । दृष्टान्तालङ्कारः । अनुष्टुब्वृत्तम् ॥ २९ ॥

क्षीरेणेति । क्षीरेण दुग्धेन आत्मनतोदकाय आत्मनिष्ठसलिलाय पुरा ते अखिलाः गुणाः समभाः शैत्यादयः दत्ता हि दत्ता एव । ते इत्यत्र स्वे इति पाठो युक्तः । तेन पयसा जलेन क्षीरे तापं अवेक्ष्य दृष्ट्वा कृशानौ अग्नौ आत्मा हुतः हि हुत एव । तत् क्षीरं मित्रस्य सुहृदः जलस्य आपदं दृष्ट्वा सह्यति पावकं गन्तुम् उन्मनः उत्सुकं यत् तु अभवत् तत् तु युक्तम् एव उचितमेव, सतां साधूनां पुनः मैत्री तादृशी भवतीत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ २० ॥

यैरि । हे साधो ! त्वं या साधून् खलान् वा खलान् साधून् विदुषः पण्डितान् मूर्खान् वा मूर्खान् विदुषः, हितान् बन्धून् द्वेषिणः वा द्वेषिणः शत्रून् हितान्, प्रत्यक्षं चक्षुर्गोचरं परोक्षं दृष्टिपथातीतं वा परोक्षं प्रत्यक्षम् अमृतं हालाहलं विषं वा हालाहलम् अमृतं तत्क्षणात् क्षणमात्रेण करोति हि करोत्येव, तां वाञ्छितं फलं दात्रीं दानशीलां भगवतीं भक्तिरीम् आराधय, अतः अस्मात् भक्त्या आराधनात् अन्येष्वपि शेषः विफलेषु निरर्थकेषु गुणेषु सत्-

कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितं
निरुपमरसप्रीत्या खादन् नरास्थि निरामिषम् ।
सुरपतिमपि श्वा पार्श्वस्थं विलोक्य विशङ्कते
न हि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम् ॥२२॥
खल्वं स्नायुवशावशेषमलिनं निर्मांसमप्यस्थिकं
श्वा लब्ध्वा परितोषमेति न च तत्तस्य क्षुधाशान्तये ।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलम् २३

क्रियासु आस्थां यत्नं दृष्ट्वा मा क्वयाः न कुरु । शार्दूलविक्रीडितं वृत्तम् ॥ २१ ॥

कृमीति । श्वा कुक्कुरः कृमिकुलैः चितं व्याप्तं लालाक्लिन्नं विगन्धि दुर्गन्धं जुगुप्सितं दूषितं निरामिषं निर्मांसं नरास्थि नरकङ्कालं निरुपमप्रीत्या परमोपादेयत्वज्ञानेनेति भावः खादन् भक्षयन् पार्श्वस्थं सुरपतिमिन्द्रमपि विलोक्य विशङ्कते मदीयमेतदपहरतीति धियेति भावः । हि यतोहि क्षुद्रो जन्तुः परिग्रहस्य परधनग्रहणस्य फल्गुतां असारत्वं हेयत्वमिति भावः न गणयति न विचारयति । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः । हरिणीवृत्तम् । नसमरसला षड् वेदैर्हयैर्हरिणी मतेति तल्लक्षणात् ॥ २२ ॥

खल्वमिति । श्वा कुक्कुरः खल्वं यत्किञ्चिदित्यर्थः स्नायवः शिराः वसा मेदांसि अवशेषो यस्य तथोक्तञ्च तत् मलिनं मलपूर्णञ्चेति तथोक्तं निर्मांसं मांसशून्यम् अपि अस्थिकं कङ्कालखण्डं लब्ध्वा प्राप्य परितोषम् एति प्राप्नोति, किन्तु तत् तस्य क्षुधाशान्तये क्षुन्निवृत्तये न च नैव भवतीत्यर्थः । सिंहः अङ्कं क्रोडम् आगतमपि जम्बुकं शृगालं त्यक्त्वा द्विपं हस्तिनं निहन्ति नाशयति । तथाहि सर्वो जनः कृच्छ्रगतोऽपि कष्टावस्थां प्राप्तोऽपि सत्त्वानुरूपं स्ववलानु-

पापान्निवारयति योजयते हिताय
गुह्यानि गूहति गुणान् प्रकटीकरोति ।
आपद्गतञ्च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥ २४ ॥

मृगमीनसज्जनानां तृणजलसन्तोषविहितवृत्तीनाम् ।
लुब्धकधीवरपिशुना निष्कारणवैरिणो जगति ॥ २५ ॥

सन्तप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्रे स्थितं राजते ।

रूपं रक्षति वाञ्छति अभिरक्षति । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः । शार्दूलविक्रीडितं वृत्तम् ॥ २३ ॥

पापादिति । यत् पापात् निवारयति, हिताय योजयते घटयति, गूह्यानि रहस्यानि गूहति गोपायति, गुणान् प्रकटीकरोति प्रकाशयति, आपद्गतं विपन्नं न जहाति न त्यजति, काले दुःसमये ददाति अर्थेन उपकरोतीत्यर्थः, सन्तः साधवः इदं सन्मित्रस्य लक्षणं चिह्नं प्रवदन्ति । वसन्ततिलकं वृत्तम् ॥ २४ ॥

मृगेति । लुब्धकाः व्याधाः धीवराः मत्स्यजीविनः पिशुनाः खलाः जगति संसारे तृणजलसन्तोषविहितवृत्तीनां तृणजीविनां जलजीविनां सन्तोषवृत्तीनां यथाक्रमं मृगाणां मीनानां मत्स्यानां सज्जनानाञ्च निष्कारणवैरिणः अकारणशत्रवः भवन्तीति शेषः । यथासङ्ख्यमलङ्कारः । तदुक्तं दर्पणे । यथासंख्यमनूद्देश उद्दिष्टानां क्रमेण यदिति । आर्य्यावृत्तम् । यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि अष्टादश द्वितीये पञ्चदश चतुर्थके आर्य्येति तल्लक्षात् । २५ ॥

सन्तप्तेति । सन्तप्तम् अयः लौहः तस्मिन् संस्थितस्य पयसः जलस्य नामापि न ज्ञायते पतनमात्र एव शुष्कत्वादिति भावः तदेव

स्वात्यां सागरशुक्तिमध्यपतितं मुक्ताफलं जायते
प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते । ३६ ॥
ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे
विष्णुर्येन दशावतारगहने क्षिप्तो महासङ्कटे ।
रुद्रो येन कपालपाणिपुटके भिक्षाटनङ्कारितः
सूर्य्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे ॥३७॥
कुसुमस्तवकस्येव द्वे वृत्ती तु मनस्विनः ।
सर्वलोकस्य वा मूर्द्ध्नि विशीर्य्येत वनेऽथवा ॥ ३८ ॥

पदः नलिनीपत्रे स्थितं मुक्ताकारतया राजते शोभते । स्वात्यां स्वातिनक्षत्रे सागरस्य शुक्तिमध्ये पतितं सत् मुक्ताफलं जायते । अतः संसर्गतः प्रायेण अधममध्यमोत्तमगुणः अधमसङ्गात् अधमगुणः, मध्यमसङ्गात् मध्यमगुणः उत्तमसङ्गात् उत्तमगुण इत्यर्थः जायते । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः । शार्दूलविक्रीडितं वृत्तम् ॥ ३६ ॥

ब्रह्मेति । येन ब्रह्मा कुलालवत् कुम्भकार इव ब्रह्माण्डभाण्डोदरे ब्रह्माण्डरूपभाजनाभ्यन्तरे नियमितः नियोजितः । येन विष्णुः महासङ्कटे अतिक्लेशकरे इत्यर्थः दशावतारगहने मीनादिदशावतारकानने क्षिप्तः व्यापारितः । येन रुद्रः हरः कपालं नरशिरः पाणिपुटके अञ्जलौ यस्य तथाभूतः भिक्षाटनं भिक्षार्थं भ्रमणं कारितः । येन च व्यापारित इति शेषः सूर्य्यः नित्यमेव गगने भ्राम्यति । तस्मै कर्मणे सुकृतदुष्कृतरूपाय नमः । शार्दूलविक्रीडितं वृत्तम् ॥ ३७ ॥

कुसुमेति । मनस्विनः मानिनः कुसुमस्तवकस्येव पुष्पगुच्छस्य द्वे वृत्ती गती इत्यर्थः सर्वलोकस्य मूर्द्ध्नि शिरसि, अथवा वने विशी-

मौनान्मूकः प्रवचनपटुर्वातुलो जल्पको वा
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः।
धृष्टः पार्श्वे स भवति जनो दूरतश्चाप्रगल्भः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः॥ ३९॥

नम्रत्वेनोन्नमन्तः परगुणनुतिभिः स्वान् गुणान् ख्यापयन्तः
स्वार्थान् सम्पादयन्तो विनतपृथुतरारम्भयन्तः परार्थे।
क्षान्त्येवाधिक्षिपन्तश्चरमुखरमुखान्दुर्मुखान्दूषयन्तः
सन्तः साश्चर्यचर्या जगति बहुमता कस्य नाभ्यर्थनीयाः॥४०

र्यैत स्रीयेत एताभ्यामिति शेषः। अनुष्टुब्वृत्तम्। उपमालङ्कारः॥ ३८॥

मौनादिति। मौनात् तूष्णीम्भावात् मूकः वर्णोच्चारकः, प्रवचने प्रकृष्टवाग्मे पटुः समर्थः वातुलः वायुग्रस्तः जल्पकः वाचालो वा, क्षान्त्या क्षमागुणेन भीरुः कातरः, यदि न सहते न क्षमते तदा प्रायशः बाहुल्येन न अभिजातः न सदुद्भवोयः : पार्श्वे भवति वसति चेदिति शेषः धृष्टः प्रगल्भः असभ्य इति यावत्, दूरतश्च दूरे वसति चेदिति भावः अप्रगल्भः अचतुरः। सर्वत्र भृत्य इति शेषः। अतः सेवाधर्मः भृत्यत्वव्यवहारः परमगहनः अतिदुर्बोधः योगिनामपि क्षमस्थः दुर्बोधः। मन्दाक्रान्ताछन्दः। मन्दाक्रान्ताम्बुधि रसनगौ मो भनौ तौ गयुग्ममिति तल्लक्षणात्। काव्यलिङ्गमलङ्कारः। तदुक्तं दर्पणे। हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते इति॥ ३९॥

नम्रत्वेनेति। नम्रत्वेन विनयेन उन्नमन्तः उन्नतिं लभमानाः, परेषां गुणस्तुतिभिः गुणस्तवनैः स्वान् निजान् गुणान् ख्यापयन्तः प्रकाशयन्तः परार्थे परकार्ये विनतः विनयसम्पन्नः पृथुतरः विस्तृततरः यः आरम्भः उद्योगः तद्वन्तः सन्तः स्वार्थान् स्वानि कार्याणी-

लोभश्चास्ति गुणेन किं ? पिशुनता यद्यस्ति किम्पातकैः ?
सत्यञ्चेत्तपसा च किं ? शुचिमनो यद्यस्ति तीर्थेन किं ?
सौजन्यं यदि किन्निजैः ? स्वमहिमा यद्यस्ति किम्मण्डनैः
सद्विद्या यदि किं ? धनैरपयशो यद्यस्ति किं मृत्युना ॥४१

अन्वयः सम्पाद्यन्तः समाद्रियन्तः चान्यत्रैव क्षमागुणेनैव आत्मेषु कटूक्षरा रूक्षाणि यानि अक्षराणि वचांसि तैः सक्षराणि वाचालानि सुखानि येषां तान् दुर्जनान् दूषयन्तः कलङ्कयन्तः अतएव सासूयां अङ्गुता चर्यां आचरणं येषां तादृशाः सन्तः साधवः जगति कस्य जनस्य बहुमता बहुादरणीयाः अभ्यर्थनीयाः सृहणीयाश्च न भवन्तीति शेषः अपितु सर्वेष्वेवेत्यर्थः । सक्षराद्यत्तम् । अभ्रंयोनां लयेन विसुनियतियुता सक्षरा कीर्त्तिर्यस्मिन्निति तल्लक्षणात् । काव्यलिङ्गमलङ्कारः ॥ ४० ॥

लोभ इति । लोभश्च अस्ति तदा परेण शत्रुणा स्थितेनेति शेषः किम् ? न किमपि प्रयोजनमित्यर्थः लोभस्यैव परमशत्रुत्वादिति भावः । यदि पिशुनता दौर्जन्यम् अस्ति, तदा पातकैः पापाचरणैः किम् ? पिशुनतैव यथेष्टं पातकमिति भावः । सत्यं सत्यवचनं चेत् यदि अस्तीति शेषः तदा तपसा चान्द्रायणादिना किम् ? न किमपि प्रयोजनमित्यर्थः सत्यस्यैव तपस्त्वादिति भावः । यदि मनः शुचि विशुद्धं अस्ति, तदा तीर्थेन पुष्करक्षेत्रगमनादिना किम् ? न किमपि प्रयोजनमित्यर्थः । तीर्थयात्रायाः मनः शुद्धिहेतुत्वमात्रं प्रयोजनं तत्तु सिद्धमेवेति कथं तत् प्रयास इति भावः । यदि सौजन्यं सज्जनत्वम् अस्तीति शेषः तदा निजैः आत्मीयैः बन्धुभिरित्यर्थः किम् ? न किमपि प्रयोजनमित्यर्थः सौजन्यात् परं बन्धुर्नास्तीति भावः । यदि स्वस्य महिमा औदार्यं दाक्षिण्यं वा अस्ति, तदा मण्डनैः भूषणैः किम् ? न किमपि प्रयोजनमित्यर्थः । महिमैव पुरुषं भूषयतीति भावः । यदि सद्विद्या उत्तमा विद्या

अम्भोजिनीवननिवासविलासहेतुं
हंसस्य हन्तुमपरामपि तां विधाता ।
नो तस्य दुग्धजलभेदविधौ प्रशस्तां
वैदग्ध्यकीर्त्तिमयहन्तुमसौ समर्थः ॥ ४२ ॥

खल्वाटो दिवसेश्वरस्य किरणैः सन्तापिते मस्तके
वाञ्छन्देशमनातपं विधिवशाद्विल्वस्य मूलङ्गतः ।
तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः
प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः ॥ ४३ ॥

अस्ति तदा धनैः किम् ? न प्रयोजनमित्यर्थः सहिष्णुता, एव परमघनत्वादिति भावः । यदि अपयशः अकीर्त्तिः अस्ति तदा मृत्युना किम् ? न किमपि प्रयोजनमित्यर्थः अपयशस एव मृत्युत्वादिति भावः । लोभश्चास्ति गुणेन किमिति प्रमादपाठः । शार्दूलविक्रीड़ितं वृत्तम् ॥ ४१ ॥

अम्भोजिनीति । विधाता हंसस्य अम्भोजिनीवनेषु पद्मिनीविपिनेषु निवासे यो विलासः विक्रीड़नं स एव हेतुः कारणं यस्याः तथोक्तां पद्मिनीवनविहारनिबन्धनामिति यावत् अपरां तां कीर्त्तिं हन्तुं नाशयितुं समर्थः, स्वेच्छया तद्वनविच्छेदे तदभावप्रसङ्गादिति भावः । किन्तु असौ विधाता तस्य हंसस्य दुग्धजलयोर्भेदविधौ पृथक्करणे प्रशस्तां वैदग्ध्यकीर्त्तिं चातुर्य्यख्यातिम् अपहन्तुं नाशयितुं नो समर्थ इति पूर्वेणान्वयः । अत्र कस्यचित् विदुषः आश्रयभङ्गो वैरिणा साध्यः किन्तु तदीयविद्यावत्तया ख्यातिभङ्गो नेति प्रतीतेरप्रस्तुतप्रशंसालङ्कारः । वसन्ततिलकं वृत्तम् ॥ ४२ ॥

खल्वाट इति । खल्वाटः टेको इति प्रसिद्धो जनः दिवसेश्वरस्य सूर्य्यस्य किरणैः मस्तके सन्तापिते सति अनातपम् आतपरहितं देशं वाञ्छन् विधिवशात् दैवात् विल्वस्य मूलं वनं गतः । तत्रापि मूले

नवाकृतिः फलति नैव कुलं न शीलं
विद्यापि नैव न च यत्नकृतापि सेवा ।
भाग्यानि पूर्वतपसा किल सञ्चितानि
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥ ४४ ॥

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो
ज्ञानस्योपशमः शमस्य विनयो वित्तस्य पात्रे व्ययः ।
अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकारणमिदं शीलम्परं भूषणम् ॥ ४५ ॥

यतता महाफलेन बिल्वफलेन अस्य गिरः सदृशं यथा तथा भग्नम् । अतः भाग्यरहितः अभाग्यः यत्र गच्छति, प्रायः तत्रैव आपदः यान्ति गच्छन्ति । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ४३ ॥

नेति । आकृतिः सुन्दराकार इत्यर्थः न वा नैव, कुलं सद्वंशः नैव, शीलं सुचरित न, विद्यापि नैव, यत्नकृता यत्नेन निष्पादिता सेवा शुश्रूषा प्रभोरिति शेषः न च फलति न फलं जनयतीत्यर्थः । पूर्वतपसा प्रागनुष्ठितेन तपसा सञ्चितानि साधितानि पुरुषस्य भाग्यानि किल अदृष्टान्येव वृक्षाः यथैव तरव इव काले फलन्ति फलं जनयन्ति । उपमालङ्कारः । वसन्ततिलकं वृत्तम् ॥ ४४ ॥

ऐश्वर्यस्येति । सुजनता साधुता ऐश्वर्यस्य, वाक्संयमः प्रिय-वादित्वमिति भावः शौर्यस्य वीर्यस्य, उपशमः शान्तिः ज्ञानस्य, विनयः नम्रता शमस्य शान्तेः, पात्रे योग्ये इति शेषः व्ययः दानं वित्तस्य धनस्य, अक्रोधः क्रोधराहित्यं तपसः, क्षमा परदोषसहिष्णुता प्रभवितुः प्रभोः, निर्व्याजता अकापट्यं धर्मस्य विभूषणम् अलङ्कारः । किञ्च सर्वेषामपि सर्वकालेषु नियतं शीलं सुचरितं परं भूषणं परमो-त्तमालङ्कारः । शार्दूलविक्रीडितं वृत्तम् ॥ ४५ ॥

ते ते सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय विघ्नन्ति ये
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥ ४६ ॥

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्त्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम् ॥ ४७ ॥

वाञ्छा सज्जनसङ्गमे गुणिगणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम्।

ते इति। ये जनाः स्वार्थं परित्यज्य परार्थघटकाः परकार्य्यसाधकाः, ते ते सत्पुरुषाः श्रेष्ठाः पुमांसः। ये स्वार्थाविरोधेन स्वकार्य्यबाधमकृत्वेत्यर्थः परार्थं परकार्य्यार्थम् उद्यमभृतः यत्नवन्तः, ते सामान्यास्तु साधारणा एवेत्यर्थः मध्यमा इति यावत्। ये स्वार्थाय स्वकार्य्यार्थं परेषां हितं विघ्नन्ति नाशयन्ति, ते अमी मानुषेषु राक्षसाः नरराक्षसा इत्यर्थः। ये तु निरर्थकं स्वपरार्थं विनेति भावः परेषां हितं घ्नन्ति नाशयन्ति, ते के, न जानीमहे। शार्दूलविक्रीडितं वृत्तम् ॥ ४६ ॥

जाड्यमिति। पुंसां नराणां सत्सङ्गतिः सज्जनसङ्गः किं न करोति? कथय, सर्वमेव करोतीत्यर्थः। तथाहि धियः बुद्धेः जाड्यं जड़तां मान्द्यमित्यर्थः हरति नाशयति, वाचि सत्यं सिञ्चति निदधाति, मानोन्नतिं मानवृद्धिं दिशति जनयति, पापं दुष्कृतम् अपाकरोति निरस्यति, चेतः मनः प्रसादयति विकासयति, दिक्षु कीर्त्तिं यशः तनोति विस्तारयति। वसन्ततिलकं वृत्तम् ॥ ४७ ॥

वाञ्छेति। सज्जनैः साधुभिः सङ्गमे संसर्गे वाञ्छा अभिलाषः,

भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खले
एते यत्र वसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः ॥ ४८ ॥
अग्राह्यं हृदयं तथैव वदनं यद् दर्पणान्तर्गतं
भावः पर्वतसूक्ष्ममार्गविषमः स्त्रीणां न विज्ञायते।
चित्तं पुष्करपत्रतोयतरलं विद्वद्भिराशंसितं
नारी नाम विषाङ्कुरैरिव लता दोषैः समं वर्द्धिता ॥४९॥
तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः
सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनान्।

शुचिगणे प्रीतिः प्रणयः, शुचौ शुद्धजने नम्रता, विद्यायां व्यसनम् आसक्तिः, स्वयोषिति निजकलत्रे रतिः अनुरागः, लोकापवादात् लोकनिन्दातः भयं, शूलिनि हरे भक्तिः, आत्मनः मनसः दमने वशीकरणे शक्तिः सामर्थ्यं, खले दुर्जने संसर्गमुक्तिः संसर्गत्यागः, एते निर्मलगुणाः विशुद्धगुणाः यत्र येषु वसन्ति, तेभ्यः नरेभ्यः नमः। शार्दूलविक्रीडितं वृत्तम् ॥ ४८ ॥

अग्राह्यमिति। दर्पणान्तर्गतम् आदर्शमध्यप्रतिबिम्बितं वदनं मुखं, यत् यथा अग्राह्यं स्त्रीणां हृदयं तथैव अग्राह्यमिति शेषः। पर्वतस्य सूक्ष्ममार्गवत् विषमः दुर्ज्ञेय इति यावत् भावः आशयः न विज्ञायते, स्त्रियाश्चरित्रं पुरुषस्य भाग्यं देवा न जानन्ति कुतो मनुष्या इति कविसम्प्रदायः। चित्तं मनः पुष्करपत्रे स्थितमिति भावः तोयमिव जलमिव तरलं चञ्चलं विद्वद्भिः विद्वद्भिः जनैः आशंसितं कथितं निर्णीतमिति यावत्। अतः नारी लता विषाङ्कुरैरिव दोषैः समं वर्द्धिता वृद्धिं नीता, निर्मितेति पाठान्तरम्। नाम खल्वावनावाम् एतत् खल्ववयामीत्यर्थः। शार्दूलविक्रीडितं वृत्तम् ॥४९॥

तृष्णामिति। तृष्णां लोभमित्यर्थः छिन्धि नाशय, क्षमां भज सेवस्व, मदं मत्ततां औद्धत्यमित्यर्थः जहि नाशय, पापे दुष्कृता-

मान्यान् मानय विद्विषोऽप्यनुनय प्रच्छादय स्वान् गुणान्
कीर्त्तिं पालय दुःखिते कुरु दयामेतत् सतां चेष्टितम् ॥५०॥

गुणवद्गुणवद् वा कुर्वता कार्य्यजातं
परिणतिरवधार्य्या यत्नतः पण्डितेन ।
अतिरभसकृतानां कर्मणामाविपत्तेः
भवति हृदयदाही शल्यतुल्यो विपाकः ॥ ५१ ॥

एको देवः केशवो वा शिवो वा
एकं मित्रं भूपतिर्वा यतिर्वा ।

चरणे रतिम् अनुरागं मा कृथाः न कुरु, सत्यं ब्रूहि वद, साधूनां पदवीं मार्गम् अनुयाहि अनुसर, विद्वज्जनान् पण्डितान् सेवस्व, मान्यान् गुरुजनान् इत्यर्थः मानय, विद्विषोऽपि शत्रूनपि अनुनय सन्तोषय, स्वान् गुणान् प्रच्छादय गोपनं कुरु कीर्त्तिं यशः पालय रक्ष, दुःखिते जने दयां कुरु, एतत् सर्वं सतां साधूनां चेष्टितं कार्य्यमित्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ ५० ॥

गुणवदिति । गुणवत् सगुणम् उत्कृष्टमित्यर्थः अगुणवत् निर्दोषं वा कार्य्यजातं कार्य्यसमूहं कुर्वता पण्डितेन विदुषा यत्नतः यत्नेन परिणतिः परिणामः तत्तत्कार्य्यस्येति शेषः अवधार्य्या निर्णेया प्राप्तिति शेषः । अतिरभसेन सकृत्येत्यर्थः परिणतिमजानन्नेव कृतानां कर्मणाम् आ विपत्तेः विपत्तिपर्य्यन्तं मरणपर्य्यन्तमिति यावत् हृदयदाही शल्यतुल्यः शल्यवद्दुःखः विपाकः परिणामः भवति । कार्य्यं च कारणसमर्थनरूपोऽर्थान्तरन्यासः । मालिनीवृत्तं, ननमयययुतेयं मालिनी भोगिलोकैरिति तल्लक्षणात् ॥ ५१ ॥

एक इति । केशवो वा शिवो वा एकः एकमात्रः अद्वितीय इत्यर्थः देवः आराध्य इति भावः । भूपतिः राजा वा यतिः सन्यासी

एको वासः पत्तने वा वने वा
एका भार्या सुन्दरी वा दरी वा ॥ ५२ ॥
वने रणे शत्रुजलाग्निमध्ये
महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा
रक्षन्ति पुण्यानि पुरा कृतानि ॥ ५३ ॥
भीमं वनं भवति तस्य पुरं प्रधानं
सर्वो जनः सुजनतामुपयाति तस्य ।
कृत्स्ना च भूर्भवति सन्निधिरत्नपूर्णा
यस्यास्ति पूर्वसुकृतं विपुलं नरस्य ॥ ५४ ॥

वा एकम् अद्वितीयं वित्तम् कर्त्तव्यमिति शेषः । पत्तने नगरे वा वने वा एकः अद्वितीयस्थानस्य इति भावः वासः कर्त्तव्य इति शेषः । सुन्दरी वा दरी पर्वतगुहा वा एका अद्वितीया भार्या आश्रयणीयेति शेषः ॥ ५२ ॥

वने इति । पुरा कृतानि प्राक्तनानि पुण्यानि वने रणे शत्रु-जलाग्निमध्ये शत्रुमध्ये जलमध्ये अग्निमध्ये च महार्णवे महा-समुद्रे पर्वतमस्तके शैलशृङ्गे वा स्थितमिति शेषः सुप्तं निद्रितं मत्तं विषमस्थितम् अनवधानवर्त्तिनमित्यर्थः जनमिति शेषः रक्षन्ति । उपजातिवृत्तं, स्यादिन्द्रवज्रा यदि तौ जगौ ग इति, उपेन्द्रवज्रा प्रथमाक्षरे लघौ यदीति, अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुप-जातयस्ता इति ॥ ५३ ॥

भीममिति । यस्य नरस्य विपुलं महत् पूर्वसुकृतं प्राक्तनं पुण्यम् अस्ति, तस्य भीमं भयावहं वनं प्रधानं श्रेष्ठं पुरं नगरं भवति, तस्य सर्वो जनः सुजनतां सौजन्यम् उपयाति गच्छति, किं बहुना तस्य

यन्नागा मदभिन्नकण्ठकरटास्तिष्ठन्ति निद्रालसा
द्वारे हेमविभूषणाश्च तुरगा वल्गन्ति यद्दर्पिताः ।
वीणावेणुमृदङ्गशङ्खपटहैः सुप्तस्तु यद् बोध्यते
तत्सर्वं सुरलोकदेवसदृशं धर्मस्य विस्फूर्जितम् ॥ ५३ ॥
मज्जत्वम्भसि यातु मेरुशिखरं शत्रुञ्जयत्वाहवे
वाणिज्यं कृषिसेवनादिसकला विद्याकलाः श्रिचतु ।
आकाशं विपुलं प्रयातु खगवत् कृत्वा प्रयत्नं परं
नाभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कुतः ॥ ५४ ॥

कृत्स्ना सप्तया भूः पृथिवी जलधिभिः निधिभिः रत्नैश्च पूर्णा भवति । वसन्ततिलकं वृत्तम् ॥ ५४ ॥

यदिति । मदेन भिन्नौ विस्फारितौ कण्ठकरटौ गलकपोलौ येषां तथोक्ताः मदोद्धता इत्यर्थः नागाः हस्तिनः निद्रया मदजनितया इति भावः आलसाः मन्थराः सन्तः द्वारे तिष्ठन्तीति यत्, हेम्नः विभूषणम् अलङ्कारः यत्र ताडशम् आस्यं मुखं येषां तथाभूताः स्वर्णभूषिता इति भावः तुरगाः अश्वाः दर्पिताः सन्तः द्वारे वल्गन्ति चपलाः तिष्ठन्तीत्यर्थः इति यत् सुप्तः निद्रितः वीणावेणुमृदङ्गशङ्खपटहैः वादित्रैरिति शेषः बोध्यते जागर्य्यते इति यत्, सुरलोके स्वर्गे देवानां सदृशं तत् सर्वं धर्मस्य सुकृतस्य विस्फूर्जितं विलसितम् । पुण्यपरिपाकोऽयमिति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ५३ ॥

मज्जत्विति । अम्भसि जले मज्जतु प्रविशतु, मेरुशिखरं सुमेरुशृङ्गं यातु, आहवे युद्धे शत्रुं जयतु, वाणिज्यं कृषिसेवनादिसकलाः विद्याकलाः विद्याविभागान् श्रियतु अभ्यसतु, खगवत् पक्षिवत् परं महत् प्रयत्नं कृत्वा विपुलं विस्तृतम् आकाशं प्रयातु गच्छतु जन इति शेषः, किन्तु कर्मवशतः सुकृतदुष्कृतवशात् अभाव्यम्

वरं पक्षच्छेदः समदमघवन्मुक्तकुलिश-
प्रहारैरुद्गच्छद्बहुलदहनोद्गारगुरुभिः ।
तुषाराद्रेः सूनोरहह पितरि क्लेशविवशे
न चासौ सम्पातः पयसि पयसां पत्युरुचितः ॥ ५७ ॥
नेता यस्य बृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः
स्वर्गो दुर्गमनुग्रहः खलु हरेरैरावतो वाहनम् ।
इत्यैश्वर्यसमन्वितोऽपि बलभिद्भग्नः परैः सङ्गरे
तद्युक्तं ननु दैवमेव शरणं धिग् धिग् वृथा पौरुषम् ॥५८॥

अभावनीयं न भवति, भाव्यस्य अवश्यम्भाविनस्य कुतः नाशः ? नैव कदाचित् नाशो भवतीत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ ५६ ॥

वरमिति । उद्गच्छतः बहुलस्य महतः दहनस्य वह्नेः उद्गारेण उद्वमनेन गुरुभिः महद्भिः समदः साहङ्कारः यः मघवान् इन्द्रः तेन मुक्तस्य निक्षिप्तस्य कुलिशस्य वज्रस्य प्रहारैः पक्षयोः छेदः पातनं वरं मनाक् प्रियः, अहह खेदे, पितरि हिमवति क्लेशविवशे शत्रुकृतपक्षच्छेदेन पुत्रविरहेण च क्लेशमनुभवति सति तुषाराद्रेः हिमवतः सूनोः मैनाकस्य पयसां पत्युः समुद्रस्य पयसि असौ सम्पातः निमज्जनं पितरं त्यक्त्वा आत्मरक्षार्थमिति भावः न च उचितः । शिखरिणीवृत्तम् । अत्राप्रस्तुतमैनाकवर्णनेन कस्यचित् प्रस्तुतस्य पितृत्यागेनात्मरक्षिणः प्रतीतेरप्रस्तुतप्रशंसालङ्कारः ॥ ५७ ॥

नेतेति । यस्य बृहस्पतिः देवगुरुः नेता मन्त्री, वज्रं कुलिशं प्रहरणम् अस्त्रं, सुराः देवाः सैनिकाः योद्धृपुरुषाः, स्वर्गः दुर्गं शत्रुदुर्गसदृशमनिलर्थः, हरेर्विष्णोः अनुग्रहः साहाय्यं खलु साहाय्यमस्येवेति यावत्, ऐरावतः वाहनं यानम् । इतीत्थम् ऐश्वर्यसमन्वितोऽपि बलभित् इन्द्रः सङ्गरे युद्धे परैः शत्रुभिर्दैत्यदानवैरिति शेषः भग्नः निर्जितः, तस्मात् दैवमेव सहायः युक्तं ननु युक्तमेव, वृथा

कर्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी ।
तथापि सुधिया भाव्यं सुविचार्यैव कुर्वता ॥ ५९ ॥
आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः ।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ॥ ६० ॥
वरं गहनदुर्गेषु भ्रान्तं वनचरैः सह ।
न मूर्खजनसंसर्गः सुरेन्द्रभवनेष्वपि ॥ ६१ ॥
दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥६२॥

निरर्थकं पौरुषं दुष्कृतकारं धिक् धिक् पुनः पुनर्निन्दामीत्यर्थः । धिङ्निर्भर्त्सननिन्द्ययोरित्यमरः । कारणेन कार्यसमर्थनरूपोऽर्थान्तरन्यासः । शार्दूलविक्रीडितं वृत्तम् ॥ ५८ ॥

कर्मेति । पुंसां फलम् अर्थसिद्धिः कर्मायत्तं कर्मजन्यादृष्टाधीनमित्यर्थः, बुद्धिः कर्मानुसारिणी तत्तत्सुकृतदुष्कृतजनितादृष्टानुसारेण प्रवर्त्तते इत्यर्थः । तथापि कर्मणः अनुल्लङ्घनीयत्वेऽपीत्यर्थः सुधिया विदुषा सुविचार्यैव सुविचिन्त्यैव कुर्वता कार्यमिति शेषः भाव्यम् । अनुष्टुब्वृत्तम् ॥ ५९ ॥

आलस्यमिति । आलस्यं मनुष्याणां शरीरस्थः महारिपुर्हि महान् शत्रुरेव । उद्यमेन उद्योगेन समः बन्धुः नास्ति, यम् उद्यमं कृत्वा न अवसीदति न क्षीयते जन इति शेषः । अनुष्टुब्वृत्तम् ॥६०॥

वरमिति । गहनदुर्गेषु दुर्गमेषु वनेषु वनचरैः व्याधैः सह भ्रान्तं भ्रमणं वरं मनाक्प्रियं, सुरेन्द्रभवनेषु अमरावतीषु अपि मूर्खजनैः संसर्गः न वर इति शेषः । अनुष्टुब्वृत्तम् ॥ ६१ ॥

दानमिति । वित्तस्य धनस्य दानं भोगः नाशः क्षयः एताः तिस्रः गतयः भवन्ति, यः जनः न ददाति, न च भुङ्क्ते, तस्य तृतीया गतिः धनस्य नाश एवेत्यर्थः भवति । आर्यावृत्तम् ॥६२॥

यस्यास्ति वित्तं स नरः कुलीनः
स एव वक्ता स च दर्शनीयः ।
स पण्डितः स श्रुतवान् गुणज्ञः
सर्वे गुणाः काञ्चनमाश्रयन्ति ॥ ६३ ॥
रत्नैर्महार्हैस्तुतुषुर्न देवाः
न भेजिरे भीमविषेण भीतिम् ।
सुधां विना न प्रययुर्विरामं
विनिश्चितार्थाद्विरमन्ति धीराः ॥ ६४ ॥
सन्त्यन्येऽपि बृहस्पतिप्रभृतयः सम्भाविताः पञ्चषा-
स्तान् प्रत्येष विशेषविक्रमरुचौ राहुर्न वैरायते ।

यस्येति । यस्य नरस्य वित्तं धनम् अस्ति, स नरः कुलीनः महावंशप्रसूत इत्यर्थः धनेन कुलमिति वैयाकरणाः, स एव नरः वक्ता शिष्टभाषी, स च दर्शनीयः सुश्रीरित्यर्थः, स पण्डितः विद्वान्, स श्रुतवान् वेदवित्, गुणज्ञश्च । तथाहि सर्वे गुणाः कौलीन्यादयः काञ्चनं धनमिति यावत् आश्रयन्ति । कारणेन कार्यसमर्थनरूपोऽर्थान्तरन्यासः । उपजातिवृत्तम् ॥ ६३ ॥

रत्नैरिति । देवाः महार्हैः महामूल्यैः रत्नैः समुद्रोद्भवैरिति भावः न तुतुषुः न सन्तोषं प्रापुः । भीमविषेण भयङ्करहलाहलेन समुद्रोत्थितेनेति भावः भीतिं भयं न भेजिरे न प्रापुः । सुधाम् अमृतं विना विरामं निष्ठां न प्रययुः न प्रापुः । तथाहि धीराः सन्तः विनिश्चितार्थात् विशेषेण सिद्धार्थात्, यत्नेन पञ्चभी । सिद्धं कार्यं प्राप्येत्यर्थः विरमन्ति निवर्तन्ते । उपजातिवृत्तम् । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ६४ ॥

सन्तीति । हे भ्रातः ! अन्येऽपि बृहस्पतिप्रभृतयः सम्भाविताः पञ्चषाः पञ्च षट् सुरा इति शेषः सन्ति, एषः विशेषविक्रमे रुचिरभि-

द्वावेव ग्रसते दिनेश्वरनिशाप्राणेश्वरौ भास्वरौ
भ्रातः ! पर्वणि पश्य दानवपतिः शीर्षावशेषीकृतः ॥६५॥
इयत्येतस्मिन् वा निरवधिचमत्कृत्यतिशये
वराहो वा राहुः प्रभवति चमत्कारविषयः ।
महीमेको मग्नां यदयमवहद्दन्तमुकुलैः
शिरःशेषः शत्रुर्निगिलति परं सन्त्यजति च ॥ ६६ ॥

श्रोत्रं श्रुतेनैव न कुण्डलेन
दानेन पाणिर्न च कङ्कणेन ।
आभाति कायः करुणापराणां
परोपकारेण न चन्दनेन ॥ ६७ ॥

शार्दूलविक्रीडितं वृत्तम् ॥ ६५ ॥

इयतीति । इयति एतत्परिमाणे एतस्मिन् वा निरवधि-चमत्कृत्यतिशये अशेषाश्चर्यातिशये जगतीति शेषः वराहो वा राहुर्वा चमत्कारस्य आश्चर्यस्य विषयः अतीवपात्रमिति भावः प्रभवति सर्वोत्कर्षेण वर्त्तते इत्यर्थः । यत् यतः अयम् एकः वराह इत्यर्थः मग्नां प्रलयपयोधाविति भावः दन्तमुकुलैः अवहत्, अपरः शिरःशेषः शीर्षावशिष्टः शत्रुः राहुरिति भावः परं शत्रुं सूर्यं चन्द्रं वा निगिलति ग्रसति सन्त्यजति च उद्गिरति च । शिखरिणीवृत्तम् ॥ ६६ ॥

श्रोत्रमिति । श्रोत्रं कर्णविवरं श्रुतेन वेदवाक्येन कुण्डलेन न, पाणिः भुजः दानेन न कङ्कणेन, करुणापराणां दयार्द्राणां कायः

जयन्ति ते सुकृतिनो रसवेद्याः कवीश्वराः ।
नास्ति येषां यशःकाये जरामरणजन्मभीः ॥ ६८ ॥

धात्रा निजभालपट्टलिखितं स्तोकं महद्वा फलं
तत् प्राप्नोति मरुस्थलेऽपि नियतं मेरौ च नातोऽधिकम् ।
तद्धीरो भव वित्तवत्सु कृपणां दृत्तिं वृथा मा कृथाः
कूपे पश्य पयोनिधावपि घटा गृह्णन्ति तुल्यज्जलम् ॥६९॥

लाङ्गूलचालनमधश्चरणावपातं
भूमौ निपत्य वदनोदरदर्शनञ्च ।

शरीरं परोपकारेण न चन्दनेन, आभाति शोभते । उपजातिवृत्तम् ॥ ६७ ॥

जयन्तीति । ते सुकृतिनः पुण्यवन्तः रसवेद्याः रसिकाः कवीश्वराः श्रेष्ठाः कवयः जयन्ति सर्वोत्कर्षेण वर्त्तन्ते । येषां कवीश्वराणां यशःकाये यशःशरीरे काव्यरूपे इति भावः जरा वार्द्धकं मरणं जन्म तेभ्यः भीः भयं नास्ति । तत् शरीरं जरादीनां वशंवदं न भवतीति भावः । अनुष्टुब्वृत्तम् ॥ ६८ ॥

धात्रेति । धात्रा विधात्रा निजभालपट्टे स्वकीयललाटपट्टे लिखितं यत् स्तोकम् अल्पं वा महत् फलं, तत् मरुस्थलेऽपि मरुभूमावपि मेरौ सुमेरुपर्वते च प्राप्नोति जन इति शेषः, अतः अस्मात् विधातृलिखितात् अधिकम् अल्पं वेति शेषः न प्राप्नोतीति शेषः । तत् तस्मात् धीरो भव सुस्थिरो भव, वित्तवत्सु धनिषु वृथा निष्फलां कृपणां दीनां वृत्तिं याच्ञामित्यर्थः मा कृथाः न कुरु । पश्य अवलोकय कूपे पयोनिधावपि घटाः कलसाः तुल्यं जलं गृह्णन्ति लभन्ते । शार्दूलविक्रीडितं वृत्तम् ॥ ६९ ॥

लाङ्गूलेति । श्वा कुक्कुरः लाङ्गूलचालनं पुच्छकम्पनं पिण्डदस्य अन्नदातुः अधः चरणयोः अवपातं पतनं भूमौ निपत्य वदनो-

श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु
धीरं विलोकयति चाटुशतैश्च भुङ्क्ते ॥ ७० ॥
राजन् ! दुधुक्षसि यदि क्षितिधेनुमेतां
तेनाद्य वत्समिव लोकमिमं पुषाण ।
तस्मिंश्च सम्यगनिशम्परिपोष्यमाणे
नानाफलैः फलति कल्पलतेव भूमिः ॥ ७१ ॥
सत्यानृता च परुषा प्रियवादिनी च
हिंस्रा दयालुरपि चार्थपरा वदान्या ।
नित्यव्यया प्रचुरनित्यधनागमा च
वाराङ्गनेव नृपनीतिरनेकरूपा ॥ ७२ ॥

द्वयोः सुखजठरयोः दर्शनं प्रदर्शनं करुते । तु किन्तु गजपुङ्गवः गजराजः धीरं गम्भीरं यथा तथा विलोकयति, चाटुशतैः बहुयत्नैरिति भावः भुङ्क्ते भक्षयति च । यथावोन्यमाचरति लोक इति भावः । वसन्ततिलकं वृत्तम् ॥ ७० ॥

राजन्निति । हे राजन् ! यदि एतां क्षितिधेनुं पृथिवीरूपां गां दुधुक्षसि दोग्धुमिच्छसि, तेन तदेत्यर्थः अद्य इदानीं वत्समिव इमं लोकं पुषाण पालय, यथा प्रथमं वत्सः स्वमातुर्धेनोः स्तन्यं पिबति ततस्तत्पालकस्य दुग्धप्राप्तिः तथा त्वयतः भूयस्त्वेन प्रजां रक्षित्वा पश्चात् भूस्वामिनः करषष्ठांशं कर्त्तव्यमिति भावः । तस्मिंश्च लोके नानाफलैः अनिशं सततं सम्यक् परिपोष्यमाणे पाल्यमाने सति भूमिः कल्पलतेव फलति अभीष्टम् उत्पादयति । उपमालङ्कारः । वसन्ततिलकं वृत्तम् ॥ ७१ ॥

सत्यानृतेति । नृपनीतिः राजनीतिः वाराङ्गनेव वेश्येव सत्या सत्यवादवती अनृता मिथ्यावती च, परुषा निष्ठुरा प्रियवादिनी च, हिंस्रा हिंसाशीला दयालुरपि, अर्थपरा धनलोलुपा वदान्या दान-

न कश्चिच्चण्डकोपानामात्मीयो नाम भूभुजाम् ।
होतारमपि जुह्वन्तं स्पृष्टो दहति पावकः ॥ ७३ ॥
विपदि महतान्धैर्यध्वंसं यदीच्छितुमीक्षसे
विरम विरमायासादस्मात् दुरध्यवसायतः ।
अपि जलनिधेः कल्पापाये व्यपेतनिजक्रमात्
कुलगिरिखरिण्यः क्षुद्रा नैते न चापि जड़ाशयाः ॥ ७४ ॥

श्रीला च, नित्यं सततं व्ययः यस्यां यस्या वा तथोक्ता तथा प्रचुरः प्रभूतः नित्यं धनागमः यस्यां यस्या वा तथाविधा अनयैव अनेकरूपा बहुविधा । उपमालङ्कारः । वसन्ततिलकं वृत्तम् ॥ ७२ ॥

नेति । कश्चित् कोऽपि जनः चण्डकोपानां प्रचण्डक्रोधानां भूभुजाम् आत्मीयः न अस्तीति शेषः नाम सम्भावनायाम् एतत् सम्भावयामीत्यर्थः । तथाहि पावकः अग्निः स्पृष्टः वन् पदादिनेति भावः जुह्वन्तम् आत्मनि हव्यं प्रक्षिपन्तं होतारमपि दहति भस्मीकरोति । प्रचण्डानां स्वपरविवेको नास्तीति भावः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः । अनुष्टुब्वृत्तम् ॥ ७३ ॥

विपदीति । यदि चेत् विपदि सङ्कटे धैर्यध्वंसम् ईक्षितुं द्रष्टुम् ईक्षसे चेष्टसे द्रक्ष्यसीति यावत् तदा दुरध्यवसायतः दुष्टात् अध्यवसायात् दुश्चेष्टितात् अस्मात् आत्मनात् क्षोभात् विरम विरम अत्यर्थं निवर्त्तस्व । कल्पापाये प्रलये जलनिधेः बहुत्वात् बहवो रत्नाकरत्वात् जड़निधेः निश्चेष्टत्वात् बहुत्वात् अपि एषः धैर्यध्वंसः सम्भवति व्यपेतः विगतः निजक्रमः स्वीया स्थितिर्यस्य तस्मात् कुलगिरिखरिण्यः कुलपर्वतात् च एषः धैर्यध्वंसः सम्भवति । परन्तु एते सङ्घाताः कुलपर्वता इव क्षुद्राः न चापि बहुत्वा इव जड़ाशयाः । प्रलये पर्वतानां सागराणाञ्च यथावत् स्थितिभङ्गो यदि स्यात् तथापि सङ्घातां कदापि धैर्यध्वंसो न स्यादिति निष्कर्षः । शिखरिण्यीवृत्तम् ॥ ७४ ॥

अकरुणत्वमकारणविग्रहः परधनाय रतिः परयोषिति।
सुजनबन्धुजनेष्वसहिष्णुता प्रकृतिसिद्धमिदं हि दुरात्मनाम्॥४

कान्ताकटाक्षविशिखा न खनन्ति यस्य
चित्तं न निर्दहति कोपकृशानुतापः।
कर्षन्ति भूरिविषयाश्च न लोभपाशा
लोकत्रयं जयति कृत्स्नमिदं स वीरः॥ ७६॥

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलसज्जनानाम्॥७७

अकरुणत्वमिति। अकरुणत्वं निर्दयत्वम्, अकारणविग्रहः निष्कारणकलहः, परधनाय परयोषिति परकलत्रे च रतिः लोभः, सुजनेषु बन्धुजनेषु च असहिष्णुता, इदं सर्वं दुरात्मनां प्रकृतिसिद्धं स्वभावनियतम्। द्रुतविलम्बितं वृत्तम्॥ ७४॥

कान्तेति। कान्तायाः कटाक्षविशिखाः कटाक्षशराः यस्य चित्तं न खनन्ति न विध्यन्ति, कोपकृशानुतापः कोपाग्निसन्तापः यस्य चित्तं न निर्दहति, भूरिविषयाः बहुविषयाः लोभपाशाश्च लोभरज्जवश्च यस्य चित्तं न कर्षन्ति, स वीरः कृत्स्नं समग्रम् इदं लोकत्रयं जयति। रूपकमलङ्कारः। वसन्ततिलकं वृत्तम्॥ ७५॥

आरम्भेति। खलसज्जनानां खलानां दुर्जनानां साधूनां मैत्री आरम्भे उपक्रमे गुर्वी महती, क्रमेण क्षयिणी अस्थायिनी, पुरा प्राक् आरम्भे इत्यर्थः लघ्वी अल्पमात्रा, पश्चात् वृद्धिमती च, अतः दिनस्य पूर्वार्द्धपरार्द्धयोः भिन्ना पृथग्भूता दिनस्य पूर्वार्द्धे आरम्भगुर्वी ततः क्रमेण क्षयिणी, पराह्णे आरम्भलघ्वी पश्चात् वृद्धिमतीति भावः छायेव भवतीति शेषः। उपजातिवृत्तम्॥ ७६॥

प्रदानमिति। प्रच्छन्नं गूढम् अप्रकाशमित्यर्थः प्रदानं, वृत्तम् उपगते वृत्तागते जने इति शेषः सम्भ्रमविधिः सम्मानदानम्, प्रियं

प्रदानं प्रच्छन्नं गृहमुपगते सम्भ्रमविधिः
प्रियं कृत्वा मौनं सदसि कथनञ्चाप्युपकृतेः ।
अनुत्सेको लक्ष्म्या निरभिभवसाराः परकथाः
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥७८॥
क्षिप्तोऽपि रोहति तरुः क्षीणोऽप्युपचीयते पुनश्चन्द्रः ।
इति विमृशन्तः सन्तः सन्तप्यन्ते न ते विपदा ॥७९॥
भवन्ति नम्रास्तरवः फलोद्गमैः
नवाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥ ८० ॥

कृत्वा लोकस्येति शेषः मौनं तूष्णीम्भावः श्लाघाराहित्यमित्यर्थः, सदसि सभायाम् उपकृतेः परकृतायाः इति शेषः कथनं प्रकटनं, लक्ष्म्या सम्पदा अनुत्सेकः अगर्वः, निरभिभवसाराः निरवमानाः परकथाः परेषां कथासु अवमाननाराहित्यमिति भावः सतां साधूनाम् इदं विषमं दुष्करमित्यर्थः असिधाराव्रतम् असिधारायां क्षितावपि असिना न शरीरकर्त्तनं स्यादित्येवं व्रतं केन उद्दिष्टम् उपदिष्टम् । सर्वथा दुष्करं साधुव्रतमिति भावः । शिखरिणीवृत्तम् ॥ ७७ ॥

क्षिप्त इति । तरुः वृक्षः क्षिप्तोऽपि रोहति पुनर्वर्द्धते, चन्द्रः क्षीणोऽपि कलामात्रावशेषोऽपि पुनरुपचीयते पुनर्वर्द्धते । इति विमृशन्तः विचारयन्तः पश्यन्त इति यावत् ते प्रसिद्धाः सन्तः साधवः विपदा न सन्तप्यन्ते पुनरुन्नतिवाञ्छयेति भावः । आर्याछन्दः ॥७९॥

भवन्तीति । तरवः फलानाम् उद्गमैः उद्भवैः नम्राः विनताः भवन्ति । घनाः मेघाः नवाम्बुभिः नवजलैः दूरात् विलम्बिनः अवनमन्तीत्यर्थः । सत्पुरुषाः साधवः समृद्धिभिः अनुद्धताः न औद्धत्यं गताः प्रत्युत विनता एवेति भावः । परोपकारिणाम् एषः दैवश्च

कदर्थितस्यापि हि धैर्यवृत्तेः
बुद्धेर्विनाशो न हि शङ्कनीयः ।
अधःकृतस्यापि तनूनपातो
नाधः शिखा याति कदाचिदेव ॥ ८१ ॥

अप्रियवचनदरिद्रैः प्रियवचनाढ्यैः स्वदारपरितुष्टैः ।
परपरिवादनिवृत्तैः क्वचित् क्वचिन्मण्डिता वसुधा ॥८२॥

पद्माकरं दिनकरो विकचीकरोति
चन्द्रो विकासयति कैरवचक्रवालम् ।

स्वभाव एव । सामान्येन विशेषस्मरणेनोद्दीपनार्थान्तरन्यासः । वंशस्थ-विलं वृत्तं, वदन्ति वंशस्थविलं जतौ जरौ इति लक्षणात् ॥ ८० ॥

कदर्थितस्येति । कदर्थितस्य क्लेशितस्यापि धैर्यवृत्तेः धीरस्य बुद्धेर्विनाशः विपर्ययः इति यावत् धैर्यच्युतिरिति भावः न शङ्कनीयः सम्भावनीयः । अधःकृतस्यापि अधस्तनं स्थापितस्यापीत्यर्थः न्यक्कृतस्यापीति भावः तनूनपातः अग्नेः शिखा कदाचिदेव न अधः याति ऊर्ध्वमेव उत्तिष्ठतीति यावत्, प्रसिद्धमूर्ध्वज्वलनं ह्यविर्भुज इति भावः । विशेषेण सामान्यस्मरणेनोद्दीपनार्थान्तरन्यासः उपजाति-वृत्तम् ॥ ८१ ॥

अप्रियेति । अप्रियवचनेषु दरिद्रैः अप्रियकत्रुवद्भिरित्यर्थः प्रियवचनेन आढ्यैः युक्तैः प्रियवादिभिरित्यर्थः स्वदारेषु निजभार्यासु परितुष्टैः प्रस्त्रीविमुखैरिति भावः परपरिवादनिवृत्तैः लोकानां निन्दायाः विरतैरित्यर्थः साधुभिरिति शेषः क्वचित् क्वचित् न तु सर्वत्रेति भावः वसुधा पृथ्वी मण्डिता अलङ्कृता । क्वचित् क्वचित् प्रदेशे साधवः सन्ति न तु सर्वत्रेति भावः । आर्याछन्दः ॥ ८२ ॥

पद्माकरमिति । दिनकरः सूर्यः पद्माकरं सरोजनिचयं सरो-

नाभ्यर्थितोऽपि जलदः सलिलन्ददाति
सन्तः स्वयं परहितेषु कृताभियोगाः ॥८३॥
एकेनापि हि शूरेण पादाक्रान्तं वसातलम् ।
क्रियते भास्करेणेव स्फारं स्फुरिततेजसा ॥ ८४ ॥
वरं तुङ्गाच्छृङ्गाद् गुरुगिरिवरिणः क्वापि पुलिने
पतित्वायङ्कायः कठिनदृषदन्तर्विदलितः ।
वरं न्यस्तो हस्तः फणिपतिमुखे तीव्रदशने
वरं वह्नौ पातस्तदपि न कृतः शीलविलयः ॥ ८५ ॥

वरं वा विकचोकरोति विकासयति । चन्द्रः कैरवचक्रवालं कुमुदसमूहं विकासयति । जलदः मेघः नाभ्यर्थितः अपि अयाचितोऽपि सलिलं ददाति । सन्तः साधवः परेषां हितेषु स्वयं कृताभियोगाः कृतप्रयत्नाः भवन्तीति शेषः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः । वसन्ततिलकं वृत्तम् ॥ ८३ ॥

एकेनेति । एकेनापि शूरेण वीरेण स्फुरिततेजसा दीप्ततेजसा भास्करेणेव स्फारं विस्तृतं वसातलं पृथिवीतलं पादाक्रान्तं मयूखाभिभूतं चरणाक्रान्तमिति ध्वनिः क्रियते हि क्रियत एव । अत्राप्रस्तुतेन भास्करेण कस्यचित् प्रस्तुतस्य वीरपुरुषस्य प्रतीतेरप्रस्तुतप्रशंसालङ्कारः । अनुष्टुब्वृत्तम् ॥ ८४ ॥

वरमिति । गुरुगिरिवरिणः महाद्रेः तुङ्गात् उन्नतात् शृङ्गात् क्वापि पुलिने सैकतदेशे पतित्वा अयं कायः शरीरं कठिनदृषदां दृढशिलानाम् अन्तर्मध्ये विदलितः चूर्णितः वरं मनाक्प्रियः, तीव्रदशने तीक्ष्णदन्ते फणिपतिमुखे भुजङ्गवदने हस्तः न्यस्तः अर्पितः वरं मनाक्प्रियः, वह्नौ अग्नौ पातः पतनं वरं मनाक्प्रियः, तदपि तथापि शीलविलयः दुश्चरितध्वंसः न कृतः मयेति शेषः । महान्तः अर्थेऽपि शीलं न त्यजन्तीति भावः । गिरिणीवृत्तम् ॥ ८५ ॥

वह्निस्तस्य जलायते जलनिधिः कूपायते तत्क्षणात्
मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरङ्गायते ।
व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते
यस्याङ्गेऽखिललोकवल्लभतमं शीलं समुन्मीलति ॥८६॥
यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितूरविकान्तः ।
तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते ॥ ८७ ॥

आज्ञा कीर्तिः पालनं ब्राह्मणानां
दानभोगो मित्रसंरक्षणञ्च ।

वह्निरिति । यस्य जनस्य अङ्गे शरीरे अखिललोकानां सर्वजनानां वल्लभतमम् अतिप्रियं शीलं सुचरितं समुन्मीलति सम्यक् प्रकाशते, तस्य वह्निः जलायते जलवत् शीतलो भवतीत्यर्थः, जलनिधिः समुद्रः तत्क्षणात् तद्दर्शनमात्रेणेत्यर्थः कूपायते कूपवदाचरति, मेरुः सुमेरुगिरिः स्वल्पशिलायते क्षुद्रशिलावत् आचरति, मृगपतिः सिंहः सद्यः तत्क्षणं कुरङ्गायते मृगवदाचरति, व्यालः सर्पः माल्यगुणायते हारयष्टिरिवाचरति, विषरसः विषास्वादः पीयूषवर्षायते अमृतास्वाद इव आचरति । शीलवतः सर्वत्रैव सुखं न क्वचिदपि दुःखं स्यादिति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ८६ ॥

यदिति । अचेतनोऽपि रविकान्तः सूर्यकान्तमणिरित्यर्थः सवितुः सूर्यस्य पादैः किरणैः चरणैरिति ध्वनिः । स्पृष्टः आक्रान्तः आहत इति ध्वनिः, यत् यदेत्यर्थः प्रज्वलति प्रकर्षेण दीप्यते तेजः प्रकाशयतीत्यर्थः, तत् तदा तेजस्वी पुरुषः परकृतनिकृतिम् अन्यकृतमवमानं कथं सहते ? नैव सहते इत्यर्थः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः आर्याछन्दः ॥ ८७ ॥

आज्ञेति । आज्ञा आदेशः कीर्तिः यशः सुख्यातिरित्यर्थः ब्राह्मणानां पालनं दानं भोगः मित्राणां संरक्षणञ्च सम्यक् पालनञ्च

येषामेते षड्गुणा न प्रवृत्ताः
कोऽर्थस्तेषां पार्थिवोपाश्रयेण ॥ ८८ ॥
व्यालम्बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते
भेत्तुं वज्रमणिं शिरीषकुसुमप्रान्तेन सन्नह्यति ।
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते
नेतुं वाञ्छति यः सतां पथि खलान् सूक्तैः सुधास्यन्दिभिः ८९

स्वायत्तमेकान्तहितं विधात्रा
विनिर्मितं छादनमज्ञतायाः ।

एते षट् गुणाः येषां न प्रवृत्ताः न चलिताः, तेषां पार्थिवोपाश्रयेण राजाश्रयेण कोऽर्थः ? किं प्रयोजनं ? न किमपीत्यर्थः । राजसेविनो यदि उक्तं गुणषट्कं न लभन्ते तदा तेषां तत्सेवनं न कार्यमिति भावः प्राक्तनोऽर्धश्लोकः ॥ ८८ ॥

व्यालमिति । यः सुधास्यन्दिभिः अमृतवर्षिभिः सूक्तैः शोभनवचनैः खलान् दुर्जनान् सतां साधूनां पथि नेतुं वाञ्छति चेष्टते इत्यर्थः, असौ बालमृणालतन्तुभिः अभिनवविससूत्रैः व्यालं सर्पं रोद्धुं बन्धुं समुज्जृम्भते सम्यक् प्रवर्तते, शिरीषकुसुमप्रान्तेन शिरीषपुष्पाग्रेण वज्रमणिं हीरकं भेत्तुं वेद्धुं सन्नह्यति उद्युङ्क्ते, तथा मधुबिन्दुना क्षाराम्बुधेः लवणसागरस्य माधुर्यं मिष्टतां रचयितुं कर्तुम् ईहते चेष्टते । खलानां सत्पथे नयनमसम्भवमिति भावः । अत्राप्यस्य धर्मं कथमन्यो वक्तीति खलानां सत्पथे नयनस्य मृणालतन्तुना व्यालबन्धनस्य शिरीषकुसुमप्रान्तेन वज्रभेदनस्य मधुबिन्दुना लवणोदधेर्माधुर्यसम्पादनस्य च बिम्बप्रतिबिम्बभावापन्नोनिदर्शनालङ्कारः । तदुक्तं दर्पणे, सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वापि कुत्रचित् । यत्र बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शनेति । प्राङ्निविष्टोऽर्धश्लोकः इत्तम् ॥ ८९ ॥

स्वायत्तमिति । स्वायत्तं स्वाधीनम् एकान्तहितम् अतिशयित-

विशेषतः सर्वविदां समाजे
विभूषणं मौनमपण्डितानाम् ॥ ६० ॥
उद्भासिताखिलखलस्य विशृङ्खलस्य
प्राग्जातविस्मृतनिजाधमकर्मवृत्तेः।
दैवादवाप्तविभवस्य गुणद्विषोऽस्य
नीचस्य गोचरगतैः सुखमास्यते कैः ॥६१॥
विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।

जनकं विधात्रा विधिना विनिर्मितं कृतं दैवकृतमित्यर्थः अज्ञमायाः अज्ञतायाः इति यावत् छादनं गोपकमित्यर्थः अज्ञोऽयं वञ्चयितुमिति लोकानामवज्ञाया आवरकमिति भावः अपण्डितानाम् अविदुषां मौनं तूष्णीम्भावः सर्वविदां सर्वज्ञानां विचक्षणानामिति भावः समाजे विशेषतः विभूषणम् अलङ्कारः। विज्ञसंसदि अपण्डितैर्मौनमास्थेयं तथा सति केऽपि तं नितरां मूर्खं नावबुध्यन्ते इति भावः। उपजातिवृत्तम् ॥ ६० ॥

उद्भासितेति। उद्भासिताः उत्तेजिताः अखिलाः समस्ताः खलाः दुर्जनाः येन तथोक्तस्य दुर्जनान् स्वयं यत इति यावत् विशृङ्खलस्य अव्यवस्थितस्येत्यर्थः प्राग्जातेन पूर्वभूतेन प्राक्कृतेनेति भावः विस्मृतेन निजेन स्वकीयेन अधमेन नीचेन कर्मणा वृत्तिः जीविका यस्य तथाविधस्य पूर्वमतिनीचकर्मणा जीविका कृतेति विस्मरत इत्यर्थः दैवात् अवाप्तविभवस्य प्राप्तधनस्य गुणद्विषः गुणविरोधिनः नीचस्य अधमस्य जनस्य गोचरगतैः दृष्टिपथवर्त्तिभिः कैः साधुभिरिति शेषः सुखम् आस्यते? सुखं स्थीयते? न कैरपीत्यर्थः। दुर्जनगोचराः केऽपि न सुखिनो भवन्तीति भावः। वसन्ततिलकं वृत्तम् ॥ ६१ ॥

विद्येति। विद्या नाम नरस्य मानवस्य अधिकम् अङ्गसौन्दर्या-

विद्या बन्धुजनो विदेशगमने विद्या परन्दैवतं
विद्या राजसु पूजिता शुचि धनं विद्याविहीनः पशुः ॥९२॥
दाक्षिण्यं स्वजने दया परिजने शाठ्यं सदा दुर्जने
प्रीतिः साधुजने क्षमा गुरुजने नारीजने धूर्तता ।
शौर्यं शत्रुजने क्षयः खलजने विद्वज्जने चार्जवं
ये त्वेवं पुरुषाः कलासु कुशलास्तेष्वेव लोकः स्थितः ॥९३॥

करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता
मुखे सत्या वाणी विजयभुजयोर्वीर्यमतुलम् ।

दतिरिक्तं रूपं सौन्दर्यं, प्रच्छन्नगुप्तं निधिनगूढं धनं यत् केनापि हर्तुं न शक्यते इति भावः । विद्या भोगकरी सुखसम्भोगसाधनी यशसा कीर्तिसञ्चारेण सुखकरी आनन्दविधायिनी, विद्या गुरूणां गुरुः पुरुषेति भावः । विद्या विदेशगमने बन्धुजनः विदेशे बन्धुहितत्व कारणत्वादिति भावः । विद्या परं महत् दैवतम् आराध्यमिति भावः । विद्या राजसु नृपतिषु पूजिता राजानो विद्वांसं पूजयन्तीति भावः विद्या शुचि पवित्रं निर्दोषं हार्यत्वादिदोषरहितमिति भावः धनं, तस्मात् विद्याविहीनो जनः पशुः पशुवत् गण्यते इति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ९२ ॥

दाक्षिण्यमिति । स्वजने बन्धुजने दाक्षिण्यम् आनुकूल्यं परिजने परिवारे भृत्यवर्गे इत्यर्थः दया, दुर्जने शाठ्यं शठता, साधुजने प्रीतिः प्रणयः, गुरुजने क्षमा दोषाग्रहणं, नारीजने धूर्तता चातुर्यं, शत्रुजने शौर्यं विक्रमः, खलजने क्षयः उपहासः गर्वो वा, विद्वज्जने च आर्जवं सारल्यं. ये तु पुरुषाः एवम् इत्थं कलासु व्यवहारेष्वित्यर्थः कुशलाः निपुणाः, तेषु पुरुषेषु एव लोकः संसारः स्थितः । ईदृशा एवं संसारं सुखेन नयन्तीति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ९३ ॥

करे इति । करे हस्ते श्लाघ्यः प्रशंसनीयः त्यागः सत्पात्रे

हृदि खेच्छावृत्तिः श्रुतमधिगतञ्च श्रवणयोः
विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥ ९४ ॥
वहति भुवनश्रेणीं फणी फणाफलकस्थितां
कमठपतिना मध्ये पृष्ठं सदा स च धार्य्यते ।
तमपि कुरुते क्रीड़ाधानं पयोनिधिरनादरात्
अहह महतां निःसीमानश्चरित्रविभूतयः ॥९५॥
स्पृहयति भुजयोरन्तरमायतकरवालकरुहदीर्णम् ।
विजयश्रीर्वीराणां मत्तप्रौढ़वनितेव सदा ॥ ९६ ॥

हृदीति भावः, शिरसि गुरुपादप्रक्षयिता गुरुजनचरणेषु अवनतिरिति भावः, मुखे सत्या वाणी वाक्, विजयभुजयोः विजयार्थं शत्रूणामिति शेषः भुजयोः बाह्वोः अतुलं वीर्यं, हृदि मनसि स्वेच्छया निजेच्छया वृत्तिः व्यवहारः, श्रवणयोः कर्णयोः श्रुतं शास्त्रम् अधिगतञ्च, इदं सर्वं प्रकृतिमहता प्रकृत्या स्वभावेन महान्तः तेषाम् ऐश्वर्येण सम्पदा विनापि प्रभूतसम्पत्तिराहित्येऽपीति भावः मण्डनं भूषणम् । शिखरिणीवृत्तम् ॥ ९४ ॥

वहतीति । फणी नागराजः फणाफलकस्थितां फणमण्डलवर्त्तिनीं भुवनश्रेणीं भुवनसमूहं वहति । कमठपतिना कूर्मराजेन मध्ये पृष्ठं पृष्ठमध्ये स च फणी सदा निरन्तरं धार्य्यते । पयोधिः समुद्रः तमपि कमठपतिम् अनादरात् क्रीड़ाधानं क्रीड़नकं द्रव्यमिति भावः कुरुते । अहह आश्चर्य्यम् महता चरित्रविभूतयः सुचरितसम्पदः निःसीमानः सीमारहिताः अनन्ता इत्यर्थः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः । शिखरिणीवृत्तम् । रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणी मतेयं तद्वृत्तज्ञाः ॥ ९५ ॥

स्पृहयतीति । विजयश्रीः जयलक्ष्मीः मत्ता प्रौढ़ा प्रगल्भा वनितेव नारीव सदा वीराणाम् आयतेन करवालरूपेण करुहेण

स जातो येन जातेन याति वंशः समुन्नतिम् ।
परिवर्त्तिनि संसारे मृतः को वा न जायते ॥९७॥

लज्जां गुणौघजननीं जननीमिव स्वां
अत्यन्तशुद्धहृदयामनुवर्त्तमानाः ।
तेजस्विनः सुखमसूनपि सन्त्यजन्ति
सत्यव्रतव्यसनिनो न पुनः प्रतिज्ञाम् ॥९८॥

सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु ।
प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः ॥९९॥

नखरेण दीर्घं विदीर्णं भुजयोरन्तरं वक्षस्थलं स्पृहयति कामयते । उपमालङ्कारः ॥ ९६ ॥

स इति । येन जातेन उत्पन्नेन पुत्रेणेति शेषः वंशः समुन्नतिम् अभ्युदयं याति प्राप्नोति स जातः, तस्यैव जननं सार्थकमिति भावः । परिवर्त्तिनि परिवर्त्तिशीले संसारे मृतः सन् को वा जनः न जायते, सर्व एव जनः मृत्वा मृत्वा पुनः पुनर्जायते इत्यर्थः । अनुष्टुब्वृत्तम् ॥ ९७ ॥

लज्जामिति । सत्यव्रते व्यसिनः समासक्ता इत्यर्थः तेजस्विनः प्रतापवन्तः स्वां जननीमिव मातरमिव गुणौघजननीं गुणराशिवर्द्धनीमित्यर्थः अत्यन्तं शुद्धं पवित्रं हृदयं यस्याः तादृशीं लज्जाम् अनुवर्त्तमानाः प्रतिज्ञात्यागे लज्जावन्त इति भावः असून् प्राणानपि सन्त्यजन्ति, प्रतिज्ञां न पुनः नैव सन्त्यजन्तीत्यर्थः । उपमालङ्कारः । वसन्ततिलकं वृत्तम् ॥ ९८ ॥

सिंह इति । सिंहः शिशुरपि मदेन मलिना कपोलभित्तिः गण्डदेशः येषां तेषु मदमत्तेष्विति यावत् गजेन्द्रेष्विति शेषः निपतति आक्रामतीत्यर्थः । सत्त्ववतां बलोत्साहवताम् इयं प्रकृतिः स्वभावः, वयः तेजसः प्रतापस्य हेतुः कारणं न खलु नैव । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः आर्यावृत्तम् ॥ ९९ ॥

किं कूर्मस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येष यत्
किं वा नास्ति परिश्रमो दिनपतेरास्ते न यन्निश्चलः ।
किन्त्वङ्गीकृतमुत्सृजन्न मनसा श्लाघ्यो जनो लज्जते
निर्वाहः प्रतिपन्नवस्तुषु सतामेतद्धि गोत्रव्रतम् ॥१००॥
दूरादर्थं घटयति नवन्दूरतश्चापशब्दं
त्यक्त्वा भूयो भवति नियतं सत्त्वभारक्षमेषु ।
मन्दस्मन्दं रचयति पदं लोकचित्तानुवृत्त्या
कामं मन्त्री कविरिव सदा खेदभारैरमुक्तः ॥ १०१ ॥

किमिति । कूर्मस्य कमठपतेः वपुषि शरीरे भरव्यथा भारवहनसङ्क्लेशः किं न स्यादिति शेषः अपितु स्यादेवेत्यर्थः, यत् एषः कूर्मः क्ष्मां पृथिवीं न क्षिपति शिरसः न पातयतीत्यर्थः । दिनपतेः सूर्यस्य परिश्रमः किं न अस्ति न विद्यते ? अपितु अस्त्येवेत्यर्थः, यत् निश्चलः स्थिरः न आस्ते न तिष्ठति सततं भ्रमतीत्यर्थः । किन्तु श्लाघ्यो महान् जनः अङ्गीकृतं प्रतिज्ञातम् उत्सृजन् त्यजन् मनसा न लज्जते अपितु लज्जत एव, हि यतः प्रतिपन्नवस्तुषु प्रतिज्ञातविषयेषु निर्वाहः सम्यादनं सतां गोत्रव्रतं कुलनियमः एतत् । अङ्गीकृतं सुकृतिनः परिपालयन्तीति कविसमुदायः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः । शार्दूलविक्रीडितं वृत्तम् ॥ १०० ॥

दूरादिति । मन्त्री सचिवः कविरिव सदा खेदभारैः आयासातिशयैः असुक्तः अत्यक्तः आयासशीलः इत्यर्थः सन् कामं सम्यक् दूरात् दूरदेशात् सप्तम्यर्थे पञ्चमी दूरदेशमाश्रित्येत्यर्थः नवं नूतनम् अर्थं कार्य्यजातं सन्धिविग्रहादिरूपमिति भावः पक्षे दूरात् उच्चारणव्यञ्जनादिदृष्टिमाश्रित्येति भावः, नवं नूतनम् अन्येन अननुभावितमिति यावत् अर्थं शब्दानामिति शेषः घटयति निष्पादयति पक्षे आविष्करोति दूरतः कार्त्स्न्येनेति भावः अपशब्दम् अपभ्रंशवाचं पक्षे असंस्कृत

दैवेन प्रभुणा स्वयञ्जगति यद्यस्य प्रमाणीकृतं
तत्तस्योपनयेन्महानपि महान्नैवाश्रयः कारणम् ।
सर्वाशापरिपूरके जलधरे वर्षत्यपि प्रत्यहं
सूक्ष्मा एव पतन्ति चातकमुखे हित्वाः पयोविन्दवः ॥१०२॥
अभिमुखनिहतस्य सतस्तिष्ठतु तावज्जयोऽथवा स्वर्गः ।
उभयबलसाधुवादः श्रवणसुखस्यैव तात्पर्यम् ॥ १०३ ॥

वाचं लक्ष्मीं नियतं सततं सतां साधूनां सभारङ्गनेषु भूयः प्राचुर्येण भवति यत्नवानिति शेषः तथा लोकचित्तानुवृत्त्या कस्य कोष्टयं चित्तं कः केन पथा चलति इत्यं लोकव्यवहारदर्शनेनेति यावत् तद्दर्शनार्थमिति भावः, पक्षे लोकानाम् आद्यवाक्यसरणेन मन्दं मन्दं शनैः शनैः पक्षे मृदु मृदु पदं चरणनिक्षेपं पक्षे सुप्तिङन्तरूपं शब्दं रचयति करोति पक्षे विन्यस्यति । उपमालङ्कारः । मन्दाक्रान्तावृत्तं, मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्ममिति तल्लक्षणात् ॥ १०१ ॥

दैवेनेति । प्रभुणा सर्वशक्तिमता दैवेन विधिना स्वयं जगति यस्य यत् प्रमाणीकृतं लभ्यत्वेन सिद्धान्तितं, तस्य तत् उपनयेत् लभ्यं भवेदित्यर्थः, महान् आश्रयः मनागपि अल्पमपि कारणं नैव भवतीति शेषः । वृत्तसञ्चारः कार्य्यान्तं क्षोदीयानपि गच्छतीति कविवचनमङ्गीकृतमिति भावः । तथाहि सर्वाशायाः सर्वकामस्य परिपूरके जलधरे प्रत्यहं वर्षति अपि चातकस्य मुखे सूक्ष्माः हित्वा एव पयोविन्दवः जलकणाः पतन्ति न ततोऽधिकमिति शेषः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः । वाद्वं लावक्रीडितं वृत्तम् ॥१०२॥

अभिमुखेति । अभिमुखे निहतस्य समरं युध्यमानस्येति भावः सतः जयः अथवा स्वर्गः तिष्ठतु तावत्, हतो वा प्राप्नुयादि स्वर्गं जित्वा वा प्राप्नुयादे मर्त्यलोकमिति भगवद्गीता । उभयबलयोः साधुवादः साधु साधु सम्यक् बुध्यसे इति मन्त्रवादः श्रवणसुखस्यैव तात्पर्य-

को न याति वशं लोके मुखे पिण्डेन पूरितः ।
मृदङ्गो मुखलेपेन करोति मधुरध्वनिम् ॥ १०४ ॥
केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्द्धजाः ।
वाण्येका समलङ्करोति ललितं या संस्कृता धार्य्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥ १०५ ॥
यदि नाम दैवगत्या जगदसरोजं कदाचिदपि जातम् ।

व्यं मृ अभिलाषः । योधाः जयपराजययोर्निरुत्सुकाः साधुवादग्राह्या-शयैव युध्यन्ते इति भावः । आर्य्यावृत्तम् ॥ १०३ ॥

क इति । को जनः मुखे पिण्डेन अन्नेन पूरितः अन्नदानेन संवर्द्धित इति भावः लोके जगति वशं न याति न गच्छति ? सर्व एव वशं गच्छतीत्यर्थः । तथाहि मृदङ्गः अचेतनोऽपीति भावः मुख-लेपेन मुखे लेपनविशेषेण मधुरध्वनिं करोति, का कथान्येषामिति भावः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः । अनुष्टुवृत्तम् ॥ १०४ ॥

केयूरा इति । केयूराः अङ्गदाख्याभरणविशेषाः न, चन्द्रो-ज्ज्वलाः चन्द्रवत्स्वच्छाः हाराः मौक्तिकस्रजः न, स्नानं न, विलेपनम् अङ्गरागः न, कुसुमं पुष्पं न, अलङ्कृताः सुसज्जिताः मूर्द्धजाः केशाः न, सुकुसुमेनालङ्कृता मूर्द्धजा इति पाठान्तरम् । विभूषयन्ति शोभयन्ति । या संस्कृता संस्कारपूता धार्य्यते गृह्यते, सा एका केवला वाणी सुसंस्कृता वागित्यर्थः ललितं विदांसं पुरुषं समलङ्करोति सम्यक् भूषयति, भूषणानि अन्यानीति शेषः सततं क्षीयन्ते क्षयं गच्छन्ति, वागेव भूषणं भूषणम् अन्यभूषणेभ्यो विलक्षणं भूषणमित्यर्थः । अत्रार्थान्तरसंक्रमितवाच्यो ध्वनिः । मार्दूलविक्रीडितं वृत्तम् ॥१०५॥

यदीति । यदि नाम कदाचित् जगत् दैवगत्या असरोजं कमल-

अवकरनिकरं विकिरति तत्किङ्कवाकुरिव हंसः ॥१०६॥
परिचरितव्याः सन्तो यद्यपि कथयन्ति न च सदुपदेशम् ।
यास्वेषां स्वैरं ताः कथा एव भवन्ति शास्त्राणि ॥ १०७ ॥
कमठकुलाचलदिग्गजफणिपतिविधृतापि चलति वसुधेयम् ।
प्रतिपन्नममलमनसां न टलति पुंसां युगान्तेऽपि ॥ १०८ ॥
इति श्रीभर्तृहरिविरचितं नीतिशतकं समाप्तम् ।

रहितं जातं स्यादिति शेषः, तत् तदा हंसः ककवाकुरिव ताम्रचूड़ इव अवकरनिकरं मलपुञ्जं विकिरति विक्षिपति किम् ? नैव विकिरतीत्यर्थः । महान् कदापि हीनतं कार्यं न करोतीति भावः । अत्राप्रस्तुतेन हंसेन महतः प्रतीतेरप्रस्तुतप्रशंसालङ्कारः । आर्याछन्दसम् ॥ १०६ ॥

परिचरितव्या इति । सन्तः साधवः यद्यपि सदुपदेशं न कथयन्ति तथापि परिचरितव्याः सेव्याः । एषां सतां यास्तु स्वैरं कथाः स्वाभाविकालापाः, ता एव शास्त्राणि भवन्ति । आर्याछन्दसम् ॥१०७॥

कमठेति । इयं वसुधा पृथिवी कमठेन कूर्मराजेन कुलाचलैः कुलपर्वतैः, महेन्द्रादिभिः, महेन्द्रो मलयः सह्यः शुक्तिमान् ऋक्षपर्वतः । विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः ॥ इति प्रसिद्धम् । दिग्गजैरैरावतादिभिः फणिपतिना नागराजेन अनन्तेन विधृतापि विशेषेणावलम्बितापि चलति कम्पते । किन्तु अमलमनसां निर्मलमतीनां पुंसां प्रतिपन्नम् अङ्गीकृतं युगान्तेऽपि न टलति न विगलति । अङ्गीकृतं सुकृतिनः सर्वथैव पालयन्तीति भावः ॥ १०८ ॥ अस्य ग्रन्थस्य नीतिशतकाख्या पञ्चाक्षरवर्तिति बोध्यम् ।

इति वि, ए उपाधिधारिणा पण्डितकुलपतिना श्रीजीवानन्दविद्यासागरभट्टाचार्येण विरचिता नीतिशतकव्याख्या समाप्ता ।

वैराग्यशतकम्।

चूडोत्तंसितचारुचन्द्रकलिकाचञ्चच्छिखाभासुरो
लीलादग्धविलोलकामशलभः श्रेयोदशाग्रे स्फुरन्।
अन्तःस्फूर्जदपारमोहतिमिरप्राग्भारसंघाटयन्
चेतःसद्मनि योगिनां विजयते ज्ञानप्रदीपो हरः॥ १॥

तृष्णादूषणम्।

बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः।
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम्॥ २॥

चूडेति। चूडायाम् उत्तंसिता भूषणीकृता चारुसनोज्ञारिणी या चन्द्रकलिका चन्द्रकला तया चञ्चन्त्या स्फुरन्त्या शिखया भासुरः दीप्यमानः, लीलया अवहेलया दग्धः भस्मीकृतः काम एव शलभः क्षुद्रकीटविशेषः येन तथाभूतः, श्रेयोदशायाः मङ्गलरूपायाः दशायाः वर्त्तेः अवस्थायाश्च अग्रे स्फुरन् ज्वलन् अन्तः मानवानामन्तःकरणे इत्यर्थः स्फूर्जतः प्रसरतः अपारस्य अशेषस्य मोहरूपस्य तिमिरस्य तमसः प्राग्भारम् अतिशयम् उच्चाटयन् खण्डयन् ज्ञानप्रदीपः हरः शम्भुः योगिनां चेतःसद्मनि मनोमन्दिरे विजयते सर्वोत्कर्षेण वर्त्तते। रूपकमलङ्कारः। तदुक्तं दर्पणे। रूपकं रूपितारोपाद् विषये निरपह्नवे इति। शार्दूलविक्रीडितं वृत्तम्। सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितमिति तल्लक्षणात्॥ १॥

बोद्धार इति। बोद्धारः बोधकुशलाः मत्सरग्रस्ताः विद्वेषपरवशाः, प्रभवः सहान्तः अनेन गर्वेण दूषिताः अवदूषिता इति यावत् अन्ये जनाः अबोधेन अज्ञानेन उपहताः बोद्धुमसमर्थाः इत्यर्थः। तस्मात् सुभाषितं जनेति शेषः अङ्गे जीर्णं विलयं गतमित्यर्थः।

न संसारोत्पन्ने विषयमनुपश्यामि कुशलं
विपाकः पुण्यानां जनयति भयं मे विमृशतः ।
महद्भिः पुण्यौघैश्चिरमपि गृहीताश्च विषया
महान्तो जायन्ते व्यसनमिव दातुं विषयिणाम् ॥ ३ ॥
भ्रान्त्वा देशमनेकदुर्गविषमं प्राप्तं न किञ्चित् फलं
त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निष्फला ।
भुक्तं मानविवर्जितं परगृहेष्वाशङ्कया काकवत्
तृष्णे ! जृम्भसि पापकर्मपिशुने ! नाद्यापि सन्तुष्यसि ॥४॥

महदचिन्तमिदं बोद्धारः मत्सरेण दूषयन्ति, प्रभवः किमेतत् बालकरचितं पश्यान इति अहङ्कारेणैव न गणयन्ति, अन्येषां बोधशक्तिः नास्तीति ममैव अङ्केन सह नष्टमिति निष्कर्षः । अनुष्टुब्वृत्तम् ॥ २ ॥

नेति । संसारे उत्पन्ने जाते दृश्ये कुशलं शुभं विषयं न पश्यामि, पुण्यानां विपाकः परिणामः विमृशतः इत्थं विचारयतः मे मम भयं जनयति । महद्भिः पुण्यौघैः पुण्यचयैः चिरं गृहीताः लब्धाः महान्तः विषया, भोग्यवस्तूनि विषयिणां भोगिनां व्यसनमिव विपदिव, व्यसनं विपदि अंशे दोषे कामजकोपजे दृष्टमरः । दातुं जायन्ते । संसारेऽस्मिन् किमपि शुभं नास्ति, सम्पत्तिस्तु केवलं महतां विपद्धेतुरिति भावः । शिखरिणीवृत्तं, रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणीति तल्लक्षणात् ॥ ३ ॥

भ्रान्त्वेति । पापकर्मपिशुने पापकार्यप्रबोधिनि तृष्णे ! अनेकदुर्गविषमं विविधदुर्गदारुणं देशं भ्रान्त्वा पर्यटित्वा किञ्चिदपि फलं धनमिति यावत् न प्राप्तम्, उचितं जातिकुलाभिमानं त्यक्त्वा निष्फला सेवा कृता प्रभोरिति शेषः, परगृहेषु चाशङ्कया भयेन काकवत् मानविवर्जितं हतमानं यथा तथा भुक्तं, तथापि त्वं जृम्भसि

उत्खातं निधिशङ्कया क्षितितलं ध्याता गिरेर्धातवो
निस्तीर्णः सरितां पतिर्नृपतयो यत्नेन सन्तोषिताः ।
मन्त्राराधनतत्परेण मनसा नीताः श्मशाने निशाः
प्राप्तः काणवराटकोऽपि न मया तृष्णेऽधुना मुञ्च माम् ॥५॥

खलोल्लापाः सोढाः कथमपि तदाराधनपरैः
निगृह्यान्तर्वाष्पं हसितमपि शून्येन मनसा ।
कृतश्चित्तस्तम्भः प्रतिहतधियामञ्जलिरपि
त्वमाशे ! मोघाशे ! किमु परमतो नर्तयसि माम् ॥६॥

स्फुरसि, अद्यापि इदानीमपि न मन्तुष्यसि न विरमसीत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ ४ ॥

उत्खातमिति । हे तृष्णे ! निधिशङ्कया अत्र निधिरस्तीति भ्रमेण क्षितितलं भूतलम् उत्खातं खनित्रेण विदारितमित्यर्थः, गिरेः पर्वतस्य धातवः गैरिकादयः ध्याताश्चिन्तिताः आनयनार्थं यतिता इति भावः, सरितामपतिः समुद्रः निस्तीर्णः, नृपतयः राजानः यत्नेन सन्तोषिताः । मन्त्रेण आराधनं देवताया इति भावः तत्र तत्परेण रतेन मनसा श्मशाने निशाः नीताः अतिवाहिताः मयेति शेषः, किन्तु मया काणवराटकोऽपि न प्राप्तः, अतः अधुना मां मुञ्च त्यज । शार्दूलविक्रीडितं वृत्तम् ॥ ५ ॥

खलोल्लापा इति । तेषां खलानाम् आराधनपरैः सेवापरायणैः सद्भिः कथमपि खलानाम् उल्लापाः वाक्यानि सोढाः, अन्तर्मनसि वाष्पम् अश्रुजलं निगृह्य शून्येन मनसा हसितमपि हास्यञ्च कृतमित्यर्थः, चित्तस्य मनसः स्तम्भः स्थैर्यं कृतः, प्रतिहता विभ्रिता धीर्यैस्तेषां सम बुद्धिप्रतिघातिनामित्यर्थः अञ्जलिरपि कृत इति शेषः । अपराधो मे जातः क्षम्यतामिति वदन्नञ्जलिना भूतमिति भावः । हे मोघाशे विफलाशे आशे तृष्णे ! अतःपरम् एतादृश-

अमीषां प्राणानां तुलितविसिनीपत्रपयसां
कृते किन्नास्माभिर्विगलितविवेकैर्व्यवसितम् ।
यदाख्यानाग्रे द्रविणमदनिःसंज्ञमनसां
कृतं वीतव्रीडैर्निजगुणकथापातकमपि ॥ ७ ॥

भोगा न भुक्ता वयमेव भुक्तास्तपो न तप्तं वयमेव तप्ताः ।
कालो न यातो वयमेव यातास्तृष्णा न जीर्णा वयमेव जीर्णाः ८

न्यक्करणात् परमपीत्यर्थः किन्तु कथं मां नर्त्तयसि ? शिखरिणीवृत्तम् ॥ ६ ॥

अमीषामिति । लुलितं समीकृतं विसिनीपत्रस्थं पयः जलं यैः तथाभूतानां क्षणस्थायिनामित्यर्थः अमीषां प्राणानां कृते निमित्तं विगलितः विनष्टः विवेको येषां तथाभूतैः अस्माभिः किं न व्यवसितम् उद्युक्तं कृतमिति यावत् सर्वमेव नीचकार्यं कृतमित्यर्थः । यत् यतः द्रविणमदेन धनमदेन निःसंज्ञं संज्ञारहितं निर्विवेकमित्यर्थः मनो येषां तादृशानाम् आख्यानां धनिनाम् अग्रे समीपे वीतव्रीडैः निर्लज्जैः सद्भिः निजगुणकथा स्वयुणकीर्त्तनमेव अहं विविधविद्यापारदर्शी नास्ति मत्समो विद्वान् कार्यदक्षश्चेत्यादिरूपं पातकं तत् कृतम् । शिखरिणीवृत्तम् ॥ ७ ॥

भोगा इति । भुज्यन्ते इति भोगाः विषयाः स्रक्चन्दनवनितादयः न भुक्ताः नास्वादिताः अस्माभिरिति शेषः, वयमेव भुक्ताः कालेनेति शेषः, तपः चान्द्रायणादिकं न तप्तं न चरितं, वयमेव तप्ताः सन्तापं गताः, कालः न यातः सदैव तिष्ठतीत्यर्थः, वयमेव याताः गताः जीवनान्तमिति शेषः, तृष्णा वासना न जीर्णा न क्षीणा सती एव तिष्ठतीत्यर्थः, वयमेव जीर्णाः जरां प्राप्ताः । उपजातिवृत्तं, स्यादिन्द्रवज्रा यदि तौ जगौ ग इति, उपेन्द्रवज्रा प्रथमे लघौ सेति, अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ता इति तल्लक्षणात् ॥ ८ ॥

वलिभिर्मुखमाक्रान्तं पलितैरङ्कितं शिरः ।
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥ ९ ॥
निष्टप्ता भोगेच्छा पुरुषबहुमानोऽपि गलितः
समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः ।
शनैर्यष्ट्युत्थानं घनतिमिररुद्धे च नयने
अहो दुष्टः कायस्तदपि मरणोपायचकितः ॥ १० ॥
आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला
रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ।

वलिभिरिति । वलिभिः मांसमङ्कोचजनितरेखाभिः मुखम् आक्रान्तं व्याप्तं, पलितैः जरासमुद्भूतशौक्ल्यैः शिरः अङ्कितं चिह्नितं कलङ्कितमित्यर्थः, गात्राणि शिथिलायन्ते शिथिलानीवाचरन्ति, एका केवला तृष्णा तरुणायते युवपदाचरति तृष्णैव मे प्रबला वर्त्तते इत्यर्थः । उपमालङ्कारः । अनुष्टुब्वृत्तम् ॥ ९ ॥

निष्टप्तेति । भोगेच्छा विषयभोगवासना निष्टप्ता विनष्टा, पुरुषेषु बहुमानोऽपि गणितः नष्टः इदानीं पुरुषं मां न कोऽपि गणयतीति भावः । जीवितसमाः प्राणतुल्याः समानाः समवयस इत्यर्थः सुहृदः बन्धवः सपदि झटिति स्वर्याताः मृता इति यावत्, शनैः मन्दं मन्दं यष्ट्या दण्डावलम्बनेनेति भावः उत्थानं गतो नास्तीति भावः, नयने घनैः सान्द्रैः दुरपनेयैरिति भावः तिमिरैः अन्धकारैः रुद्धे आवृते अन्धोऽस्मीति भावः । अहो आश्चर्यं दुष्टः कायः देहः तदपि तथापि एवमवस्थायामपीत्यर्थः मरणोपायात् मृत्युसाधनात् रोगादेरिति भावः चकितः शङ्कितः ? इदानीमपि जीवितुमिच्छामि इति भावः । शिखरिणीवृत्तम् ॥ १० ॥

आशेति । मनोरथः अभिलाष एव जलं यस्याः तथोक्ता, तृष्णा

मोहावर्त्तसुदुस्तरातिगहना प्रोत्तुङ्गचिन्तातटी
तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः॥ ११॥

विषयपरित्यागविडम्बना ।

अवश्यं यातारश्चिरतरमुषित्वापि विषया
वियोगे को भेदस्त्यजति न जनो यत् स्वयममून् ।
व्रजन्तः स्वाच्छन्द्यादतुलपरितापाय मनसः
स्वयत्यक्तास्त्येते शमसुखमनन्तं विदधति ॥ १२ ॥

एव तरङ्गाः तैः आकुलाः व्याकीर्णाः रागः विषयानुराग एव ग्राहः जलजन्तुविशेषः, तर्कतो वितर्काः विविधतर्का एव विहगाः हंसबकादि-जलचरपक्षिणः यस्यां तादृशी, धर्म एव द्रुमः वृक्षः तस्य भ्रंशिनी उद्घाटिनी, मोहः अज्ञानमेव आवर्त्तः भ्रमिविशेषः तेन सुदुस्तरा तर्त्तुमशक्या, अतिगहना अतिगभीरा, प्रोत्तुङ्गा अत्युन्नता चिन्ता एव तटी यस्याः तथाभूता आशा नाम नदी अस्तीति शेषः, तस्याः आशा-नद्याः पारगताः विशुद्धमनसः पूतचित्ताः योगीश्वराः श्रेष्ठा योगिनः नन्दन्ति सुखेन कालं नयन्तीत्यर्थः । रूपकमलङ्कारः । शार्दूलविक्रीड़ितं वृत्तम् ॥ ११ ॥

अवश्यमिति । विषयाः भोग्यवस्तूनि स्वकुचन्दनवनितादयः चिरतरं दीर्घकालम् उषित्वापि स्थित्वापि अवश्यं यातारः विनश्यन्तीत्यर्थः । वियोगे विच्छेदे भेदः विशेषः कः ? न कोऽपीत्यर्थः, यत् जनः स्वयम् अमून् विषयान् न त्यजन्ति विषयाणां स्वतो गमनात् वियोगः स्वयं परित्यागे च वियोगः ततश्च वियोगदुःखसुख-यतः समानमिति भावः । किन्तु स्वाच्छन्द्यात् स्वत एवार्थः व्रजन्तः गच्छन्तः विनश्यन्त इति यावत् मनसः चित्तस्य अतुलपरितापाय असीमसन्तापाय भवन्तीति शेषः । स्वयं निजेच्छया त्यक्ताः, एते अनन्तं शमसुखं शान्तिजनितमानन्दं विदधति जनयन्तीत्यर्थः । तस्मात् विषयाः सर्वथा परित्यक्तव्या इति भावः । शिखरिणीवृत्तम् ॥१२॥

ब्रह्मज्ञानविवेकनिर्मलधियः कुर्वन्त्यहो दुष्करं
यन्मुञ्चन्त्युपभोगभाञ्जपि धनान्येकान्ततो निःस्पृहाः ।
न प्राप्तानि पुरा न सम्प्रति न च प्राप्तौ दृढ़प्रत्यया
वाञ्छामात्रपरिग्रहाण्यपि परित्यक्तुं न शक्ता वयम् ॥१३॥
धन्यानां गिरिकन्दरेषु वसतां ज्योतिः परं ध्यायताम्
आनन्दाश्रुकणान् पिबन्ति शकुना निःशङ्कमङ्केशयाः ।
अस्माकन्तु मनोरथोपरचितप्रासादवापीतट-
क्रीड़ाकाननकेलिकौतुकजुषामायुः परं क्षीयते ॥ १४ ॥

ब्रह्मेति । ब्रह्मज्ञानेन यो विवेकः वैराग्यं तेन निर्मला धीर्येषां तथोक्ताः अतएव एकान्ततः नितरां निःस्पृहाः सन्तः उपभोगभाञ्जि उपभोग्यानि धनान्यपि यत् मुञ्चन्ति त्यजन्ति तदहो आश्चर्यं दुष्करम् अन्यैः कर्त्तुमशक्यं कुर्वन्ति । अस्माभिस्तु पुरा पूर्वं न प्राप्तानि, सम्प्रति इदानीं वर्त्तमाने इति भावः न प्राप्यन्ते इति शेषः प्राप्तौ च भाविन्यामिति शेषः न च दृढ़प्रत्ययाः सम्पूर्णविश्वासाः सन्तीति शेषः । वाञ्छामात्रेण आशामात्रेण च परिग्रहो येषां तानि अपि धनानीति शेषः परित्यक्तुं वयं न शक्ताः न समर्थाः । शार्दूलविक्रीड़ितं वृत्तम् ॥ १३ ॥

धन्यानामिति । शकुनाः पक्षिणः धन्यानां पुण्यवतां गिरिकन्दरेषु पर्वतगुहासु वसतां परं ज्योतिः परमात्मानमित्यर्थः ध्यायतां योगिनामिति शेषः अङ्कशयाः क्रोड़वर्त्तिनः सन्तः निःशङ्कं यथा तथा आनन्दाश्रुकणान् पिबन्ति । अस्माकन्तु मनोरथेन उपरचितानि कल्पितानि प्रासादाः राजभवनानि वापीतटानि क्रीड़ाकाननानि छद्यानानि तेषु केलिकौतुकं क्रीड़ानन्दं जुषन्ते सेवन्ते इति तथोक्तानां सतां परं केवलम् आयुः क्षीयते क्षयं गच्छति । शार्दूलविक्रीड़ितं वृत्तम् ॥ १४ ॥

स्तनौ मांसग्रन्थी कनककलशावित्युपमितौ
मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितम् ।
स्रवन्मूत्रक्लिन्नं करिवरकरस्पर्द्धि जघनं
मुहुर्निन्द्यं रूपं कविवरविशेषैर्गुरु कृतम् । १५ ॥
भिक्षाशनं तदपि नीरसमेकवारं
शय्या च भूः परिजनो निजदेहमात्रम् ।
वस्त्रं च जीर्णशतखण्डमलीनकन्था
हा हा ! तथापि विषयान्न परित्यजन्ति ॥ १६ ॥

स्तनाविति । मांसग्रन्थी मांसपिण्डौ स्तनौ कनककलशौ इति उपमितौ तुलितौ, मुखं श्लेष्मागारं श्लेष्मपूर्णमिति यावत् तदपि शशाङ्केन चन्द्रेण तुलितं समीकृतम् । स्रवता क्षरता मूत्रेण क्लिन्नं क्लेदयुक्तं जघनं कटिपुरोभागः करिवरस्य गजेन्द्रस्य करस्पर्द्धि शुण्डादण्डनिभम् इत्थं मुहुः पुनः पुनः निन्द्यं कुत्सनीयं रूपं कविवरविशेषैः श्रेष्ठ-कविभिः गुरु महत् कृतम् । शिखरिणीवृत्तम् ॥ १५ ॥

भिक्षाशनमिति । भिक्षया अशनं भोजनं तदपि अशनं नीरसं विस्वादम् अनुत्तमत्वादिति भावः, एकवारञ्च न तु पुनरिच्छया प्राप्यते स्वल्पत्वादिति भावः । भूः पृथिवी शय्या प्रावरणीयकटादेरभावादिति भावः । परिजनः परिवारः निजदेहमात्रं न तु पुत्रकलत्रादिकमिति भावः । जीर्णा शतखण्डा यत्र तत् एवंभूतं वस्त्रं तथा अलीना छिन्ना कन्था, वा जीर्णा अतएव शतखण्डा, मलीना कृष्णवर्णा कन्थैव वस्त्रम् । हा हा खेदे तथापि विषयान् भोगान् आशास्यान् न तु स्थितानिति भावः न परित्यजन्ति जना इति शेषः । वसन्ततिलकं वृत्तम् । अत्र त्यागहेतौ सत्यपि न त्यागः । भोगहेतुं विनापि भोगाभिलाषश्चेति विभावनाविशेषोक्तोः सङ्करः । तदुक्तं दर्पणे । सति हेतौ फलाभावो विशेषोक्तिरुदाहृता द्विधेति, विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते इति च ॥ १६ ॥

अजानन्माहात्म्यं पतति शलभस्तीव्रदहने
स मीनोऽप्यज्ञानाद्बडिशयुतमश्नाति पिशितम् ।
विजानन्तो ह्येते वयमिह विपज्जालजटिलान्
न मुञ्चामः कामानहह गहनो मोहमहिमा ॥ १७ ॥

तुङ्गं वेश्म सुताः सतामभिमताः संख्यातिगाः सम्पदः
कल्याणी दयिता वयश्च नवमित्यज्ञानमूढो जनः ।
मत्वा विश्वमनश्वरं निविशते संसारकारागृहे
संदृश्य क्षणभङ्गुरं तदखिलं धन्यस्तु सन्यस्यति ॥ १८ ॥

अजानन्निति । शलभः पतङ्गः माहात्म्यं दारुणतामिति भावः, तीव्रदहनमेति शेषः अजानन् तीव्रदहने ज्वलनमेव पतति, स मीनोऽपि मत्स्योऽपि अज्ञानात् बडिशयुतं मिश्रितम् आमिषम् अश्नाति भुङ्क्ते । किन्तु एते वयम् इह संसारे विपज्जालेन जटिलान् युतान् कामान्त इति कामान् विषयान् विजानन्तः विशेषेण जानन्तः अपि न मुञ्चामः न त्यजामः, अहह आश्चर्यं मोहस्य महिमा माहात्म्यं गहनः निविडः दुर्बोध इति यावत् । अत्र त्यागकारणज्ञानेऽपि न त्याग इति विशेषोक्तिः काव्यार्थहेतुकं काव्यलिङ्गमेतयोः संसृष्टिः । तदुक्तं दर्पणे । विशेषनामधेयैतेषां स्थितिः संसृष्टिरुच्यते इति । शिखरिणीछन्दसम् ॥ १७ ॥

तुङ्गमिति । तुङ्गम् उन्नतं वेश्म गृहं, सुताः पुत्राः, सतां साधूनाम् अभिमताः प्रिया इति भावः सम्पदः धनानि संख्यातिगाः असंख्या बहव इति यावत्, दयिता कान्ता कल्याणी शुभङ्करी, वयश्च नवं यौवनमिति अज्ञानेन मूढो निर्विवेको जनः विश्वं जगत् अनश्वरं स्थिरं मत्वा बुद्ध्वा संसारकारागृहे निविशते सम्यगासक्तो भवति । धन्यस्तु पुण्यवांस्तु तत् अखिलं गृहादिकं क्षणभङ्गुरं संदृश्य सम्यक् न्यस्यति सन्त्यजति । शार्दूलविक्रीडितं छन्दः ॥ ८१ ॥

याञ्चादैन्यदूषणम् ।

दीनादीनमुखैः स्वकीयशिशुकैराक्रष्टजीर्णाम्बरां
क्रोशद्भिः क्षुधितैर्निरन्नजठरां पश्येत्र चेद्गेहिनीम् ।
याञ्चाभङ्गभयेन गद्गदगलोद्गच्छद्विलीनाक्षरं
को देहीति वदेत् स्वदग्धजठरस्यार्थे मनस्वी पुमान् ।१९॥
अभिमतमहामानग्रन्थिप्रभेदपटीयसी
गुरुतरगुणग्रामाम्भोजस्फुटोज्ज्वलचन्द्रिका ।
विपुलविलसल्लज्जावल्लीविदारकुठारिका
जठरपिठरी दुष्पूरेयं करोति विडम्बनाम् ॥ २० ॥

दीनेति । दीनादीनमुखैः विषण्णमुखैः अविषण्णमुखैश्च क्रोशद्भिः शीत्कुर्वद्भिः क्षुधितैः स्वकीयशिशुकैः स्वकीयबालकैः आक्रष्टं जीर्णम् अम्बरं वसनं यस्याः तथाभूता निरन्नजठराम् अन्नशून्योदरां गेहिनीं चेत् यदि न पश्येत् तदा कः मनस्वी पुमान् याच्ञाभङ्गभयेन गद्गदं यथा तथा गलात् कण्ठात् उद्गच्छत् उच्चरत् विलीनं विशीर्णम् अक्षरं यस्मिन् तत् यथा तथा स्वदग्धजठरस्य अर्थे निमित्तं देहीति वदेत् न कोऽपीत्यर्थः । केवलं तादृशपुत्रकलत्रभरणार्थमेव जना भिक्षित्वा जीवन्ति न तु स्वदेहपोषणार्थमिति निष्कर्षः । शार्दूलविक्रीडितं वृत्तम् ॥ १९ ॥

अभिमतेति । अभिमतः अभीष्टः यः महामानः महान् गर्व्वभावः तस्य ग्रन्थेः प्रभेदे प्रकर्षेण भेदे विध्वंसने इति यावत् पटीयसी अतिनिपुणा, गुरुतराः अतिमहान्तः ये गुणग्रामाः गुणराशयः ते एव अम्भोजानि पद्मानि तेषु स्फुटा स्पष्टा भेषाटिभिरनाहता इति भावः अतएव उज्ज्वला चन्द्रिका ज्योत्स्ना यस्मिन्निकायां पद्मानि स्फुल्लन्तीति प्रसिद्धिः । विपुला महती विलसन्ती वा लज्जावल्ली तस्याः विदारे छेदने कुठारिका वास्यविशेषः इयं दुष्पूरा केनापि

पुण्यग्रामे वने वा महति सितपटच्छेदपाली कपाली-
मादाय न्यायगर्भद्विजहुतहुतभुग्धूमधूम्रोपकण्ठम्।
द्वारं द्वारं प्रविष्टो वरमुदरदरीपूरणाय क्षुधार्तो
मानी प्राणी धनार्थं न पुनरनुदिनं तुल्यकुल्येषु दीनः ॥२१॥
गङ्गातरङ्गकणशीकरशीतलानि
विद्याधराध्युषितचारुशिलातलानि।

पूरयितुमशक्येति यावत् जठरपिठरी उदरस्थाली विडम्बनां वञ्चनां करोति। माननाशिन्या गुणविरोधिन्या लज्जाध्वंसिन्या जठरस्थाल्या कृते लोकः केवलं विप्रलभ्यते इति निष्कर्षः। हरिणीवृत्तम्। नसमरसला गः षड्वेदैर्हयैर्हरिणी मतेति तल्लक्षणात् ॥ २० ॥

पुण्यग्रामे इति। मानी प्राणी जीवः क्षुधार्तः क्षुत्पीडितः सन् उदरदरी जठरगुहा तस्याः पूरणाय महति पुण्यग्रामे पवित्रे नगरे वने वा सितपटच्छेदस्य शुभ्रवसनखण्डस्य पालीं श्रान्तम् अञ्चलमिति यावत् कपालीं कर्परं भिक्षापात्रविशेषमिति यावत् वा आदाय न्यायगर्भैः न्यायपथवर्त्तिनः सदाचारपरायणा इति यावत् ये द्विजाः ब्राह्मणाः तैः हुतः हव्येन अर्चितः यो हुतभुक् अग्निः तस्य धूमेन धूम्रं श्यामलम् उपकण्ठं सान्निध्यं यस्य तादृशं द्वारं द्वारं प्रविष्टः वरं मनाक्प्रियः, धनार्थं धनयाच्ञार्थं तुल्यकुल्येषु समकक्षेषु जनेष्विति शेषः ज्ञातिष्विति भावः अनुदिनं प्रत्यहं दीनः कातरः याच्ञयेति भावः न पुनः वरमिति शेषः। खग्धरावृत्तम्। अम्बैर्नानां त्रयेण त्रिमुनियतियुता खग्धरा कीर्त्तितेयमिति तल्लक्षणात् ॥ २१ ॥

गङ्गेति। गङ्गायाः तरङ्गकणानाम् ऊर्मिनिवहानां शीकरैः लवकणैः, शीकरोऽम्बुकणः स्मृत इत्यमरः। शीतलानि तापहराणीति

स्थानानि किं हिमवतः प्रलयं गतानि ?
यत्रावमानपरिखण्डरता मनुष्याः ॥ २२ ॥
किं कन्दाः कन्दरेभ्यः प्रलयमुपगता ? निर्झरा वा गिरिभ्यः ?
प्रध्वस्ताः किं महीजाः सरसफलभृतो वल्कलिन्यश्च शाखाः ? ।
वीक्ष्यन्ते किं मुखानि प्रसभमुपगतप्रक्षयाणां खलानां ?
दुःखोपात्ताल्पवित्तक्षयपवनवशान्नर्तितभ्रूलतानि ॥२३॥

भावः, विद्याधरैः देवयोनिविशेषैः अध्युषितानि अधिष्ठितानि चारूणि मनोहराणि शिखातलानि येषां तानि, हिमवतः हिमाद्रेः स्थानानि प्रदेशाः प्रलयं विध्वंसं गतानि किम् ? न सन्ति किमित्यर्थः, यत् यतः मनुष्याः सावमाने अवज्ञादत्ते इत्यर्थः परिखण्डे रताः भवन्तीति शेषः । यदि तादृशं हृदयविनोदनं स्थानं न स्यात् तदा दैवस्य क्लेशः सज्जते, सति तादृशे स्थाने कथं मनुष्यैरीदृक् निकारः सज्जते इति भावः । वसन्ततिलकं वृत्तम् । त्रयं वसन्ततिलकं तभजा जगौ म इति तल्लक्षणात् ॥ २२ ॥

किमिति । कन्दरेभ्यः पर्वतगुहाभ्यः कन्दाः मूलविशेषाः वा गिरिभ्यः पर्वतेभ्यः निर्झराः किं प्रलयं प्रध्वंसम् उपगताः ? पर्वतगुहासु पर्वतेषु भक्षणीयमूलविशेषपानीयनिर्झरवारिणोरभावः किं जात इति भावः । सरसानि स्वादूनि फलानि बिभ्रतीति तथोक्ताः मञ्जोजाः वृक्षाः वल्कलिन्यः शाखाश्च याभिर्वसनाच्छादनानि सम्पद्यन्ते इति भावः किं प्रध्वस्ताः प्रक्षीणाः, न सन्ति किमित्यर्थः ? सन्त्येवेत्यर्थः । तर्हि प्रसभं सहसा उपगतः उपस्थितः प्रक्षयः प्रलयः यासां ताश्च ताः खलाः दुर्जनाः तासां दुःखेन उपात्तम् उपार्जितम् यत् अल्पं यत्किञ्चिदित्यर्थः वित्तं धनं तेन यः क्षयः गर्व एव पवनः वायुः तद्वशात् नर्तिता कम्पिता भ्रूलता येषु तादृशानि मुखानि किं वीक्ष्यन्ते ? भिक्षार्थं तादृशजनाः कथम् उपास्यन्ते इति भावः । खण्डराद्वृत्तम् ॥ २३ ॥

पुण्यैर्मूलफलैः प्रियैश्च सलिलैर्वृत्तिं कुरुष्वाधुना
भूशय्यां नवपल्लवैर्विरचयाम्युत्तिष्ठ यामो वनम् ।
क्षुद्राणामविवेकमूढ़मनसां तत्रेश्वराणां सदा
वित्तव्याधिविकारविह्वलगिरां नामापि न श्रूयते ॥ २४ ॥
फलं स्वेच्छालभ्यं प्रतिवनमखेदं क्षितिरुहां
पयः स्थाने स्थाने शिशिरमधुरं पुण्यसरिताम् ।
मृदुस्पर्शा शय्या सुललिततलापल्लवमयी
सहन्ते सन्तापं तदपि धनिनां द्वारि कृपणाः ॥ २५ ॥

पुण्यैरिति । अधुना पुण्यैः पवित्रैः मूलफलैः प्रियैः सुरसैरित्यर्थैः सलिलैर्निर्झरवारिभिरिति यावत् वृत्तिं जीवनयात्रां कुरुष्व, नवपल्लवैः भुवि शय्यां विरचयामि भवानिति शेषः, उत्तिष्ठ, वनं यामः गच्छामः । तत्र वने अविवेकेन मूढं मनो येषां तादृशानां वित्तव्याधिना धनरोगेण यो विकारः तेन विह्वला विक्लवा गिरो वाचः येषां तथाभूतानां क्षुद्राणां नीचाशयानाम् ईश्वराणां धनिनां नामापि न श्रूयते । शार्दूलविक्रीडितं वृत्तम् ॥ २४ ॥

फलमिति । प्रतिवनं वने वने क्षितिरुहां वृक्षाणां फलम् अखेदं विना आयासमित्यर्थैः स्वेच्छया लभ्यं प्राप्यम् । स्थाने स्थाने पुण्यसरितां पवित्रनदीनां शिशिरमधुरं शीतलसुरसं पयः जलं स्वेच्छालभ्यमित्यनेनान्वयः । सुललिततलतायाः पल्लवमयी अतएव मृदुः कोमलः स्पर्शो यस्याः तथाभूता शय्या स्वेच्छालभ्येति विशेषणव्यत्ययेनान्वयः । तदपि तथापि कृपणाः दीना जनाः धनिनां द्वारि सन्तापं याच्ञाजादुःखं सहन्ते ? अत्र सन्तापहेतोरभावेऽपि हेतौ तदभावः, सति सन्तापकारणेऽपि तत्परित्यागाभावरूपकार्योत्पत्तिरिति च विशेषोक्तिविभावनयोः शङ्करः । शिखरिणीवृत्तम् ॥२५॥

ये वर्द्धन्ते धनपतिपुरः प्रार्थनादुःखभाजो
ये चाल्पत्वं दधति विषयाक्षेपपर्य्याप्तबुद्धेः ।
तेषामन्तःस्फुरितहसितं वासराणां क्षरेयं
ध्यानच्छेदे शिखरिकुहरग्रावशय्यानिषण्णः ॥ २६ ॥
भिक्षाहारमदैन्यमप्रतिहतं भीतिच्छिदं सर्वदा
दुर्मात्सर्य्यमदाभिमानमथनं दुःखौघविध्वंसनम् ।
सर्वत्रान्वहमप्रयत्नसुलभं साधुप्रियं पावनं
शम्भोः सत्रमवार्य्यमक्षयनिधिं शंसन्ति योगीश्वराः ॥ २७ ॥

ये इति । ये वासराः धनपतीनां धनिनां पुरः अग्रतः प्रार्थनादुःखं याच्ञादुःखं भजन्ते इति तथोक्ताः सन्तः वर्द्धन्ते वृद्धिं गच्छन्ति, ये च वासराः विषयाणाम् आक्षेपेण आकर्षणेन पर्य्याप्ता विकला बुद्धिर्येषु तादृशस्य जनस्य अल्पत्वं दधति च क्षीणं गच्छन्तीति भावः, अहं ध्यानच्छेदे ईश्वरध्यानविरामे सति शिखरिणः पर्वतस्य कुहरे गुहायां ग्रावशय्यायां शिलाशयने निषण्णः सन् तेषां वासराणां दिवसानाम् अन्तः स्फुरितं हसितं यत्र तत् यथा तथा क्षरेयं दैन्यकष्टेन दिनं दीर्घमिव, विषयभोगेन च स्वल्पमिव प्रतीयते इति क्षरामीति निष्कर्षः । मन्दाक्रान्तावृत्तम् । मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्ममिति तल्लक्षणात् ॥ २६ ॥

भिक्षेति । योगीश्वराः योगिप्रवराः भिक्षया आहारो यत्र तथोक्तम् अदैन्यं दीनतारहितम् अप्रतिहतं निर्विघ्नं भीतिच्छिदं संसारभयहरं दुर्मात्सर्य्यस्य मदस्य अभिमानस्य च मथनं नाशनं दुःखौघानां तापसमूहानां विध्वंसनं सर्वत्र सर्वस्मिन् प्रदेशे अन्वहं प्रतिदिनम् अप्रयत्नेन अनायासेन सुलभं सुप्राप्यं सुसाध्यमित्यर्थः साधुना प्रियं प्रीतिकरं पावनम् आत्मशुद्धिजनकम् अवार्य्यम् अनिवारणीयं केनापीति शेषः शम्भोः सत्रं यज्ञं शिवार्चनमिति यावत्

भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयं
माने दैन्यभयं बले रिपुभयं रूपे तरुण्या भयम।
शास्त्रे वादिभयं गुणे खलभयं काये कृतान्ताद्भयं
सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम् ॥ २८ ॥
आक्रान्तं मरणेन जन्म जरसा यात्युत्तमं यौवनं
सन्तोषो धनलिप्सया शमसुखं प्रौढ़ाङ्गनाविभ्रमैः।

अक्षयनिधिं क्षयरहितं धनं सर्वदा शंसन्ति कथयन्ति। शार्दूलविक्रीड़ितं वृत्तम् ॥ २७ ॥

भोगे इति। भोगे विषयाणामिति शेषः रोगभयं समधिकविषयसम्भोगात् रोगोत्पत्तिरिति भावः। कुले च्युतिभयं भ्रंशभय कुक्रियादिनेति भावः। वित्ते धने नृपात् राज्ञः भयं वित्तलोभेन राजोपद्रवसम्भवादिति भावः। माने सम्भ्रमे दैन्यात् दारिद्र्यात् भयं दरिद्रतायां तस्य क्षयः स्यादिति भावः। बले शौर्ये रिपोः शत्रोः भयं बलिनं प्रति शत्रोर्विद्वेषः स्यादिति भावः। रूपे सौन्दर्ये तरुण्याः युवत्याः भयं युवत्यः रूपवन्तमाकर्षन्तीति भावः। शास्त्रे शास्त्रज्ञाने वादिनः प्रतिपक्षात् भयं पराजयशङ्केति भावः। गुणे दयादाक्षिण्यादौ खलात् दुर्जनात् भयं दुर्जना गुणिनं विद्विषन्तीति भावः। काये शरीरे कृतान्तात् यमात् भयं मृत्युभयमिति यावत् कदा कृतान्तो मां नेष्यतीति धिवेति भावः। अतः सर्वं वस्तु भयान्वितं सभयं, भुवि पृथिव्यां नृणां मानवानां वैराग्यमेव संसारेषु वीतस्पृहत्वमेव अभयम्। काव्यलिङ्गमलङ्कारः। शार्दूलविक्रीड़ितं वृत्तम् ॥ २८ ॥

आक्रान्तमिति। जन्म मरणेन आक्रान्तं कवलितं जातस्य च ध्रुवो मृत्युरिति भगवद्गीता। उत्तमं यौवनं जरसा वार्द्धकेन याति क्षीयते। धनलिप्सया धनलोभेन सन्तोषः, प्रौढ़ानां प्रगल्भ-

लोकैर्मत्सरिभिर्गुणा वनभुवो व्यालैर्नृपा दुर्जनैः
अस्थैर्य्येण विभूतयोऽप्युपहता ग्रस्तं न किङ्केन वा ॥२९॥
आधिव्याधिशतैर्जनस्य विविधैरारोग्यमुन्मूल्यते
लक्ष्मीर्यत्र पतन्ति तत्र विहतद्वारा इव ह्यापदः ।
आयुर्यातमवश्यमाशु विवशं मृत्युः करोत्यात्मसात्
तत् किं केन निरङ्कुशेन विधिना यन्निर्मितं सुस्थिरम् ? ॥३०॥
भोगास्तुङ्गतरङ्गतुल्यचपलाः प्राणाः क्षणध्वंसिनः
स्तोकान्येव दिनानि यौवनसुखं स्फूर्त्तिः क्रियासु स्थिता।

भानाम् अङ्गनानां नारीणां विभ्रमैः विलासैः शश्वत्सुखं यातीत्यनेनान्वयः । मत्सरिभिः विद्वेषकैः लोकैः गुणाः, व्यालैः हिंस्रजन्तुभिः श्वापदादिभिः वनभुवः काननभूमयः, दुर्जनैः नृपाः राजानः, अस्थैर्य्येण अव्यवस्थित्या विभूतयः सम्पदः अपि उपहताः क्षयं नीताः, अतः केन वस्तुना किं वस्तु न ग्रस्तं न कवलितम् ? सर्वमेव जगति विनष्टं भवतीति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ २९ ॥

आधीति । जनस्य लोकस्य विविधैर्नानाप्रकारैः आधीनां मनस्तापानां व्याधीनां रोगाणाञ्च शतैः आरोग्यं स्वास्थ्यम् उन्मूल्यते विनश्यते । यत्र लक्ष्मीः विद्यते इति शेषः तत्र आपदः विहतद्वारा इव प्रकटितद्वारा इव पतन्ति हि पतन्त्येव । आयुः जीवनकालः अवश्यं यातं गतं, मृत्युरन्तकः विवशम् आधिव्याधिविह्वलमिति भावः आत्मसात् करोति ग्रसति । तस्मात् तेन निरङ्कुशेन निर्बाधेन विधिना यत् निर्मितं सृष्टं तत् वस्तु किं सुस्थिरं सुखेन तिष्ठति ? नैवेत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ ३० ॥

भोगा इति । भुञ्जन्ते इति भोगाः विषयाः तुङ्गतरङ्गतुल्याः चपलाश्चञ्चलाः अस्थायिन इत्यर्थः, तुङ्गतुरङ्गेति पाठान्तरम् । प्राणाः क्षणध्वंसिनः क्षणविनश्वराः, स्तोकान्येव अल्पानि, आयुर्यं